PHALITA JYOTHISHA

ACHARYA II YEAR

Paper - IV

# PHALADIPIKA

(1-28)


**Directorate of Distance Education**

Rashtriya Sanskrit Vidyapeetha

Accredited at 'A' level by NAAC

Tirupati - 517 064 (A.P.)

## CHIEF EDITOR

## Vice-Chancellor

**GENERAL EDITOR**

Dr.Ch.P.Satyanarayana

Director, DDE

**PROGRAME CO-ORDINATOR**

Prof.M.S.R.Subrahmanya Sarma

**ADDITIONAL CO-ORDINATORS**

1. Dr.R.Deepta (Academic)
2. Sri.B.chandrasekharam (Technical)

**SUBJECT CO-ORDINATOR**

Dr.A.Sripada Bhatt

**COURSE WRITER**

Dr.Dinakara Marathe

**DIRECTORATE OF DISTANCE EDUCATION**
**R.S.VIDYAPEETHA,**
**TIRUPATI.**

# उपोद्घातः

मन्त्रेश्वरकृता फलदीपिका फलितज्योतिषे नवीनावधारणानां कारणतः प्रसिद्धाऽस्ति। स्वकीयानां नवीनानामुत्तमानां सिद्धान्तानां कारणतोऽयं ग्रन्थः विद्वद्भिः विशिष्य प्रशस्ता वर्तते। प्रचलितानां पारम्परिकाणां नियमानामत्र अनुभवसिद्धतया प्रस्तुतिर्विद्यते।

बृहज्जातकं, सारावली, बृहत्पराशरहोराशास्त्रप्रभृतीनां ग्रन्थानां सिद्धान्तानां पूर्णतया निरीक्षणादनन्तरमेव अयं ग्रन्थः ग्रन्थकृता विरचितः। अतोऽयं ग्रन्थः शास्त्रीयग्रन्थानां तर्कसङ्गता कालानुकूला च काचित् प्रस्तुतिः। अत्र बहूनां नवीनानां तथ्यानां सिद्धान्तानाञ्च प्रतिपादनं दृश्यते, ये पूर्वग्रन्थेषु स्पष्टतया नासन्। इत्थमयं ग्रन्थः वस्तुत एव फलितशास्त्रस्य तिमिरनाशिका दीपिकेव वर्तते।

अत्र बहूनामविचारितानां प्रश्नानां विशदेन चर्चा दृश्यते, यथा --

**जन्मसमयः कः स्वीकर्तव्यः** ?

**दशाफल-गोचरफलयोः समन्वयः कथं कर्तव्यः** ?

**गोचरमात्रं दृष्ट्वा फलादेशः कथं कर्तव्यः** ?

इत्येवमादयो विशिष्टाः विचारास्तत्र समाहिताः सन्ति।

अत्र ग्रन्थे **अष्टाविंशतिः (२८)** अध्यायाः सन्ति। ते च यथा --

१) राशिभेदाध्यायः २) ग्रहभेदाध्यायः ३) वर्गभेदाध्यायः ४) ग्रहबलाध्यायः ५) कर्मजीवाध्यायः ६) योगाध्यायः ७) राजयोगाध्यायः ८) भावफलाध्यायः ९) राशिफलाध्यायः १०) स्त्रीभावाध्यायः ११) स्त्रीजातकाध्यायः १२) सन्तानभावाध्यायः १३) आयुर्भावाध्यायः १४) रोगनिर्णयाध्यायः १५) भावचिन्ताध्यायः १६) द्वादशभाव-फलाध्यायः १७) निर्याणाध्यायः १८) द्विग्रहयोगाध्यायः १९) दशाफलाध्यायः २०) भावेशदशाध्यायः २१) अन्तर्दशा- फलाध्यायः २२) कालचक्रादिदशाध्यायः २३) अष्टकवर्गाध्यायः २४) अष्टकवर्गफलाध्यायः २५) उपग्रहविचाराध्यायः २६) गोचरफलाध्यायः २७) प्रव्रज्यायोगाध्यायः २८) उपसंहाराध्यायः इति।

## ग्रन्थकर्ता मन्त्रेश्वरः :-

नम्बूदिरिद्विजकुले मन्त्रेश्वरदैवज्ञः जनिमलभत। तस्य ग्रामः श्रीशालिवाटीति आसीत् इति ग्रन्थे एव उल्लिलेख ग्रन्थकारः। अधुना तिन्नवेलीनामकस्थानमेव तद् इति विशारदानां मतिः।

अस्य वास्तविकं नाम मार्कण्डेयभट्टाद्रिरिति आसीत्। भृशं व्रतोपवासतप आदिभिः अनेन दैवकृपा लब्धा। तदारभ्यायं मन्त्रेश्वर इति नाम्ना ख्यातिमवाप। अयं सुकुन्तलाम्बाया उपासक आसीदिति प्रसिद्धिः। स्वयं ग्रन्थकारो लिखति --

**सुकुन्तलाम्बां सम्पूज्य सर्वाभीष्टप्रदायिनीम्।**

**तत्कटाक्षविशेषेण कृता या फलदीपिका।।** इति।

अयं विद्वान् कस्मिन् समये बभूवेति विषये विद्वांसो विवदन्ते। प्रायः षोडशक्रैस्तवीयशतके अयं स्थितवान् इत्यनुमन्यते। अयं तु महान् साधको योगी चासीत्। सार्धैकशतं वर्षाणि जीवितवान् अयं योगक्रिययैव शरीरं तत्याजेति किम्वदन्ती श्रूयते।

# विषयानुक्रमणिका


| | | पृष्ठसंख्या |
|---|---|---|
| **उपोद्घातः** | ग्रन्थस्य ग्रन्थकारस्य च परिचयः | i-ii |
| **प्रथमः पाठः** | राशिभेदाध्यायः | 1-11 |
| **द्वितीयः पाठः** | ग्रहभेदाध्यायः | 12-22 |
| **तृतीयः पाठः** | वर्गभेदाध्यायः | 23-32 |
| **चतुर्थः पाठः** | ग्रहबलभेदाध्यायः | 33-45 |
| **पञ्चमः पाठः** | कर्माजीवभेदाध्यायः | 46-50 |
| **षष्ठः पाठः** | राजयोगमहाराजयोग-भेदाध्यायौ | 51-70 |
| **सप्तमः पाठः** | भावाश्रयफललग्नफल-भेदाध्यायौ | 71-82 |
| **अष्टमः पाठः** | सप्तमभावफलस्त्रीजातक-भेदाध्यायौ | 83-89 |
| **नवमः पाठः** | सन्तानचिन्ताध्यायः | 90-96 |
| **दशमः पाठः** | अरिष्टरोगचिन्ताध्यायौ | 97-107 |
| **एकादशः पाठः** | भावशुभाशुभभावसमुदाय-फलभेदाध्यायौ | 108-123 |
| **द्वादशः पाठः** | निर्याणविचारद्विग्रहयोग-फलाध्यायौ | 124-134 |
| **त्रयोदशः पाठः** | दशाफलनिरूपण-दशापहार-प्रत्यन्तर्दशाफल-दशाभेदाध्यायाः | 135-159 |
| **चतुर्दशः पाठः** | अष्टकवर्ग-अष्टकवर्ग-फलाध्यायौ | 160-175 |
| **पञ्चदशः पाठः** | गुलिकाद्युपग्रह-गोचर-प्रव्रज्यायोग- उपसंहाराध्यायाः | 176-190 |

# प्रथमः खण्डः
# राशिभेदाध्यायः

## संरचना


१.१. प्रस्तावना

१.२. लक्षिताधिगमविशेषाः

१.३. मङ्गलाचरणम्

१.४. कालपुरुषस्य अङ्गविभागः

१.५. मेषादीनां वासस्थानानि

१.६. मेषादीनामधिपतयः ग्रहाणामुच्चनीचस्थानानि च

१.७. रव्यादीनां मूलत्रिकोणस्थानानि

१.८. राशीनां द्विपदादिसंज्ञाः

१.९. राशीनां शीर्षोदयादिसंज्ञाः

१.१०.राशीनां चर-स्थिरादिविभागः

१.११. द्वादशभावानां संज्ञाः पर्यायपदानि

१.१२. भावानां केन्द्रादिसंज्ञाः

१.१३. आदर्शप्रश्नाः

# प्रथमः खण्डः
# राशिभेदाध्यायः

## १.१. प्रस्तावना

आदौ राशिभेदाध्यायोऽत्र निरूप्यते। ज्योतिश्शास्त्रे सर्वेष्वपि होराग्रन्थेषु आदौ राशिप्रभेदाध्यायो वर्णितो दृश्यते। अयं हि अध्यायः होराशास्त्रस्य आधारभूतः। द्वादशराशीनां स्वरूपज्ञानं विना होराग्रन्थानामध्ययनम् असाध्यमेव। अध्यायेऽस्मिन् राशीनां स्वरूपं, प्रकृतिः, वर्णाः, चरादिसंज्ञाः, केन्द्रादिसंज्ञाः भावानां संज्ञाश्च वर्णिताः। एतत्सर्वमाधारीकृत्यैव होराशास्त्रं निरूप्यते। अध्यायेऽस्मिन् विद्यमानाः सर्वेऽपि अंशाः होराशास्त्रस्य मूलभूताः वर्तन्ते। अतः अस्मिन् विद्यमानाः सर्वेऽपि विचाराः क्रमशः अग्रे उपस्थाप्यन्ते।

## १.२. लक्षिताधिगमविशेषाः

* कालपुरुषस्य अङ्गविभागं जानन्ति।
* मेषादिराशीनां वासस्थानानि ज्ञायन्ते।
* मेषादिराशीनां स्वामिनः ग्रहाणाम् उच्चनीचस्थानानि च ज्ञातुं प्रभवन्ति।
* भावानां नामानि केन्द्रादिसंज्ञाश्चज्ञायन्ते।

## १.३. मङ्गलाचरणम्

ग्रन्थादौ मङ्गलाचरणमेकः सम्प्रदायः। सङ्कल्पितस्य कार्यस्य निर्विघ्नतया परिसमाप्त्यर्थं सर्वेऽपि आदौ स्वीयं इष्टदेवं गुरुं वा स्मरन्ति। मङ्गलाचरणं शुभसूचकमिति भारतीयानामस्माकं दृढविश्वासः। अत एव फलदीपिकाकारेण मन्त्रेश्वरेणापि आदौ त्रैलोक्यदीपकस्य ज्योतिर्गणानां पतेः रवेः स्मरणं क्रियते।

अत्रोच्यते यत् ऊर्ध्वाकाशे सव्यापसव्यरूपेण निरन्तरं गतिमान् रविः षण्मासपर्यन्तं देवलोकं, पक्षमेकं पितृलोकं, आदिनं मर्त्यलोकं च अनवरतं दीपयति। तादृशः द्युतिमान् त्रैलोक्यदीपकः परमज्योतिपुरुषः ग्रहाधिपतिः सूर्यः मर्त्यलोके स्थितान् समस्तजीवान् वैभवसम्पन्नान् करोति इति। यथोक्तम् --

**सन्दर्शनं वितनुते पितृदेवनृणां**

**मासाब्दवासरदलैरथ ऊर्ध्वगं यत्।**

**सव्यं क्वचित् क्वचिदुपैत्यपसव्यमेकं**

**ज्योतिः परं दिशतु वस्त्वामितां श्रियं नः।।** इति।

एतदनन्तरं ग्रन्थकारः द्वितीये मङ्गलाचरणे कथयति यत्, मन्त्रेश्वरदैवज्ञोऽहं वाग्देवीं कुलदेवतां सरस्वतीं, स्वीयगुरून्, भूत-वर्तमान-भविष्यकालत्रयज्ञानदान् रव्यादिनवग्रहान्, गणेशं विघ्नहरं, देवं शङ्करं च प्रणम्य ज्योतिर्विदां मोदाय अत्रिपराशरादिकथितानि फलानि प्रकाशयितुं सुविमलां फलदीपिकां वक्ष्ये इति। तदुक्तं यथा --

**वाग्देवीं कुलदेवतां मम गुरून् कालत्रयज्ञानदान्**

**सूर्यादींश्च नवग्रहान् गणपतिं भक्त्या प्रणम्येश्वरम्।**

**संक्षिप्यात्रिपराशरादिकथितान् मन्त्रेश्वरो देवविद्**

**वक्ष्येऽहं फलदीपिकां सुविमलां ज्योतिर्विदां प्रीतये।।**

मङ्गलाचरणमनुपदमेव ग्रन्थावतरणादौ किमाधारीकृत्य फलादेशः कार्य इति विचारं स्पष्टयति। यथा --

**पादाभाद्यैर्यन्त्रैर्जननसमयोऽत्र प्रथमतो**

**विशेषाद्विज्ञेयः सहविघटिकाभिस्त्वथ तदा।**

**गतैर्दृक्तुल्यत्वं गणितकरणैः खेचरगतिं**

**विदित्वा तद्भावं बलमपि फलं तैः कथयतु।।**

अत्रोच्यते यत् --पदच्छायानिर्मितयन्त्रेण अथवा कालगणनायां प्रयुज्यमानैः अन्ययन्त्रैः सर्वादौ फलादेशो मूलाधारस्य जन्मकालस्य घट्यादिनिर्णयः करणीयः। तदनन्तरं दृग्गणनानुसारं ग्रहाणां तात्कालिकगतिज्ञानं कृत्वा जन्मकाले ग्रहाणां स्थितिनिर्णयो विधेयः। तत्पश्चात् ग्रहाणां बलाबलं निरीक्ष्य एव फलादेशः करणीय इति। ग्रन्थकारस्य आशयोऽस्ति यत् सिद्धान्तः होरास्कन्धस्य आधारः अतः ग्रहाणां स्फुटमानीयैव फलादेशः कार्यः। तदानीमेव फले सत्यता भवति अन्यथा फलादेशः निष्फलो भवतीति। विचारेऽस्मिन् भास्कराचार्येणोक्तं-
**यात्राविवाहोत्सवजातकादौ खेटैः स्फुटैरेव फलस्फुटित्वम् ।**

अतः ग्रहाणां स्फुटतां - बलाबलं च निरीक्ष्य एव फलादेशः करणीय इति सूचनां दत्त्वा ग्रन्थकारः ग्रन्थारम्भं करोति।

## १.४. कालपुरुषस्य अङ्गविभागः

कालपुरुषस्याङ्गविभागः लग्नादिद्वादशभावेषु क्रमशः एवं कृतः। यथा --

| भावः | अङ्गम् |
|---|---|
| प्रथमभावः | शिरः |
| द्वितीयभावः | मुखम् |
| तृतीयभावः | वक्षःस्थलम् |
| चतुर्थभावः | हृदयम् |
| पञ्चमभावः | उदरम् |
| षष्ठभावः | कटिः |
| सप्तमभावः | वस्तिप्रदेशः |
| अष्टमभावः | गुप्ताङ्गम् |
| नवमभावः | ऊरुः |
| दशमभावः | जानुयुगलम् |
| एकादशभावः | जङ्घे |
| द्वादशभावः | पादयुगलम् |

एवं प्रकारेण द्वादशभावेषु अङ्गविभागेन जातकस्य विभिन्नाङ्गानामाकारादीनां च ज्ञानं सम्भवति। जातके यः भावः प्रबलः भवति तद्भावोक्तमङ्गं जातकस्य प्रबलं ज्ञेयम्। तद्वदेव भावः दुर्बलश्चेत् तद्भावोक्तमङ्गं दुर्बलं भवेदिति समान्यतया चिन्तयितुं शक्यते। ग्रहाणां स्थितिः, ग्रहाणां युतिः, दृष्टिः इत्यादिसम्बन्धेनैव भावस्य बलनिर्णयः क्रियते। अतः ग्रहाणां बलाबलमित्यादिकं सम्यक् निरीक्ष एव भावबलस्य निर्णयः कर्तव्यः। इत्येवं रीत्यात्र कालपुरुषाङ्गविभागक्रमः सप्रयोजनम् उपपाद्यते।

## १.५. मेषादीनां वासस्थानानि

**अरण्ये केदारे शयनभवने श्वभ्रसलिले**

**गिरौ पाथः सस्यान्वितभुवि विशां धाम्नि सुषिरे।**

**जनाधीशस्थाने सजलविपिने धाम्नि विचरत्**

**कुलाले कीलाले वसतिरुदिता मेषभवनात्।।** इति।

| | | | |
|---|---|---|---|
| जलम् | वनप्रदेशः | केदारः | शयनभवनम् |
| कुम्भकार-गृहम् | | | सलिलम् |
| जलयुक्तं वनम् | | | पर्वतः |
| राजगृहम् | छिद्रम् | वैश्यगृहम् | सस्यान्वितभूः |

## १.६. मेषादीनामधिपतयः ग्रहाणामुच्चनीचस्थानानि च

**राश्यधिपाः एवं वर्तन्ते**

| | | | |
|---|---|---|---|
| गुरुः | कुजः | शुक्रः | बुधः |
| शनिः | | | चन्द्रः |
| शनिः | | | रविः |
| गुरुः | कुजः | शुक्रः | बुधः |

फलदीपिकामतानुसारं प्रमाणं यथा --

**भौमः शुक्रबुधेन्दुसूर्यशशिजाः शुक्रारजीवार्कजाः।**

**मन्दो देवगुरुः क्रमेण कथिता मेषादिराशीश्वराः।।** इति।

**ग्रहाणामुच्चादिविभागः**

| ग्रहाः | रविः | चन्द्रः | कुजः | बुधः | गुरुः | शुक्रः | शनिः |
|---|---|---|---|---|---|---|---|
| उच्चस्थानानि | मेषः | वृषभः | मकरः | कन्या | कर्क | मीन | तुला |
| परमोच्चाशाः | १०° | ३° | २८° | १५° | ५° | २७° | २०° |
| नीचस्थानानि | तुला | वृश्चिकः | कर्क | मीनः | मकरः | कन्या | मेषः |
| परमनीचाशाः | १०° | ३° | २८° | १५° | ५° | २७° | २०° |

उपर्युक्तसारण्यां रव्यादीनामुच्चनीचस्थानानि प्रदत्तानि वर्तन्ते। उच्चस्थानात् सप्तमराशिः नीचस्थानं भवति। उदा -- रवेः उच्चस्थानं मेषराशिः, ततः सप्तमराशिः तुला तस्य नीचस्थानं भवति। एवमेव सर्वेषामपि ग्रहाणां ज्ञेयम्। उच्चस्थानेन सह परमोच्चपरमनीचस्थानान्यपि प्रदत्तानि। उदा -- चन्द्रस्य उच्चराशिः वृषभः तत्र च तृतीये अंशे चन्द्रः परमोच्चो भवतीति ज्ञेयम्। रविः मेषराशौ दशमे अंशे परमोच्चो भवति। एवमेव सर्वत्र ज्ञेयम्। परमोच्चस्थानवदेव परमनीचस्थानस्यापि ग्रहणं कार्यमिति ग्रन्थकारस्य मतम्। फलकथनावसरे, ग्रहाणां बलनिर्णये, राजयोगादीनां निर्णये च ग्रहाणाम् उच्चादिविभागस्य महत्त्वं दृश्यते। अतः विचारोऽयं होराशास्त्रे बहूपकारकः अनिवार्यश्च भवतीत्यत्र नास्ति संशयः।

## १.७. रव्यादीनां मूलत्रिकोणस्थानानि

रव्यादीनां क्रमशः सिंह- वृषभ- मेष- कन्या - धनू - तुला - कुम्भराशयः मूलत्रिकोणस्थानानि भवन्ति। सारण्या स्पष्टं भवति।

| ग्रहः | मूलत्रिकोणम् | अंशाः |
|---|---|---|
| सूर्यः | सिंहः | ०-२० |
| चन्द्रः | वृषभः | ४-३० |
| कुजः | मेषः | ०-१२ |
| बुधः | कन्या | १६-२० |
| गुरुः | धनुः | ०-१० |
| शुक्रः | तुला | ०-५ |
| शनिः | कुम्भः | ०-२० |

अत्र रवेः मूलत्रिकोणस्थानं सिंहराशिर्भवति। तत्र च ० तः २० अंशपर्यन्तमेव मूलत्रिकोणमिति अवगन्तव्यम्। अवशिष्टांशाः च स्वक्षेत्रमिति। एवमेव सर्वत्र ज्ञेयम्।

## १.८. राशीनां द्विपदादिसंज्ञाः

मेषादिराशीनां द्विपद-कीट-जलचर-चतुष्पदेति विभागः कृतः ज्योतिश्शास्त्रे। स च विभागोऽत्र सारण्या दर्श्यते।

| | |
|---|---|
| **द्विपदराशयः** | मिथुन, कन्या, तुला, कुम्भ, धनुः पूर्वार्धम् |
| **कीटराशयः** | वृश्चिकः |
| **जलचरराशयः** | कर्क,मीन,मकरोत्तरार्धम् |
| **चतुष्पदराशयः** | मेषः, वृषः, सिंहः, धनुरुत्तरार्धम्, मकरपूर्वार्धम् |

## १.९. राशीनां शीर्षोदयादिसंज्ञाः

मेषादिराशीनां शीर्षोदय-पृष्ठोदय-उभयोदयेति संज्ञाः अधोलिखितसारण्या स्पष्टीक्रियन्ते।

| | |
|---|---|
| **पृष्ठोदयराशयः** | वृषभ, कर्क, धनु, मेष, मकरराशयः |
| **शीर्षोदयराशयः** | सिंह, कन्या, तुला, वृश्चिक, कुम्भराशयः |
| **उभयोदयराशयः** | मीन, मिथुनराशयः |
| **रात्रिबलिराशयः** | मिथुनराशिः पृष्ठोदयराशयश्च |
| **दिवाबलिराशयः** | मीनराशिः शीर्षोदयराशयश्च |

**गोकर्क्यश्व्यजनक्रमान्यथ नृयुग्मीनौपराराशयः**
**ते पृष्ठोभयकोदयाः समिथुनाः पृष्ठोदयाश्चैन्दवाः।**
**सौराः शेषगृहाः क्रमेण कथिता रात्रिद्युसंज्ञाः क्रमात्**
**ऊर्ध्वाधः समवक्रभानि तु पुनस्तीक्ष्णांशुमुक्ताद् ग्रहात्।।**

## १.१०.राशीनां चर-स्थिरादिविभागः

मेषादारभ्य मीनपर्यन्तं राशीनां क्रमशः --

१) चर-स्थिर-उभय।

२) द्वार-बाह्य-गर्भ।

३) धातु-मूल-जीव।

४) क्रूर-सौम्य।

५) विषम - सम।

६) पुरुष-स्त्री इत्येते षट् भेदाः वर्णिताः सन्ति।

तदुक्तं ग्रन्थकारेण --

**मेषादाह चरं स्थिराख्यमुभयं द्वारं बहिर्गर्भभं**

**धातुर्मूलमितीह जीव उदितं क्रूरं च सौम्यं विदुः।** इति।

### राशीनां चर-स्थिरादिविभागः

| क्र.सं. | मेष | वृषभ | मिथुन | कर्क | सिंह | कन्या | तुला | वृश्चिक | धनु | मकर | कुम्भ | मीन |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| १ | चर | स्थिर | उभय | चर | स्थिर | उभय | चर | स्थिर | उभय | चर | स्थिर | उभय |
| २ | द्वार | बाह्य | गर्भ | द्वार | बाह्य | गर्भ | द्वार | बाह्य | गर्भ | द्वार | बाह्य | गर्भ |
| ३ | धातु | मूल | जीव | धातु | मूल | जीव | धातु | मूल | जीव | धातु | मूल | जीव |
| ४ | क्रूर | सौम्य | क्रूर | सौम्य | क्रूर | सौम्य | क्रूर | सौम्य | क्रूर | सौम्य | क्रूर | सौम्य |
| ५ | विषम | सम | विषम | सम | विषम | सम | विषम | सम | विषम | सम | विषम | सम |
| ६ | पुरुष | स्त्री | पुरुष | स्त्री | पुरुष | स्त्री | पुरुष | स्त्री | पुरुष | स्त्री | पुरुष | स्त्री |
| दिशः | पूर्व | दक्षिण | पश्चिम | उत्तर | पूर्व | दक्षिण | पश्चिम | उत्तर | पूर्व | दक्षिण | पश्चिम | उत्तर |

## १.११. द्वादशभावानां संज्ञाः पर्यायपदानि

**संज्ञाः (पर्यायपदानि वा)**

**प्रथमभावः** - लग्नम्, होरा, कल्यः, देहः, उदयः, रूपम्, शीर्षम्, वर्तमानम्, जन्म।

**द्वितीयभावः** - वित्तम्, विद्या, सम्पत्, भुक्तिः, दक्षिणनेत्रम्, आस्यम्, लेखनम्, वाणी, कुटुम्बम्।

**तृतीयभावः** - दुश्चिक्यम्, वक्षःस्थलम्, सेना, धैर्यम्, शौर्यम्, विक्रमम्, भ्राता।

**चतुर्थभावः** - गृहम्, क्षेत्रम्, मातुलः, भागिनेयः, बन्धुः, मित्रम्, वाहनम्, माता, राज्यम्, गोधनम्, महिषः, सुगन्धः, वस्त्रम्, आभूषणम्, पातालः, हिबुकम्, सुखं, अम्बुः, सेतुः, नदी।

**पञ्चमभावः** - सचिवः, हस्तः, आत्मा, बुद्धिः, भविष्यज्ञानम्, असुः, श्रुतिः, स्मृतिः।

**षष्ठभावः** - ऋणम्, अस्त्रम्, चोरः, क्षतम्, रोगः, शत्रुः, ज्ञातिः, अजिः, दुष्कृतिः, अघः, भीतिः, अवज्ञा।

**सप्तमभावः** - जामित्रम्, चित्तोत्थम्, मदः, अस्तम्, कामः, द्यूनम्, अध्वा, लोकः, पतिः, भार्या।

**अष्टमभावः** - माङ्गल्यम्, रन्ध्रम्, मलिनम्, आधिः, पराभवः, आयुः, क्लेशः, अपवादः, मृत्युः, अशुचिः, विघ्नः, दासः।

**नवमभावः** - आचार्यः, दैवतम्, पिता, शुभम्, पूर्वभाग्यम्, पूजा, तपः, सुकृतं, पौत्रः, जपः।

**दशमभावः** - व्यापारः, आस्पदः, मानम्, कर्म, जयः, सत्, कीर्तिः, क्रतुः, जीविका, व्योम, आचारः, गुणः, प्रवृत्तिः, गमनम्, आज्ञा, मेषूरणम्।

**एकादशभावः** - लाभः, आयः, आगमनम्, आप्तिः, सिद्धिः, विभवः, प्राप्तिः, भवम्, श्लाघ्यता, ज्येष्ठभ्राता, वामकर्णम्, सरसः, सन्तोषः।

**द्वादशभावः** - दुःखम्, अंघ्रिः, दक्षिणनेत्रम्, क्षयः, सूचकः, अन्त्यः, दारिद्र्यम्, पापम्, शयनम्, व्ययम्, रिष्फः, बन्धनम्।

उपर्युक्ताः संज्ञाः विहाय तृतीय-षष्ठ-अष्टम-द्वादशभावानां विशिष्य लीन इति संज्ञा उक्ता। लग्नादि द्वादशभावानां पर्यायपदानामाधारेण तत्तद्भावेभ्यः विचारणीयानाम् अंशानां ज्ञानं भवति। उदा - चतुर्थभावस्य गृहं, क्षेत्रम्, मातुलः, भागिनेयः, बन्धुः, वाहनमित्यादि संज्ञाः कथिताः। अर्थात् एतेषां विचारः चतुर्थभावात् करणीयः इति।

## १.१२. भावानां केन्द्रादिसंज्ञाः

| | |
|---|---|
| **केन्द्रस्थानानि** | प्रथम -चतुर्थ - सप्तम- दशमाः । |
| **फणपरस्थानानि** | द्वितीय - पञ्चम - अष्टम - एकादशाः। |
| **आपोक्लिमस्थानानि** | तृतीय - षष्ठ - नवम - द्वादशाः । |
| **त्रिक (दुःस्थानानि)** | षष्ठ - अष्टम - द्वादशाः। |
| **सुस्थानानि** | त्रिकस्थानानि विहाय सर्वाण्यपि। |
| **चतुरस्रस्थानानि** | चतुर्थ - अष्टमौ। |
| **उपचयस्थानानि** | तृतीय - षष्ठ - दशम - एकादशाः । |
| **त्रिकोणस्थानानि** | पञ्चम - नवमौ। |
| **अपचयस्थानानि** | उपचयभिन्नानि सर्वाण्यपि । |

एवं प्रकारेण फलदीपिकाकारेण भावानां केन्द्रादिसंज्ञाः उक्ताः। प्रथम-चतुर्थ-सप्तम-दशमभावानां केन्द्रमिति संज्ञा। एवमेवान्यत्र ग्राह्यम्। केन्द्रस्थानानां कण्टक-चतुष्टयमित्यपि पर्यायपदानि विद्यन्ते ।

## १.१३. आदर्शप्रश्नाः

१. फलदीपिकाग्रन्थस्य मङ्गलाचरणं सप्रमाणं व्याख्यात।

२. कालपुरुषस्याङ्गविभागं विशदयत।

३. मेषादीनां वासस्थानानि कानि।

४. ग्रहाणामुच्चादिविभागं वर्णयत

५. द्वादशभावानां पर्यायपदानि लिखत

६. भावानां केन्द्रादिसंज्ञाः लेखनीयाः

# स्वावलोकनप्रश्नाः

१. कालपुरुषस्य अङ्गविभागं वर्णयत ?

२. द्वादशभावानां पर्यायपदानि लिखत ?

# द्वितीयः खण्डः - ग्रहभेदाध्यायः

## संरचना

२.१. प्रस्तावना

२.२.लक्षिताधिगमविशेषाः

२.३. रव्यादिग्रहाणां कारकत्वविचारः

२.४. रव्यादिग्रहाणां स्वरूपं प्रकृतिश्च

२.५. ग्रहाणां मैत्रीविचारः

२.६. ग्रहाणां दृष्टिविचारः

२.७. ग्रहाणां जात्यधिकारगुणादिविचारः

२.८. आदर्शप्रश्नाः

## २.१. प्रस्तावना

होराग्रन्थेषु सर्वत्रापि प्रायशः आदौ राशिप्रभेदः तदनन्तरं ग्रहभेदाध्यायो दृश्यते। होराग्रन्थानाम् अग्रिमाध्यायेषु विद्यमानानां विषयाणां सम्यक् ज्ञानार्थं राशिग्रहभेदयोः ज्ञानमनिवार्यम्। ग्रहभेदाध्याये ग्रहाणां स्वरूपं, प्रकृतिः, ग्रहाणां विविधसंज्ञाः, ग्रहाणां कारकत्वमित्याद्यनेके मूलभूतांशाः प्रतिपादिताः। ग्रहाणां स्वरूपं कारकत्वञ्चावलम्ब्य एव अग्रे योगाः अन्ये विचाराः च प्रवर्तन्ते।

## २.२.लक्षिताधिगमविशेषाः

* ज्योतिषे वर्तमानविविधसंज्ञानां ज्ञानम्।

* ग्रहाणां स्वरूपवर्णप्रकृत्यादीनां ज्ञानम्।

* ग्रहाणां देवतानां रत्नानां च ज्ञानम्।

* ग्रहाणां स्वरूपविषये सूक्ष्मज्ञानसम्पादनम्।

* ग्रहाणां परस्परयोगदृष्टिवशात् जायमानप्रभावस्य ज्ञानम्।

* ग्रहाणां विषये प्राथमिकज्ञानसम्पादनम्।

## २.३. रव्यादिग्रहाणां कारकत्वविचारः

**२.३.१. - रविः** - ताम्रं, सुवर्णं, पितृशुभफलं, आत्मसौख्यं, धैर्यं, राजसेवा, शिवभक्तिः, पर्वतप्रदेशेषु अटनं, यज्ञादिकर्मसु प्रवृत्तिः, देवालयादीनां निर्माणं, तीक्ष्णस्वभावः, उत्साहः इत्यादीनां कारकः रविः भवति। अर्थात् उपर्युक्तानां सम्बन्धः रविणा सह भवतीत्यर्थः। फलकथनावसरे ग्रहाणां बलानुसारं एतत्सर्वमपि विचारणीयम्।

**२.३.२. - चन्द्रः -** मातृसुखं , मनसः प्रसन्नता, समुद्रस्नानं, शुभ्रचामरं, छत्रं, व्यजनं, फलानि, पुष्पाणि, मौक्तिकं, कांस्यं, मधुरं , क्षीरं, वस्त्रं, जलं, गौः, भोजनं, शरीरसुखं, सौन्दर्यमित्यादिकं चिन्तनीयम्।

**२.३.३- कुजः** - सत्वं, खनिजधातुरत्नादिभूमिजपदार्थाः, सहोदरगुणः, युद्धं, साहसं, भोजनालयः, अग्निः, सुवर्णं, सगोत्री, शत्रुः, उत्साहः, परस्त्रीषु अनुरागः, असत्यभाषणं, पापकर्म, सेनाधिपत्यं क्षतमित्यादिकं सर्वमपि कुजात् विचिन्त्यम्। उपर्युक्तानां कारकः कुजेति भावः।

**२.३.४.- बुधः** - पाण्डित्यं, वाक्शक्तिः, कलाकौशलं, मातुलः, वाक्चातुर्यं, विद्या, पटुत्वम्, यज्ञः, वैष्णवसम्प्रदायक्रिया, सत्यभाषणं, विहारस्थानं, शुक्तिः, शिल्पविद्या, बान्धव्यं, युवराजपदं, सुहृद्, भगिनेयः इत्येतेषां कारको भवति बुधः।

**२.३.५ - गुरुः** - ज्ञानं, पुत्रः, सद्गुणाः, मन्त्री, आचाराध्यापनम्, श्रेष्ठता, वेदशास्त्र-स्मृत्यादिनां ज्ञानम् , सर्वाङ्गीणविकासः, सद्गतिः, देवता तथा ब्राह्मणभक्तिः, धार्मिकानुष्ठानानि, यज्ञः, तपः, श्रद्धा, कोशागारः, विद्वत्ता, इन्द्रियनिग्रहः, पतिसुखं, सम्माननं, दया इत्यादीनां विचारः गुरुणा कार्यः।

**२.३.६. शुक्रः** - सम्पत्तिः, वाहनं, वस्त्रं , सुखं, धनागारः, नृत्यं, गायनं, वाद्यं, भार्यासुखं, सुगन्धः, पुष्पं, कामवासना, शय्या, भवनं, धनाढयता, कवित्वं, बहुस्त्रीसम्पर्कः, मिष्टवाक् , विवाहोत्सवादिविचारः शुक्रात् चिन्तनीयः।

२.३.७. **शनिः** - आयुष्यं, मरणं, भयं, पतनं, दुःखम्, अवमानः, रोगः, दारिद्र्यम्, उद्योगः, अपवादाः, कालुष्यम्, अशुचिः, निन्दा, विपत्तिः, स्थिरता, ऋणं, कृषिसाधनानि इत्यादिकं सर्वमपि शनिना चिन्त्यम्। इत्येवमत्र रव्यादीनां कारकत्वमुक्तम्। द्वितीयाध्यायस्य प्रथमसप्तश्लोकेषु निहितः भावोऽत्र प्रकाशितो विद्यते।

## २.४. रव्यादिग्रहाणां स्वरूपं प्रकृतिश्च

२.४.१. - **रविः** - त्रैलोक्यदीपकः रविः पित्तप्रकृतिः भवति। अस्थिसारः, अल्पकेशी, श्यामलवर्णः, मधुपिङ्गलाक्षः, रक्ताम्बरधरः, चतुरस्रदेहः, शूरः, प्रचण्डः, दीर्घबाहुश्च भवति सूर्यः। उक्तञ्च फलदीपिकायां --

**पित्तास्थिसारोऽल्पकचश्च रक्तश्यामाकृतिः स्यान्मधुपिङ्गलाक्षः।**

**कौसुम्बवासाश्चतुरस्रदेहः शूरः प्रचण्डः पृथुबाहुरर्कः।।२।।** इति

२.४.२. - **चन्द्रः** - चन्द्रः स्थूलशरीरी, युवा, प्रौढः, कृशगात्रः, सुन्दरः, आकर्षकनेत्रः, कृष्णकेशः, रक्ताधिक्यसमन्वितः, मृदुभाषी, श्वेतवस्त्रधारी, गौरः, वातकफप्रधानप्रकृतिश्च भवति।

२.४.३. **कुजः** - मध्ये कृशः, कुञ्चितदीप्तकेशः, क्रूरदृक्, पित्तप्रकृतिः, उग्रबुद्धिश्च भवति भौमः। सः रक्तवर्णः, रक्तवस्त्रधारी च भवति। तस्य शरीरे मज्जाधिक्यं दृश्यते। उग्रस्वभावः, उदारस्वभावः इत्यादिलक्षणान्यपि भवन्ति।

२.४.४. **बुधः** - अयं वातपित्तकफमिश्रितप्रकृतिः- अर्थात् त्रिधातुमिश्रः भवति। अस्य वर्णः दूर्वासमानः। अधिकसिरावान्, मृदुभाषी, हरितवस्त्रधारी हास्यरुचिः समशरीरश्च भवति बुधः।

२.४.५. **गुरुः** - पीतद्युतिः, पिङ्गलनेत्रः, पिङ्गलकेशः, बृहच्छरीरः, कफप्रकृतिः, श्रेष्ठमतिः, सिंहवत् तथा शङ्खवत् ध्वनिः, देवगुरुश्च भवति गुरुः।

२.४.६. **शुक्रः** - चित्राम्बरः, कुञ्चितकृष्णकेशः, स्थूलाङ्गः, कफवातप्रकृतिः, दूर्वाङ्कुरवत् कान्तिमान्, कमनीयः, विशालनेत्रः, पौरुषशक्तिसम्पन्नश्च भवति शुक्रः।

२.४.७. **शनिः** - पङ्गुः, निम्नलोचनः, दुर्बलदीर्घशरीरी, वातप्रकृतिः, मूर्खः, कृष्णवर्णः, स्नायुप्रधानः, कृष्णवस्त्रधारी, तामसः, मलिनः, परुषरोमा, कृष्णाम्बरधरः इत्यादिस्वरूपं प्रकृतिश्च भवति शनेः। इत्येवमत्र रविः इत्यादीनां प्रकृतिः स्वरूपञ्च ग्रन्थोक्तदिशा प्रतिपादितम्।

## २.५. ग्रहाणां मैत्रीविचारः

ज्योतिश्शास्त्रे फलकथनावसरे ग्रहाणां शत्रुमित्रत्वविचारः बहुमहत्वं भजते। ग्रहाणां मित्रक्षेत्रे अथवा शत्रुक्षेत्रे स्थितिः जातकं प्रभावयति। ग्रहाणां बलाबलनिर्णयावसरे मैत्रीविचारस्य बहु योगदानं विद्यते। स्वयं प्रबलः ग्रहः शत्रुक्षेत्रे स्थितत्वात् बलहीनो भवेत्। मित्रक्षेत्रे स्थितत्वात् तद्विपरीतफलमपि दद्यात्। अतः ज्योतिश्शास्त्रे अतिमुख्यस्य मैत्रीविचारस्य सरलतया वर्णनमत्र क्रियते।

ग्रहाणां मुख्यतया मित्रत्वं शत्रुत्वं समत्वञ्चेति त्रिधा विचारः प्रवर्तते। मैत्रीविचारे पुनः १. नैसर्गिकमैत्री २. तात्कालिकमैत्री च इति विचारः क्रियते। नैसर्गिकतात्कालिकयोः सम्बन्धेन पञ्चधा मैत्री भवति। तत्रादौ ग्रन्थोक्तदिशा नैसर्गिकमैत्रीविचारोऽत्र प्रस्तूयते।

### २.५.१. नैसर्गिकमैत्रीविचारः

सूर्यस्य शनिशुक्रौ वैरिणौ भवतः। बुधः समः तथा अन्ये ग्रहाः मित्राणि भवन्ति।

चन्द्रस्य रविबुधौ मित्रे भवतः। अन्ये ग्रहाः समाः भवन्ति। चन्द्रस्य न कोऽपि शत्रुर्भवति इत्ययमस्य विशेषता वर्तते।

कुजस्य शत्रुः बुधः, शनिशुक्रौ समौ तथा अन्ये मित्राणि भवन्ति।

बुधस्य तावत् शत्रुः चन्द्रः, रविशुक्रौ मित्रे, शेषाः मित्राणि भवन्ति।

गुरोः तावत् बुधशुक्रौ शत्रू भवतः। शनिः समो भवति अन्ये च मित्राणि भवन्ति।

शुक्रस्य शनिबुधौ मित्रे भवतः। शुक्रकुजगुरवः समाः शेषाश्च मित्राणि भवन्तीत्यवगन्तव्यम्।

शनेः मित्रे भवतः शुक्रबुधौ। बृहस्पतिः समः अन्ये च शत्रवः इति ज्ञेयम्। इत्येवमत्र नैसर्गिकमैत्रीविचारः प्रस्तुतः। प्रस्तुतांशस्य प्रमाणं ग्रन्थोक्तदिशा भवति। यथा --

**सौरयः समोऽर्कजसितावहितौ खराशोः**
**इन्दोर्हितौ रविबुधावपरे समाः स्युः।**
**भौमस्य मन्दभृगुजौ तु समौ रिपुर्ज्ञः**
**सौम्यस्य शीतगुररिः सुहृदौ सितार्कौ।।**
**सुरेर्द्विषौ कविबुधौ रविजः समः स्यात्**
**मध्यौ कवेर्गुरुकुजौ सुहृदौ शनिज्ञौ।**

**जीवः समः सतिविदौ रविजस्य मित्रे**

**ज्ञेया अनुकसचारस्तु तदन्या स्युः।। इति। फ.दी. २.२१,२२**

स्पष्टावगमनायात्र सारणी प्रदीयते।

## नैसर्गिकशत्रुमित्रत्वादिबोधकचक्रम्

| ग्रहः | सूर्यः | चन्द्रः | कुजः | बुधः | गुरुः | शुक्रः | शनिः |
|---|---|---|---|---|---|---|---|
| मित्रम् | चं,कु,गु | सू,बु | सू,चं,गु | सू,शु | र,चं,कु | बु,श | बु,शु |
| शत्रुः | शु,श | – | बु | चं | बु,शु | र,चं | सू,चं,कु |
| समः | बु | कु,बु,शु,श | शु,श | कु,गु,श | श | कु,गु | गु |

## २.५.२. तात्कालिमैत्रीविचारः पञ्चधामैत्री च

द्वौ ग्रहौ परस्परं ३,४,२,१०,११,१२, भावेषु स्थितौ भवतश्चेत् तयोर्मध्ये तात्कालिकमैत्री भवति।

नैसर्गिकतत्कालिकयोः मध्ये सम्बन्धेन पञ्चधामैत्री उत्पद्यते। तत् कथमित्युक्तौ-

१.यदि ग्रहौ तात्कालिकनैसर्गिकमित्युभयेष्वपि मित्रे भवतः तर्हि अधिमित्रमिति ।

२. यदि ग्रहौ नैसर्गिकचक्रे समौ तत्कालिके मित्रे चेत् तदा मित्रमिति।

३. एवमेव यदि नैसर्गिके शत्रुः तात्कालिके मित्रञ्चेत् तदानीं समं भवति।

४. ग्रहौ नैसर्गिके समौ तात्कालिके शत्रू भवतश्चेत् तदानीं शत्रुः भवतीति ज्ञातव्यम्

५. ग्रहौ यदि तात्कालिकनैसर्गिगयोर्मध्ये परस्परं शत्रू एव भवतः चेत् तदा अधिशत्रुरिति ज्ञेयम्। इत्येवमत्र पञ्चधामैत्रीविचारक्रमः उपपन्नः। स्पष्टज्ञानायात्र सारणी दर्श्यते।

१. नैसर्गिकमित्रम् + तात्कालिकमित्रम् = अधिमित्रम्।

२. नैसर्गिक समः + तात्कालिकमित्रम् = मित्रम्।

३.नैसर्गिक शत्रुः + तात्कालिकमित्रम् = समः।

४. नैसर्गिक समः + तात्कालिकशत्रुः = शत्रुः।

५. नैसर्गिक शत्रुः +तात्कालिकशत्रुः = अधिशत्रुः।

# स्वावलोकनप्रश्नः

**१. ग्रहाणां पञ्चधामैत्रीविचारं विवृणुत ?**

## २.६. ग्रहाणां दृष्टिविचारः

**२.६.१.** ज्योतिश्शास्त्रे विशिष्य फलकथनावसरे दृष्टिविचारः महत्वं भजते। शुभग्रहस्योपरि शत्रुग्रहस्य अथवा क्रूरग्रहस्य दृष्टिवशात् शुभग्रहः दुर्बलो भवेत्। तद्वदेव प्रबलस्य शुभग्रहस्य दृष्टिवशात् अशुभग्रहोऽपि शुभो भवितुमर्हति। ग्रहाणां दृष्टिवशात् जातके बहूनि परिवर्तनानि भवितुमर्हन्ति इत्यतः दृष्टिविचारस्य ज्योतिश्शास्त्रे उन्नतं स्थानम्।

ग्रहाणां दृष्टिविचारः फलदीपिकायां मन्त्रेश्वरेण प्रतिपाद्यते यथा --

**शौर्याङ्गे रविजो गुरुर्गुरुसुतौ भोमश्चतुर्थाप्टमौ।**

**पूर्णं पश्यति सप्तमं च सकलास्तेष्वङ्घ्रिवृध्या क्रमात्।।** इति।

अत्रोच्यते यत् --

सर्वेऽपि ग्रहाः स्वस्थानात् सप्तमं स्थानं पूर्णदृष्ट्या पष्यन्ति।

त्रिदश (३-१०) स्थाने पाददृष्ट्या (१/४)

त्रिकोण (५-९) स्थाने अर्धदृष्ट्या (१/२)

चतुरस्र (४-८) स्थाने पादोनदृष्ट्या (३/४) च

पश्यन्ति। पुनश्च शनि-गुरु-कुजानां क्रमशः त्रिदश-त्रिकोण-चतुरस्रस्थानेषु विशेषदृष्टिः भवति। विशेषदृष्टिः पूर्णदृष्टिसमा भवतीति ज्ञेयम्। अन्येषां ग्रहाणां पूर्वोक्तवदेव दृष्टिर्भवतीत्युपपन्नम्।

## २.७. ग्रहाणां जात्यधिकारगुणादिविचारः

### २.७.१. अधिकारः

रव्यादीनां क्रमशः अधिकारकालः एवं भवति।

रविः - षण्मासाः (अयनम्)    चन्द्रः - घटिकाद्वयम्।

कुजः - एकं दिनम्।    बुधः - मासद्वयम्।

गुरुः - एकः मासः।    शुक्रः - एकः पक्षः।

शनिः - एकं वर्षम्।

अत्र ग्रन्थोक्त दिशा प्रमाणमुपलभ्यते। यथा --

**"सूर्यादेरयनं क्षणो दिनमृतुर्मासश्च पक्षः शरत्"** इति।

### २.७.२. जातिः

रविः - क्षत्रियः।    चन्द्रः - वैश्यः।

कुजः - क्षत्रियः।    बुधः - शूद्रः।

गुरुः - ब्राह्मणः।    शुक्रः - ब्राह्मणः।

शनिः - म्लेच्छः।

फलदीपिकाग्रन्थानुसारं प्रमाणं यथा -- **"विप्रौ शुक्रगुरू रविक्षितिसुतौ चन्द्रो बुधोऽन्त्यः शनिः"** इति।

### २.७.३. गुणाः

रविः - सात्त्विकः चन्द्रः - सात्त्विकः कुजः - तामसः

बुधः - राजसः गुरुः - सात्त्विकः शुक्रः - राजसः शनिः- तामसः

गुणविभागविषये ग्रन्थकारेणोच्यते यथा -- **“प्राहुः सत्वरजस्तमांसि शशिगुर्वर्काः कविज्ञौ परे”** इति।

### २.७.४. ऋतुः

रविः - ग्रीष्मः चन्द्रः - वर्षर्तुः कुजः - ग्रीष्मः

बुधः - शरद् गुरुः - हेमन्तः शुक्रः - वसन्तः शनिः- शिशिरः

**“ग्रीष्मादर्ककुजौ शशी शशिसुतो जीवः शनिर्भार्गवः”** इति फलदीपिकायाम् ऋतूनां विभागविषयकप्रमाणम् उपलभ्यते।

### २.७.५. ग्रहाणां पित्र्यादिकारकत्वम्

यदि कस्यचित् जातकस्य जन्म दिवा जायते तर्हि रविः पितृकारकः शुक्रः मातृकारकश्च भवति। एवञ्च शनिः पितृव्यः चन्द्रः मातृभगिनीकारको भवति।

जातकस्य जन्म यदि रात्रौ जायते तर्हि पितृकारकः शनिः तथा चन्द्रः मातृकारको भवति। एवमेव रविशुक्रौ क्रमशः पितृव्यस्तथा मातृभगिनीकारकत्वमलङ्कुरुतः।

रविचन्द्रौ क्रमशः दक्षिणवामनेत्रयोः कारकौ भवतः। गुरुः ज्येष्ठभ्रातुः कारकः तथा कुजः कनिष्ठस्य कारको भवति। दत्तकपुत्रस्य कारको भवति बुधः। अत्र पुनः चन्द्रः शरीरस्य तथा सूर्यः आत्मनः कारको भवति। कुजादिपञ्चग्रहाः पञ्चज्ञानेन्द्रियाणां कारकाः भवन्ति। गुलिकराहुकेतवः जातकस्य शरीरे क्लेशानुत्पादयन्ति।

बुधः घ्राणशक्तेः , चन्द्रशुक्रौ रसस्य, रविकुजौ रूपस्य तथा गुरुः वाक्शक्तेश्च कारको भवति। शेषाः शनिराहुकेतवः स्पर्शस्य कारकाः भवन्ति। एवं क्रमेण सर्वेषामपि ग्रहाणां कारकत्वमुक्तं भवति। ग्रहः यस्याङ्गस्य कारकः तदङ्गं सः प्रभावयति।

उदा - बुधः घ्राणशक्तेः कारकः। बुधः यदि बलिष्ठश्चेत् तदा जातकस्य घ्राणशक्तिः प्रबला भवति तथैव दुर्बलश्चेत् तद्विपरीतं ज्ञेयम्। एवमेव अन्यत्रापि विचारणीयम्।

### २.७.६. ग्रहाणां शुभाशुभत्वं पुरुषादिसंज्ञाश्च

क्षीणः चन्द्रः पापयुतः बुधः तथा रविकुजशनिराहुकेतवः पापाः। अन्ये शुभाः।

रविकुजगुरवः पुरुषग्रहाः। शुक्रराहुचन्द्राः स्त्रीग्रहाः। केतुबुधशनयः नपुंसकग्रहाः भवन्ति। सारण्या स्पष्टं भवति।

| | |
|---|---|
| शुभग्रहाः | गुरुः, शुक्रः, पूर्णचन्द्रः, शुभयुतबुधः |
| अशुभग्रहाः | रविकुजराहुकेतवः, क्षीणचन्द्रः , पापयुत बुधः |
| पुरुषग्रहाः | रविः, कुजः, गुरुः |
| स्त्रीग्रहाः | शुक्रः, चन्द्रः, राहुः |
| नपुंसकग्रहाः | केतुबुधशनयः |

ग्रहाणामयं विभागः अन्यत्र होराग्रन्थेषु किञ्चिदिव भिद्यते। फलदीपिकाग्रन्थोक्तदिशा एव अयं क्रमः निर्दिष्टो भवति।

### २.७.७. ग्रहाणां पृथिव्यादितत्वानि देवताश्च

| ग्रहाः | रविः | चन्द्रः | कुजः | बुधः | गुरुः | शुक्रः | शनिः |
|---|---|---|---|---|---|---|---|
| तत्वम् | अग्निः | जलम् | अग्निः | पृथिवी | आकाशः | जलम् | वायुः |
| देवताः | रुद्रः | अम्बा | कार्तिकेयः | विष्णुः | ब्रह्मा | लक्ष्मीः | यमः |

अत्र प्रमाणं यथा,

**रुद्राम्बागुहविष्णुधातृकमलाकालाह्यजा देवताः**

**सूर्यादग्निजलाग्निभूमिखपयोवाय्वात्मकाः स्युर्ग्रहाः।।** इति।

### २.७.८. ग्रहाणां धान्य-रत्न-धातु-रस-प्रदेशादिविभागः

| ग्रहः | धान्यम् | प्रदेशाः | रत्नम् | धातुः | रसः |
|---|---|---|---|---|---|
| रविः | गोधूमम् | कलिङ्गः | माणिक्यम् | ताम्रम् | कटुः |
| चन्द्रः | तण्डुलम् | यवनदेशः | मुक्ता(धवलम्) | कांस्यम् | लवणम् |

| ग्रहः | धान्यम् | प्रदेशाः | रत्नम् | धातुः | रसः |
|---|---|---|---|---|---|
| कुजः | आढकः | अवन्तिका | विद्रुम | ताम्रम् | तिक्तम् |
| बुधः | मुद्गः | मगध | मरकतम् | त्रपुः | मिश्रितः |
| गुरुः | चणकः | सिन्धुः | पुष्यरागः | स्वर्णम् | मधुरम् |
| शुक्रः | श्याममुद्गः | कीकटः | वज्रम् | रोप्यम् | आम्लम् |
| शनिः | तिलः | सौराष्ट्रम् | नीलः | अयः | कषायः |
| राहुः | माषः | अम्बरः | गोमेदकम् | - | - |
| केतुः | कुलित्थः | पर्वतप्रदेशः | वैडूर्यम् | - | - |

अनिष्टग्रहाणां शान्त्यर्थं तत्तद्ग्रहोक्तानां धान्य-रत्न-धात्वादीनां दानं कर्तव्यम्। तत्तद्ग्रहोक्तानां रत्नानां धारणञ्च कर्तव्यम्। अयमेव एतेषामुपयोगः।

## स्वावलोकनप्रश्नः

**२. ग्रहाणाम् अन्न-रत्न-धातु-रस-प्रदेशादिविभागं लिखत**

### २.७.९. ग्रहाणां वृक्षाः

| ग्रहाः | वृक्षाः |
|---|---|
| रविः | अन्तःसारवृक्षः। |
| चन्द्रः | लताः। पुष्पवृक्षाः। |
| कुजः | कण्टकवृक्षः |
| बुधः | फलहीनवृक्षाः |
| गुरुः | फलवृक्षाः |
| शुक्रः | लताः |
| शनिः | कण्टकवृक्षः, रसहीनः |
| राहुः | गुल्मः |
| केतुः | गुल्मः |

इत्येवं रीत्या ग्रहभेदनामकेऽस्मिन्नध्याये ग्रहाणां सम्पूर्ण स्वरूपं वर्णितम्। ज्योतिश्शास्त्रस्य अध्ययनावसरे , फलकथनावसरे च ग्रहाणां स्वरूपज्ञानमत्यन्तमावश्यकम्। ग्रहाणां स्वरूपज्ञानं विना अग्रिमाध्यायानामवगमनं क्लेशाय भवति। अतः अत्रोक्तानां सर्वेषामपि विषयाणां सम्यगध्ययनम् अनिवार्यम्।

## २.८. आदर्शप्रश्नाः

१. रव्यादीनां कारकत्वं निरूपयत।

२. रव्यादीनां स्वरूपं प्रकृतिञ्च विशदयत।

३. ग्रहाणां मैत्रीविचारं सप्रमाणं विशदयत।

४. ग्रहाणां धातु-रस-रत्न-प्रदेशादिविभागं वर्णयत।

५. ग्रहाणां पित्र्यादिकारकत्वं निरूपयत।

# तृतीयः खण्डः - वर्गभेदाध्यायः

## संरचना

३.०. प्रस्तावना

३.१. लक्षिताधिगमविशेषाः

३.२. दशवर्गाणां विचारः

३.३. दशवर्गाणां विचारः

३.३.१. दशवर्गाणां नामानि

३.३.२. विभिन्नवर्गेषु फलप्रमाणानि

३.३.३. दशवर्गाणां क्रमशः उपस्थापनम्

३.३.४. ग्रहाणां बालाद्यवस्थाः

३.३.५. ग्रहाणां दीप्ताद्यवस्थाः तेषां फलञ्च

३.४. आदर्शप्रश्नाः

## ३.१. प्रस्तावना

होराशास्त्रोक्तरीत्या सर्वेऽपि ग्रहाः स्वबलानुगुणं शुभाशुभं फलं प्रयच्छन्ति। सामान्यतया जातकस्य लग्नकुण्डल्याधारेण राशिकुण्डल्याधारेण वा दैवज्ञैः फलादेशः क्रियते। परन्तु कदाचित् सूक्ष्मफलज्ञानाय विशिष्टफलज्ञानाय वा अस्माभिः अंशकवशात् जायमानफलस्यापि स्वीकरणं फलादेशकरणावसरे कर्तव्यं भवति। अर्थात् लग्नकुण्डल्याधारेण कस्यचित् ग्रहस्य बलं न स्यात् , तथापि यदि नवांशवशात् अथवा द्रेष्काणवशात् यदि तस्य ग्रहस्य स्थितिः उत्तमा भवति तर्हि सः ग्रहः प्रबलः ज्ञेयः। राशिभावतुल्यमेव नवांशस्यापि फलमिति केचित्। एवमेव विशिष्य नष्टप्रश्ने बन्धप्रश्ने वा द्रेष्काणस्यैव महत्वमिति प्रश्नमार्गकारः कथयति।

अनेन इदं स्पष्टं यत् जातकदर्शनावसरे जातके ग्रहाणां बलाबलनिर्णयावसरे केवलं राशि-लग्न-कुण्डल्योः दर्शनेन सह अंशकस्यापि बलं ग्राह्यमिति।

अध्यायेऽस्मिन् एकस्य राशेः दशवर्गाः उक्ताः। अर्थात् दशप्रकारैः राशेः विभागक्रमः अत्र वर्णितः। के ते दशवर्गाः ? कथञ्च तेषां विभागक्रमः इत्यादिकं सर्वमपि सरलतया अग्रे निरूप्यते।

## ३.२. लक्षिताधिगमविशेषाः

* दशवर्गाणां ज्ञानम्।
* दशवर्गाणां भेदः तेषां विभागक्रमश्च।
* अंशककुण्डल्याः आवश्यकता महत्वञ्च ज्ञायते।
* दशवर्गफलानि जानन्ति।
* ग्रहाणां दीप्ताद्यवस्थाः। इत्यादीनां निरूपणम्।

## ३.३. दशवर्गाणां विचारः

### ३.३.१. दशवर्गाणां नामानि

फलदीपिकाकारस्य वचनानुसारं दशवर्गाः एवं वर्तन्ते।

| | | |
|---|---|---|
| १. राशिः | २. द्रेष्काणम् | ३. नवांशः |
| ४. होरा | ५. त्रिंशांशः | ६. द्वादशांशः |
| ७. सप्तमांशः | ८. दशांशः | ९. षोडशांशः |

१०. षष्ट्यंशः इति एते दशवर्गाः भवन्ति।

एकस्मिन् राशौ ३० अंशाः भवन्ति। अस्यैव राशेः विविधप्रकारैः दशधा विभागः कृतः पूर्वाचार्यैः। बृहज्जातके तावत् षड् एव वर्गाः वर्णिताः। सामान्यतया सूक्ष्मफलप्रदाने षड्वर्गाणां विभागेन अलमिति तेषामभिप्रायः स्यात्। तेषां मतानुसारं १. राशिः २. होरा ३. द्रेष्काणम् ४. नवांशः ५. त्रिंशांशः ६. द्वादशांशः इति षड्वर्गाः।

एते षड्वर्गाः सामान्यतया सर्वैः उपयुज्यन्ते। अस्मिन्नेव सप्तमांशस्य योजनेन सप्तवर्गाः भवन्ति। तत्र पुनः दश- षोडश- षष्ट्यंशानां योजनेन दशवर्गाः सिध्यन्ति।

## ३.३.२. विभिन्नवर्गेषु फलप्रमाणानि

कस्यचित् जातके यदि एकः ग्रहः उच्चस्थितश्चेत् सः बलवान् पूर्णफलप्रदश्च भवतीति ज्ञातपूर्वमेवास्ति। अधुना यदि ग्रहः दुर्बलश्चेत् किं सः अशुभमेव फलं प्रयच्छति इति चेन्न। एतादृशसमये अस्माभिः नवांशेत्याद्यंशानां स्थितिवशात् फले बले वा भेदः ज्ञातव्यो भवति।

अधुना विभिन्नवर्गेषु बलप्रमाणानि उच्यन्ते। राशिवर्गे (क्षेत्रे) पूर्णं बलम्। होरायां, द्रेष्काणे, नवांशे, त्रिंशांशे, द्वादशांशे, सप्तमांशे च अर्धं बलम्। षोडशवर्गे, दशमांशे, षष्ट्यंशे च पादबलम् । अत्र इदं ज्ञेयम्- कस्यचित् जातके यदि ग्रहः उच्चे अस्ति तर्हि पूर्णं स्थानबलमिति ज्ञातमेवास्ति। तद्वदेव जातके यदि कस्यचित् ग्रहस्य होरायां, नवांशे, त्रिंशाशे, द्रेष्काणे, द्वादशांशे, सप्तमांशे उच्चस्थानस्थितिः भवति चेत् अर्धमुच्चबलं ज्ञेयमित्यर्थः। तदेव यदि षोडशांशे, दशमांशे, षष्ट्यंशे वा उच्चस्थितिश्चेत् पादबलं ज्ञेयम्। एवमाहत्य अस्यायमर्थो भवति यत् लग्नकुण्डल्यां ग्रहस्य यावद् बलं भवति तस्यार्धं बलं अन्यवर्गेभ्यः ग्राह्यमित्यर्थः।

**उदा** - सूर्यः जातके यदि मेषराशौ स्थितश्चेत् पूर्णबलम्। सूर्यः लग्नकुण्डलिवशात् नीचे, तथापि नवांशवशात् द्रेष्काणवशात् वा यदि उच्चे तर्हि नीचस्थितः अर्ध एव दोषः भवतीत्यर्थः। एवमेव सर्वत्र बलाबलनिर्णयः कार्यः।

## स्वावलोकनप्रश्नः

**१. दशवर्गाणां नामानि लिखत**

## ३.३.३. दशवर्गाणां क्रमशः उपस्थापनम्

### ३.३.३.१. राशिः

भचक्रे ३० अंशात्मकः एकः भागः राशिः भवति। एकस्मिन् चक्रे आहत्य १२ राशयः भवन्ति। ३० x १२ = ३६०। राश्यधिपाः पूर्वमेवोक्ताः।

### ३.३.३.२. होरा

राशेरर्धं होरा। अर्थात् एका होरा १५ अंशात्मिका भवति ३०/२ = १५ अर्थात् एकस्मिन् राशौ होराद्वयं भवति।

होराधिपत्यं तावत् -- विषमराशिषु प्रथमहोरा सूर्यस्य द्वितीयहोरा चन्द्रस्य भवति। एवमेव समराशिषु प्रथमहोरा चन्द्रस्य तथा द्वितीयहोरा सूर्यस्य भवति।

### ३.३.३.३. द्रेष्काणम्

राशेः तृतीयः भागः भवति द्रेष्काणम्। अर्थात् एकस्मिन् राशौ त्रीणि द्रेष्काणानि भवन्ति।

प्रथम अंशात् (१) दशमांशपर्यन्तं (१०) - प्रथमदेष्काणम्।

एकादशांशत् (११) विंशत्यंशपर्यन्तं (२०) द्वितीयं द्रेष्काणम्।

एकविंशत्यंशात् (२१) त्रिंशदंशपर्यन्तं (३०) तृतीयं द्रेष्काणम्।

इति क्रमेण अस्य विभागः भवति। एकं द्रेष्काणमित्युक्ते १० अंशाः इति स्पष्टम्।

**अधिपतिविभागः**

प्रथमद्रेष्काणाधिपतिस्तु स्वयं राश्यधिप एव।

द्वितीयद्रेष्काणाधिपतिस्तु राशेः पञ्चमस्थानाधिपतिः।

तृतीयद्रेष्काणाधिपतिस्तु राशेः नवमराश्यधिपतिः भवति।

### ३.३.३.४. नवांशः

एकस्य राशेः नवमः भागः नवांश इत्युच्यते। एकस्मिन् राशौ ९ नवांशाः भवन्ति। राशेः नवभागेषु विभागः एवं वर्तते।

| | | |
|---|---|---|
| ३.२० - १ | ६.४० - २ | १०.०० -३ |
| १३.२० - ४ | १६.४० - ५ | २०.०० - ६ |
| २३.२० - ७ | २६.४० - ८ | ३०.०० - ९ |

नवांशगणाना तावत् **मेष-मकर-तुला-कर्क** इति सूत्रानुसारं प्रवर्तते। अर्थात् -- मेषराशौ मेषराशितः एव नवांशगणाना प्रवर्तते वृषभराशौ मकरराशितः गणना भवति। मिथुनराशौ तुलाराशितः गणना भवति। कर्कराशौ कर्कराशितः गणना भवति। पुनः सिंहराशौ मेषराशितः, कन्याराशौ मकरतः, तुलाराशौ तुलातः, वृश्चिकराशौ कर्कतः इत्येवं प्रकारेण अग्रेऽपि ज्ञेयम्। स्पष्टार्थं सारणी प्रदीयते।

| | | | |
|---|---|---|---|
| **कर्कः** | **मेषः** | **मकरः** | **तुला** |
| **तुला** | **नवांशगणना सूत्रसारणी** | | **कर्कः** |
| **मकरः** | | | **मेषः** |
| **मेषः** | **कर्कः** | **तुला** | **मकरः** |

**उदाहरणम् --** रविः- २-१२-१०-००

अत्र चतुर्थः नवांशः भवति। अस्मिन् स्फुटे मिथुनराशिः भवति। मिथुनराशौ नवांशगणना तुलातः आरभ्यते। तुलातः चतुर्थः राशिः मकरः। अतः मकरस्याधिपतिः शनिः नवांशाधिपतिः भवति। नवांशकुण्डल्यां रविः मकरे अस्तीति ज्ञेयम्।

**नवांशे विशेषः** - सर्वत्र राशिषु स्वीयः नवांशः वर्गोत्तमः भवति। अर्थात् मेषराशौ मेषनवांशः वर्गोत्तमः। वृषभराशौ पञ्चमनवांशः वर्गोत्तमः भवति। मेषादितः क्रमेण - १-५-९, ...... इति , क्रमेण गणना प्रवर्तते।

### ३.३.३.५. द्वादशांशः

राशेः द्वादशः भागः द्वादशांशः इत्युच्यते। एकः द्वादशांशः इत्युक्ते २.३-० अंशाः भवन्ति। एवमाहत्य राशौ १२ भागाः भवन्ति। तद्यथा --

२°-३०′ - १ ५°-००′ - २

| | |
|---|---|
| ७°-३०′ - ३ | १०°-००′ - ४ |
| १३°-३०′ - ५ | १५°-००′ - ६ |
| १७°-३०′ - ७ | २०°-००′ - ८ |
| २२°-३०′ - ९ | २५°-००′ - १० |
| २७°-३०′ - ११ | ३०°-००′ - १२ |

द्वादशांशाधिपतयस्तु ग्रहस्थानादेव क्रमशः द्वादशराशयः भवन्ति।

### ३.३.३.६. त्रिंशाशः

राशेः त्रिंशतमः भागः त्रिंशांशः भवति। एकस्मिन् राशौ एकैकांशस्य एकः त्रिंशांशः भवति। त्रिंशाशस्य गणना प्रकारः तेषामधिपतीनां क्रमश्च अन्यवर्गेभ्यः किञ्चित् भिन्नः भवति।

**त्रिंशांशसारणी**

| | | | | | | |
|---|---|---|---|---|---|---|
| **विषमराशिषु** | **कुजः** | **शनिः** | **गुरुः** | **बुधः** | **शुक्रः** | |
| | ५° | ५° | ८° | ७° | ५° | = ३०° |
| **समराशिषु** | **शुक्र** | **बुधः** | **गुरुः** | **शनिः** | **कुजः** | |
| | ५° | ७° | ८° | ५° | ५° | = ३०° |

त्रिंशांशगणनाप्रकारस्तु विशमराशिषु

**कुज शनि गुरु ज्ञ शुक्राणां** क्रमशः

५ ५ ८ ७ ५ = ३० अंशपर्यन्तं आधिपत्यं भवति। अर्थात् ० अंशतः ५ पर्यन्तं कुजः त्रिंशांशधिपतिः भवति। ५ तः १० पर्यन्तं शनिः अधिपः ११-१८ अंशपर्यन्तं गुरुः अधिपतिः भवति। एवमेव अन्येषामपि चिन्तनीयम्।

समराशिषु चेत् तद्विपरीतक्रमेण ज्ञेयम्। अर्थात् कुज - शनि - गुरु - बुध- शुक्राणाम् अंशाः विपरीतक्रमेण अर्थात् ५-७-८-५-५ भवन्ति। स्पष्टार्थं पूर्वोक्तसारणी द्रष्टव्या।

### ३.३.३.७. सप्तमांशः

राशेः सप्तमः भागः सप्तमांशः भवति। अत्र एकः सप्तमांशः ३०/७= ४-१७-९ मितः

भवति। अस्य गणनाक्रमस्तु विषमराशिषु स्वगृहात् क्रमशः भवति। समराशिषु स्वगृहात् सप्तमराशितः क्रमशः भवति।

### ३.३.३.८. दशांशः

राशेः दशमः भागः दशांशसंज्ञकः भवति। अत्र एकः दशांशः ३०/१०= ३ परिमितः भवति। विषमराशिषु स्वराशितः क्रमशः तथा समराशिषु स्वराशितः नवमगृहमारभ्य दशांश गणना, तत्तद् गृहाधिपतयः स्वामिनः च भवन्ति।

### ३.३.३.९. षोडशांशः

राशेः षोडशः भागः षोडशांशसंज्ञकः भवति। एकः षोडशांशः १-५२′-३०" परिमितः भवति। एतादृशः षोडशांशाः १६ भवन्ति एकस्मिन् राशौ। चरराशिषु मेषतः आरभ्य कर्क पर्यन्तं राशीणां क्रमशः षोडशांशाः भवन्ति। स्थिरराशिषु सिंहराशितः वृश्चिकपर्यन्तं तथैव, द्विस्वभावराशिषु धनुराशितः क्रमशः षोडशांशाः भवन्ति। अत्र स्पष्टज्ञानाय सारण्यादिकं ग्रन्थे द्रष्टव्यम्।

### ३.३.३.१०. षष्ट्यंशः

एकस्य राशेः षष्टिः भागः षष्ट्यंशः भवति। अर्थात् एकः षष्ट्यंशः ३०/६०=०-३० परिमितः भवति। अंशस्यार्धभागः ३० कलामितः एकः षष्ट्यंशः। एतेषां षष्ट्यंशानां विभिन्नानि नामानि दत्तानि सन्ति।

**विषमराशिषु** - १,२,८,९,१०,११,१२,१५,१६,३०,३१,३२,३३,३४,३५, ३९,४०,४२,४३,४४, ४८,५१,५२,५९, इति संख्याकाः षष्ट्यंशाः अशुभाः भवन्ति। अन्ये अंशाः शुभसंज्ञकाः ज्ञेयाः।

**समराशिषु** - उपर्युक्ताः अशुभसंज्ञकाः अंशाः शुभाः भवन्ति। अन्ये सर्वेऽपि अंशाः अशुभाः। अर्थात् उपर्युक्तफलस्य विपरीतफलदायकाः भवन्तीति ज्ञेयम्।

## ३.३.४. ग्रहाणां बालाद्यवस्थाः

विषमराशिषु ग्रहाणामवस्था - यः कोऽपि ग्रहः ० तः ६ अंशयोर्मध्ये स्थितो भवति तर्हि तस्य बाल्यावस्था ज्ञेया। ग्रहः यदि ६ तः १२ अंशयोर्मध्ये तिष्ठति तर्हि कुमारावस्था भवति। १२ तः १८ अंशपर्यन्तं युवावस्था ज्ञेया। १८ तः २४ अंशपर्यन्त वृद्धावस्था। तथा २४

तः ३० पर्यन्तं मृतावस्था इति क्रमेण ग्रहाणां बालादिपञ्चावस्थाः भवन्ति। समराशिषु चेत् तद्विपरीततया ज्ञेयम्। सारण्या स्पष्टं भवति।

| **विषमराशिषु अवस्थाः** | **अंशाः** | **समराशिषु अवस्थाः** |
|---|---|---|
| बालावस्था | ०-६ | मृतावस्था |
| कुमारावस्था | ६-१२ | वृद्धावस्था |
| युवावस्था | १२-१८ | युवावस्था |
| वृद्धावस्था | १८-२४ | कुमारावस्था |
| मृतावस्था | २४-३० | बालावस्था |

**अवस्थाफलम्** -

बालावस्था - विकासोन्मुखः कुमारावस्था - सुखी

युवावस्था - राजा वृद्धावस्था - रोगी मृतावस्था - मृत्युभयम्

## ३.३.५. ग्रहाणां दीप्ताद्यवस्थाः तेषां फलञ्च

ग्रहाणां दीप्तादयः नव अवस्थाः भवन्ति । ताश्च यथा -- १. दीप्तावस्था २. स्वस्थावस्था ३. मुदितावस्था ४. शान्तावस्था ५. शक्तावस्था ६. पीडितावस्था ७. भीतावस्था ८. विकलावस्था ९. खलावस्था चेति।

१. स्वोच्चस्थितग्रहस्य दीप्तावस्था भवति।

२. स्वराशिस्थितग्रहस्य स्वस्थावस्था।

३. मित्रक्षेत्रस्थितस्य मुदितावस्था।

४. शुभग्रहवर्गस्थितस्य शान्तावस्था।

५. स्पष्टरश्मियुतस्य अर्थात् अनस्तंगतस्य ग्रहस्य शक्तावस्था ज्ञेया।

६. अन्यग्रहप्रभावितस्य पीडितावस्था।

७. पापग्रहवर्गयुक्तस्य खलावस्था।

८. शत्रुराशिस्थितस्य - दुःखितावस्था।

९. अस्तङ्गतस्य ग्रहस्य - विकलावस्था भवति।

अवस्थानां नामानुसारमेव प्रायः तेषां फलान्यपि भवन्ति। दीप्ताद्यवस्थानां फलानि सारण्या प्रदीयन्ते। यथा --

| संख्या | अवस्थाः | ग्रहस्थितिः | फलम् |
|---|---|---|---|
| १. | दीप्तावस्था | उच्चस्थितिः | ऐश्वर्यवान्, विजयी |
| २. | स्वस्थावस्था | स्वराशिस्थितिः | वंशवृद्धिकर्ता, सम्पन्नः, प्रभुः |
| ३. | मुदितावस्था | मित्रगृहस्थितिः | प्रसन्नचिन्तः, भोगी |
| ४. | शान्तावस्था | शुभवर्गस्थितिः | शान्तचित्तः, धार्मिकः, विद्वान् |
| ५. | शक्तावस्था | बलवान् | वैभवसम्पन्नः, कीर्तिमान् लोकप्रियः |
| ६. | पीडितावस्था | युद्धे पराजितः | शत्रुपीडितः, प्रवासी , बन्धुरहितः |
| ७. | भीतावस्था | नीचराशिस्थः | शत्रुपीडितः, दुर्बलः, दीनः |
| ८. | विकलावस्था | अस्तङ्गतः | अनाचारी, दरिद्रः, भीतः |
| ९. | खलावस्था | पापवर्गस्थः | नीचवृत्तिनिरतः, शोकार्तश्च। |

## स्वावलोकनप्रश्नः

**२. नवांशगणनाप्रकारं वर्णयत ?**

## ३.४. आदर्शप्रश्नाः

१. दशवर्गाणां नामानि लिखत।

२. दशवर्गाः सप्रमाणं निरूपणीयाः।

३. नवांशगणनाप्रकारं विशदयत।

४. ग्रहाणां दीप्ताद्यवस्थाः तासां फलञ्च निरूपयत।

५. ग्रहाणां बालाद्यवस्थाः सफलाः निरूपणीयाः।

# चतुर्थः खण्डः - ग्रहबलभेदाध्यायः

## संरचना

४.१.प्रस्तावना

४.२. लक्षिताधिगमविशेषाः

४.३. षड्बलविचारः

४.४.१. लग्नबलम्

४.४.२. ग्रहाणां बलप्रमाणम्

४.५.१. ग्रहाणां दृष्टिबलम्

४.६. आदर्शप्रश्नाः

## ४.१.प्रस्तावना

मन्त्रेश्वरदैवज्ञविरचिते फलदीपिकानामकेऽस्मिन् ग्रन्थे ग्रहबलभेदनामकः अयं चतुर्थः अध्यायः। ज्योतिश्शास्त्रे फलकथनावसरे ग्रहाणां बलाबलज्ञानम् अत्यन्तमावश्यकम्। ग्रहाणां बलाबलं दृष्ट्वैव जातके प्रबलग्रहस्य ज्ञानं भवितुमर्हति। बलाबलज्ञानार्थं ज्योतिश्शास्त्रे षड्विधानि बलानि प्रोक्तानि। तानि च यथा,

| | | |
|---|---|---|
| १. कालबलम् | २. चेष्टाबलम् | ३. उच्चबलम् |
| ४. दिग्बलम् | ५. अयनबलम् | ६. स्थानबलम्। इति। |

एतानि षड्बलानि उपयुज्य बलाबलनिर्णयः क्रियते। अध्यायेऽस्मिन् आहत्य २४ श्लोकाः भवन्ति। एतेषु श्लोकेषु षड्बलानि विस्तरेण विवृतानि सन्ति। तेषां षड्बलानां विचारोऽत्र क्रमशः क्रियते।

## ४.२. लक्षिताधिगमविशेषाः

* कालबलम्। * चेष्टाबलम्।

* उच्चबलम्।
* दिग्बलम्।
* अयनबलम्।
* स्थानबलम्।
* लग्नबलम्।
* ग्रहाणां दृष्टिबलम्।
* चन्द्रक्रियाफलानि।
* चन्द्रावस्थाफलानि।
* चन्द्रवेलाफलानि।

## ४.३. षड्बलविचारः

होराशास्त्रे फलकथनावसरे ग्रहबलस्य अत्यन्तमुपयोगो दृश्यते। ग्रहाणां बलाबलनिर्णयानन्तरमेव सूक्ष्मः फलदेशः साध्यो भवति। ग्रहाणां बलाबलनिर्णयार्थं ज्योतिश्शास्त्रे मुख्यतया षड्बलानि प्रतिपादितानि। तानि च यथा --

**वीर्यं षड्विधमाह कालजबलं चेष्टाबलं स्वोच्चजं दिग्वीर्यत्यवनोद्भवं दिविषदां स्थानोद्भवं च क्रमात्** इति। अत्रोच्यते यत् बलानि आहत्य षट् भवन्ति। यथा --

१. कालजबलम् २. चेष्टाबलम् ३. उच्चजबलम्

४. दिग्बलम् ५. अयनबलम् ६. स्थानबलमिति।

अत्रादौ किन्नाम कालबलमिति पश्यामः।

### ४.३.१. कालबलम्

कुजचन्द्रशुक्राः रात्रौ, बुधः दिवा रात्रौ च बलं प्राप्नोति। अन्ये रविगुरुशनयः दिवाबलिनो भवन्ति। एतद् विहाय सर्वे शुभग्रहाः शुक्लपक्षे तथैव कृष्णपक्षे सर्वेऽप्यशुभग्रहाः बलिनो भवन्ति। एवमेव सर्वे ग्रहाः स्वीये वर्षे अर्थात् वर्षाधिपत्यप्राप्तिकाले १/४ बलं, स्वीये मासे १/२ स्वीयदिने ३/४ बलं, तथैव स्वीयहोरायां सर्वे ग्रहाः बलं प्राप्नुवन्ति। इदमेव कालबलमित्युच्यते। अत्र स्वीयमासे इत्यस्य अर्थः भवति- यः ग्रहः मासाधिपो भवति सः मासः तस्य ग्रहस्य स्वीयः मासः इति। इदमेव ग्रन्थकारेण श्लोके उच्यते यथा --

**निश्यारेन्द्रसिताः परे दिवि सदा ज्ञः शुक्लपक्षे शुभाः।**

**कृष्णेऽन्ये च निजाब्दमासदिनहोरास्वङ्घ्रिवृध्या क्रमात्।।** इति।

## ४.३.२. चेष्टाबलम्

**राकाचन्द्रस्य चेष्टाबलमुदगयने भास्वतो वक्रगानां**

**युद्धे चोदक्स्थितानां स्फुटबहुलरुचां स्वोच्चवीर्यं स्वतुङ्गे।**

इत्युक्त्यनुसारं चन्द्रः यदा पूर्णो भवति तदानीं चेष्टाबलं प्राप्नोति। सूर्यः उत्तरायणे चेष्टाबलं प्राप्नोति। भौमादिपञ्चताराग्रहाः यदा वक्रिणो भवन्ति तदा चेष्टाबलं विन्दन्ति। युद्धरतग्रहेषु उत्तरदिक्स्थो ग्रहः विजयी भवति चेष्टाबलञ्च प्राप्नोति। सम्पूर्णरश्मियुक्तः ग्रहोऽपि चेष्टाबलं प्राप्नोति।

## ४.३.३. उच्चबलम्

किन्नाम उच्चबलमित्यत्र उच्यते - "**स्वोच्चवीर्यं स्वतुङ्गे**" इति। अस्यायमर्थो भवति यत् ग्रहः यदा स्वीयपरमोच्चांशे भवति तदा उच्चबलं प्राप्नोतीति। अत्र शङ्का जायते यत् किन्नाम परमोच्चांश इति। अत्र समाधानमुच्यते यथा -- रव्यादिग्रहाः मेष - वृष - मकर - कन्या - कर्क - मीन - तुला - राशिषु उच्चाः भवन्ति। तत्र च पुनः यदि १०-३-२८-१५-५-२७-२० अंशेषु परमोच्चाः भवन्ति। अत्र एतेषु परमोच्चांशेषु स्थितः ग्रहः उच्चबलं प्राप्नोतीत्यवगन्तव्यम्।

## ४.३.४. दिग्बलम्

"**दिग्वीर्यं खेऽर्कभौमौ सुहृदि शशिसितौ विद्गुरू लग्नगौ चेत्**" इत्युक्त्यनुसारं रविभोमौ खे अर्थात् दशमे स्थाने दिग्बलं प्राप्नुतः। शशिसितौ अर्थात् चन्द्रशुक्रौ सृहृत्स्थाने अर्थात् चतुर्थस्थाने दिग्बलं प्राप्नुतः। बुधगुरू लग्ने तथा शनिः अस्ते अर्थात् सप्तमे दिग्बलिनो भवन्तीति ज्ञेयम्।

## ४.३.५. अयनबलम्

"**याम्यमार्गे बुधशनिशशिनोऽन्येऽयनाक्ये परस्मिन्**" इत्युक्त्यनुसारं याम्यायने अर्थात् दक्षिणायने बुध-चन्द्र-शनयः अयनबलिनो भवन्ति। तथैव शेषाः रविकुजबुधगुरुशुक्राः उत्तारयणे अयनबलिनो भवन्ति। इत्येवंरीत्या अयनबलमवगन्तव्यम्।।

## ४.३.६. स्थानबलम्

ग्रहः यदि स्वीयोच्चराशौ, स्वराशौ, मित्रगृहे भवति चेत् स्थानबलं प्राप्नोति।

केन्द्रस्थानेषु अर्थात् १-४-७-१० स्थानेषु स्थितः ग्रहोऽपि स्थानबलं प्राप्नोति। एवमेव पणफरस्थानेषु (२,५,८,११) तथा आपोक्लिमस्थानेषु (३,६,९,१२) स्थितः ग्रहः स्थानबलं प्राप्नोति। अत्र केन्द्रस्थानेषु पूर्णबलं पणफरस्थानेषु अर्धबलं तथैव आपोक्लिमस्थानेषु स्थितः ग्रहः पादबलं प्राप्नोतीति शास्त्रवचनम्। तदुक्तं फलदीपिकायां यथा --

**स्वोच्चस्वर्क्षसुहृद्गृहेषु बलिनः षट्सु स्ववर्गेषु वा**
**प्रोक्तं स्थानबलं चतुष्टयमुखात्पूर्णार्द्धपादाः क्रमात्।**
**मध्यायन्तकषण्डमर्त्यवनिताः खेटा बलिष्ठाः क्रमात्**
**मन्दारज्ञगुरुशनोब्जरवयो नैजे बले वर्धनाः ।।** इति।

अत्रोच्यते यत् -- नपुंसको ग्रहः राशेः मध्यभागे , पुरुषग्रहः राश्यादौ तथा स्त्रीग्रहः राशेः अन्त्यभागे बली भवति। अत्र प्रसङ्गवशात् बृहज्जातकरीत्या ग्रहाणां नपुंसकादि संज्ञाः उच्यन्ते -- "**बुधसूर्यसुतौ नपुंसकाख्यौ शशिशुक्रौ युवती नराश्च शेषाः**" इति। ग्रहाणां नैसर्गिकबलं इत्थं कथ्यते -- शनिकुजबुधगुरुशुक्रचन्द्रसूर्याः क्रमशः बलिनो भवन्तीति। अत्र प्रसङ्गवशात् बृहज्जातकस्य श्लोकः स्मर्यते। यथा -- "**शकुबुगुशुचसाद्याः वृद्धितो वीर्यवन्तः**" इति।

## स्वावलोकनप्रश्नः

**१. कालबलं सप्रमाणं निरूपयत ?**

## ४.३.६.१. स्थानबले विशेषः

ग्रहः स्वोच्चस्थाने, स्वीये नवांशे, स्वगृहे स्थितोऽपि यदि अस्तङ्गतश्चेत् दुर्बलो भवति। तथैव यदि नीचस्थाने , शत्रुक्षेत्रे स्थितः सन्नपि वक्री जायते चेत् बलवान् भवतीत्यवगन्तव्यम्।

स्थानबलविचारे इतोऽपि केचन मुख्यांशाः वर्तन्ते। यथा --

* सर्वे ग्रहाः स्वोच्चराशो बलिनो भवन्ति।

* सम्पूर्णपक्षबलयुक्तः चन्द्रः बलवान् भवति शुभफलञ्च प्रयच्छति।

* कुजादिपञ्चताराग्रहाः यदा वक्रिणो भवन्ति-तदा पूर्णबलिनो भूत्वा शुभफलदा भवन्ति।

इत्येवं रीत्या अत्र क्रमशः षड्बलानि प्रतिपादितानि। अग्रे ग्रहाणां बलाबलविचारसम्बद्धः लग्नबलविचारः प्रस्तूयते।

## ४.४.१. लग्नबलम्

पुरुषराशिः अर्थात् विषमराशिः यदि कस्यचिद् लग्नं स्यात्तर्हि लग्नस्य रूपं बलमर्थात् पूर्णं बलं वाच्यम्। समराशिषु चेत् अर्धं बलमिति ज्ञेयम्। कस्यचित् जातके लग्नेशः यदि बलवान् तर्हि लग्नमपि लग्नेशसमानबलं प्राप्नोति। शुक्रयुतलग्नमपि बलप्रदमेव भवति।

एवमेव दिवा जन्म भवति चेत् दिवाबलिराशिषु अन्यतमं लग्नं स्यात्तर्हि पूर्णं बलं ज्ञेयम्। तथैव जन्म यदि रात्रौ चेत् रात्रिबलिराशिषु अन्यतमं लग्नं चेत् तत् बलयुतं ज्ञेयम्।

उपचयस्थानेषु स्थितः लग्नेशः बलवान् भवति। उपर्युक्तविवरणं फलदीपिकारीत्या प्रमाणीक्रियते। यथा --

**रूपं मानुषभेऽलिभेङ्घ्रिरपरेष्वर्धं बलं स्यात्तनोः**
**तुल्यं स्वामिबलेन चोपचयगे नाथेऽतिवीर्योत्कटम्।**
**स्वामीड्यज्ञयुतेक्षिते कवियुते चान्यैरयुक्तेक्षिते**
**शर्वर्यां निशि राशयोऽहनि परे वीर्यान्विताः कीर्तिताः।।** इति।

अधुना ग्रहाणां स्थितिभेदेन बलस्य प्रमाणं कथं भिद्यते इति विचार्यते।

## ४.४.२. ग्रहाणां बलप्रमाणम्

* सर्वे ग्रहाः उच्चराशौ पूर्णबलिनो भवन्ति।

* मूलत्रिकोणस्थानेषु स्थितः ग्रहः पादोनबलं प्राप्नोति।

* स्वक्षेत्रे स्थितः ग्रहः अर्द्धं बलं सम्पादयति।

* मित्रक्षेत्रे स्थितः पादबलं तथैव शत्रुराशिस्थः ग्रहः अत्यल्पम् अर्थात् शून्यसमं बलं प्राप्नोति।

* नीचराशिस्थः अस्तङ्गतो वा ग्रहः दुर्बलो भवतीति ज्ञेयम्। विवरणमिदं फलदीपिकाग्रन्थानुसारं श्लोकरूपेणोच्यते यथा --

**स्वोच्चे पूर्णं स्वत्रिकोणे त्रिपादं स्वक्षेत्रेऽर्द्धं मित्रभे पादमेव।**

**द्विट्क्षेत्रेऽल्पं नीचगेऽस्तंगतेऽपि क्षेत्रं वीर्यं निष्फलं स्याद् ग्रहाणाम्।।** इति।

## ४.५.१. ग्रहाणां दृष्टिबलम्

होराशास्त्रे दृष्टिबलस्य पात्रमतिमुख्यं वर्तते। अशुभस्थानस्थितोऽपि ग्रहः प्रबलस्य शुभग्रहस्य दृष्टिवशात् शुभो भवति। उदा -- प्रबलस्य गुरोः दृष्टिवशात् क्रूरग्रहस्य दुष्प्रभावः न्यूनतां याति। अतः दृष्टिविचारोऽयमत्यन्तमनिवार्यः।

दृष्टिबलं नाम दृग्बलमित्यर्थः। सर्वेषामपि ग्रहाणां सप्तमस्थाने पूर्णदृष्टिः भवति। अर्थात् सप्तमस्थाने दृग्बलं पूर्णं भवतीत्यर्थः। सर्वेषामपि सप्तमस्थाने दृग्बलं पूर्णं भवतीत्यर्थः। सर्वेषामपि ग्रहाणां ३-१० स्थानयोः पाददृष्टिर्भवति। ५-९ स्थानयोः अर्थात् त्रिकोणे अर्द्धदृष्टिः, ४-८ चतुरस्रस्थानयोः पादोनदृष्टिश्च भवति।

**विशेषदृष्टिः**

शनि-गुरु-कुजानां त्रिदशत्रिकोणचतुरस्रस्थानेषु क्रमशः विशेषदृष्टिः भवति। विशेषदृष्टिः पूर्णदृष्टिसमा भवति। अर्थात् सप्तमस्थाने सर्वेषां ग्रहाणां यथा पूर्णं दृग्बलं भवति तद्वदेव शनि-गुरु-कुजानां-पुनः विशेषदृष्टिस्थानेषु पूर्णं दृग्बलं भवतीत्यर्थः। सारिण्या स्पष्टं जायते।

| **स्थानानि** | **दृष्टिप्रमाणम्** |
|---|---|
| ३-१० | पाददृष्टिः |
| ५-९ | अर्द्धदृष्टिः |
| ४-८ | पादोनदृष्टिः |
| ७ | पूर्णदृष्टिः |

पाददृष्टिर्नाम पादबलमिति। एवमेवान्यत्रापि।

| **ग्रहाः** | **विशेषदृष्टिस्थानानि** |
|---|---|
| शनिः | ३-१० |
| गुरुः | ५-९ |
| कुजः | ४-८ |

विशेषदृष्टिबलं पूर्णदृष्टिबलसमानं ज्ञेयम्।

**पश्यन्ति सप्तमं सर्वे शनिजीवकुजाः पुनः।**
**विशेषतश्च त्रिदशत्रिकोणचतुरष्टमान्।।** (लघुपाराशरी)

## स्वावलोकनप्रश्नः

**२. दृग्बलं वर्णयत ?**

________________________________________

________________________________________

________________________________________

________________________________________

________________________________________

## ४.४.१. चन्द्रक्रिया- चन्द्रावस्था- चन्द्रवेला विचारः

जन्मनक्षत्रस्य यः गतघट्यादिभागः भवति सः विघटीषु परिवर्त्य अर्थात् ६० तः सङ्गुण्य यत् फलं लभ्यते तत् ६०,३००,१००, सङ्ख्यातः विभज्यते चेत् तस्य फलं क्रमशः चन्द्रक्रिया, चन्द्रावस्था तथा चन्द्रवेला भवति।

सूत्रं यथा --

१. जन्मनक्षत्रस्य गतघटयः X ६० /६० = चन्द्रक्रिया

२. जन्मनक्षत्रस्य गतघटयः X ६० /३०० = चन्द्रावस्था

३. जन्मनक्षत्रस्य गतघटयः X ६० /१००= चन्द्रवेला

### ४.५.१.१. चन्द्रक्रियाफलानि

एकस्मिन् नक्षत्रे ०- १३- २० एकस्य चन्द्रक्रियाप्रमाणं भवति। एतत्प्रकारेण नक्षत्रे आहत्य ६० चन्द्रक्रिया भवन्ति। तेषां फलानि अत्र सारण्या दर्श्यन्ते।

**चन्द्रक्रिया फलानि**

| चन्द्रक्रिया | चन्द्रभोग अंशादि | फलम् |
|---|---|---|
| १. | ० १३' ४०'' | स्थानच्युतिः |
| २. | ० २६' ४०'' | तपस्वी |
| ३. | ० ४०' ०'' | परस्त्रीरतः |
| ४. | ० ५३' २०'' | द्यूतक्रीडालुः |
| ५. | १ ६४' ०'' | हस्तिपकः |
| ६. | १ २०' ०७'' | सिंहासनासीनः |
| ७. | १ ३३' २०'' | प्रशासकः |
| ८. | १ ४३' ४०'' | शत्रुञ्जयः |
| ९. | २ ०' ०'' | सेनापतिः |
| १०. | २ १३' २०'' | गुणवान् |

| | | |
|---|---|---|
| ११. | २ २६ । २० ।। | निस्तेजः |
| १२. | २ ४० । ० ।। | छिन्नशिरः |
| १३. | २ ५३ । २० ।। | हस्तपदक्षतः |
| १४. | २ ६४ । ० ।। | बन्धितः |
| १५. | ३ २० । ० ।। | विनष्टः |
| १६. | ३ ३३ । २० ।। | राजा |
| १७. | ३ ४६ । ४० ।। | वेदपाठी |
| १८. | ४ ० । ० ।। | निद्रालुः |
| १९. | ४ १३ । २० ।। | चरित्रवान् |
| २०. | ४ २६ । ४० ।। | धर्माचारी |
| २१. | ४ ४० । ० ।। | सत्कुलोत्पन्नः |
| २२. | ४ ५३ । २० ।। | धनिकः |
| २३. | ४ ६४ । ० ।। | ख्यातकुलावतंसः |
| २४. | ५ २० । ० ।। | व्याख्याकारः |
| २५. | ५ ३३ । २० ।। | शत्रुञ्जयी |
| २६. | ५ ४६ । ४० ।। | रुग्णः, रोगी |
| २७. | ६ ० । ० ।। | विजितः |
| २८. | ६ १३ । २० ।। | परदेशवासी |
| २९. | ६ २६ । ४० ।। | दासः |
| ३०. | ६ ४० । ० ।। | नष्टधनः |
| ३१. | ६ ५३ । २० ।। | राजसभासद् |
| ३२. | ६ ६४ । ० ।। | सन्मन्त्री |
| ३३. | ७ २० । ० ।। | परभूस्वामी |
| ३४. | ७ ३३ । २० ।। | सपत्नीकः |
| ३५. | ७ ४६ । ४० ।। | गजत्रस्तः |
| ३६. | ८ ० । ० ।। | भीरुः |

| | | |
|---|---|---|
| ३७. | ८ १३' २०'' | भयभीत- |
| ३८. | ८ २६' ४०'' | गुप्तवासी |
| ३९. | ८ ४०' ०'' | अन्नदाता |
| ४०. | ८ ५३' २०'' | अग्निपीडितः |
| ४१. | ८ ६४' ०'' | बुभुक्षितः |
| ४२. | ९ २०' ०'' | पक्वान्नभोजी |
| ४३. | ९ ३३' २०'' | यायावरः |
| ४४. | ९ ४६' ४०'' | मांसाहारी |
| ४५. | १० ०' ०'' | शस्त्रादिना व्रणितः |
| ४६. | १० १३' २०'' | विवाहितः |
| ४७. | १० २६' ४०'' | कन्दुकहस्तः |
| ४८. | १० ४०' ०'' | द्यूतक्रीडकः |
| ४९. | १० ५३' ४०'' | राजा |
| ५०. | १० ६४' ०'' | दुःखी |
| ५१. | ११ २०' ०'' | शय्यासीनः |
| ५२. | ११ ३३' २०'' | शत्रुसेवितः |
| ५३. | ११ ४६' ४०'' | मित्रयुतः |
| ५४. | १२ ०' ०'' | योगी |
| ५५. | १२ १३' २०'' | सपत्नीकः |
| ५६. | १२ २६' ४०'' | मिष्टान्नभोजी |
| ५७. | १२ ४०' ०'' | दुग्धपानप्रियः |
| ५८. | १२ ५३' ४२'' | सत्कर्मरतः |
| ५९. | १२ ६४' ०'' | स्वस्थः |
| ६०. | १३ २०' ०'' | सुखी |

## ४.५.१.२. चन्द्रावस्थाफलानि

एकस्याः चन्द्रवस्थायाः प्रमाणम् - १- ६′-४०" भवन्ति। अतः एकस्मिन् नक्षत्रे आहत्य १२ चन्द्रावस्थाः भवन्ति। तासां फलानि सारिण्या दर्श्यन्ते।

| चन्द्रावस्था | चन्द्रस्यभोग अंशादि | फलम् |
|---|---|---|
| १. | १ ६' ४०'' | स्वस्थानेतरस्थितिः |
| २. | २ १३' २०'' | राजवल्लभः |
| ३. | ३ २०' ०'' | दासता |
| ४. | ४ २६' ४०'' | कुलोचितगुणसम्पन्नः |
| ५. | ५ ३३' २०'' | भूपालत्वम् |
| ६. | ६ ४०' ०'' | रोगः |
| ७. | ७ ४६' ४०'' | राजसभासद् |
| ८. | ८ ५३' २०'' | भयातुरः |
| ९. | १३ २०' ०'' | क्षुत्पीडा |
| १०. | ११ ६' ४०'' | पाणिग्रहणम् |
| ११. | १२ १३' २०'' | सुशय्यालिप्सा |
| १२. | १३ २०' ०'' | सुस्वादुभोजी |

## ४.५.१.३ चन्द्रवेलाफलानि

एकस्याः चन्द्रवेलायाः प्रमाणम् - ०-२२′-१३" भवति। एकस्मिन् नक्षत्रे आहत्य ३६ चन्द्रवेलाः भवन्ति। अधोनिर्दिष्टसारण्या फलानि कथ्यन्ते –

| चन्द्रवेला | चन्द्रभोग अंशादि | फलम् |
|---|---|---|
| १. | ०° २२' १३.३'' | शिरः शूलः |
| २. | ०° ४४' २६.६'' | प्रसन्नता |
| ३. | १° ०६' ४०'' | यज्ञादिकर्म |

| | | |
|---|---|---|
| ४. | १° २८' ५३.३'' | सुखी |
| ५. | १° ५२' ६.६'' | नेत्ररोगी |
| ६. | २° १३' २०'' | प्रसन्नचित्तः |
| ७. | २° ३५' ३३.३'' | स्त्रीभ्यः मनोरञ्जनम् |
| ८. | २° ५७' ४६.६'' | ज्वराधिक्यम् |
| ९. | ३° २०' ०.०'' | स्वर्णभूषणमण्डितः |
| १०. | ३° ४२' २३.३'' | अश्रुविसर्जकः, दुःखी |
| ११. | ४° ४' २६.३'' | विषपानम् |
| १२. | ४° २६' ४०'' | सम्भोगः |
| १३. | ४° ४८' ५३.३'' | उदरशूलः |
| १४. | ५° ११' ६.६'' | जलविहारः,मनोरंजनम्, चित्रकारी |
| १५. | ५° ३३' २०.०'' | क्रोधः |
| १६. | ५° ५५' ३३.३'' | नृत्यरंजनम् |
| १७. | ६° १७' ४३.६'' | घृतयुक्तभोजनम् |
| १८. | ६° ४०' ००'' | निद्रालुः |
| १९. | ७° ०२' २३.३'' | दानक्रिया |
| २०. | ७° २४' २६.६'' | दन्तशूलः |
| २१. | ७° ४६' ४०'' | विवादः, कलहः |
| २२. | ८° ८' ४३.३'' | प्रयाणम्, यात्रारम्भः |
| २३. | ८° ३१' ६.६'' | उन्मत्तता |
| २४. | ८° ५३' २०'' | जलविहारः, तरणम् |
| २५. | ९° १५' ३३.३'' | विरोधः |
| २६. | ९° ३७' ४६.६'' | स्वेच्छास्नानम् |

| | | |
|---|---|---|
| २७. | १०° ००' ००'' | क्षुधार्तता |
| २८. | १०° २२' २३.३'' | भयम् |
| २९. | १०° ४४' २६.६'' | शस्त्रलाभः |
| ३०. | ११° ६' ४०'' | स्वेच्छाचारिता |
| ३१. | ११° २८' ५३.३'' | संगोष्ठी |
| ३२. | ११° ५१' ६.६'' | युद्धम्, कलहः |
| ३३. | १२° १३' २०'' | पुण्यकर्म |
| ३४. | १२° ३५' ३३.३'' | पापाचारः |
| ३५. | १२° ५७' ४६.६'' | क्रूरकर्म |
| ३६. | १३° २०' ००'' | हर्षः, प्रसन्नता |

## ४.६. आदर्शप्रश्नाः

१. कालबलं निरूपयत।

२. षड्बलानां नामानि लिखत।

३. दृष्टिबलविचारं वर्णयत।

४. चन्द्रक्रियाविचारं विशदयत।

५. चन्द्रावस्थाफलानि विशदयत।

६. चन्द्रवेलाफलानि लिखत।

# पञ्चमः खण्डः
# कर्माजीवभेदाध्यायः

## संरचना

५.१. प्रस्तावना

५.२. लक्षिताधिगमविशेषाः

५.३.१-८ रव्यादीनां व्यवसायाः

५.४. आदर्शप्रश्नाः

**५.१.** अध्यायेऽस्मिन् आहत्य नव श्लोकाः वर्तन्ते । अध्यायेस्मिन् अत्यन्तं मुख्यः कर्मजीवभेदः वर्णितः । अत्र जातकस्य आजीविकायाः विषये वर्णनं दृश्यते । द्वादशभावेषु दशमं स्थानं कर्मस्थानमिति उच्यते । अतः दशमभावात् उद्योगस्य अर्थात् आजीविकायाः विचारः करणीयः। अध्यायेऽस्मिन् ग्रहाः स्वीय स्वभावानुगुणं कर्मस्थानसम्बन्धानुगुणञ्च कीदृशं व्यवसायं प्रयच्छन्ति इति विषये वर्ण्यते । अत्र रव्यादीनां ग्रहाणां व्यवसायाः क्रमशः प्रतिपाद्यन्ते ।

## ५.२. लक्षिताधिगमविशेषाः

* कर्मभावस्य अध्ययनोद्देश्यम् ।

* रव्यादीनां के व्यवसायाः भवन्तीति ज्ञानस्य सम्पादनम् ।

* जातकस्य आजीविकायाः निर्धारणम् ।

* आजीविकायाः प्राप्तिकालस्य ज्ञानोद्देश्यम् ।

* आजीविकाविचारः लग्नात् चन्द्रात् वा कथं करणीयः इति ज्ञापनस्योद्देश्यम् ।

## कर्मजीवभेदः

फलदीपिकाग्रन्थानुसारं जातकस्य आजीविकाविचारः लग्नात् चन्द्रात् वा क्रियते । लग्नचन्द्रयोर्मध्ये यः बलिष्ठो भवति ततः दशमभावात् आजीविकायाः अथवा धनागमस्य विचारः करणीयः । लग्नचन्द्रयोर्मध्ये यः बलिष्ठः भवति तस्मात् दशमभावस्थितग्रहवशात् धनलाभस्य चिन्तनं करणीयम् ।

| | | |
|---|---|---|
| दशमस्थः | रविश्चेत् | - पितृकारणात् |
| दशमस्थः | चन्द्रश्चेत् | - मातृवशात् |
| दशमस्थः | कुजश्चेत् | - शत्रुवशात् |
| दशमस्थः | बुधश्चेत् | - मित्रवशात् |
| दशमस्थः | गुरुश्चेत् | - भ्रातृवशात् |
| दशमस्थः | शुक्रश्चेत् | - स्त्रीवशात् |
| दशमस्थः | शनिश्चेत् | - भृत्यवशात् धनागमो जायते । |

लग्नचन्द्रयोर्मध्ये एकः यदि बलवान् भवति - तर्हि जातकः धनसुखसम्पन्नो जायते ।

लग्नात् चन्द्रात् वा दशमभावस्य यः स्वामी भवति सः ग्रहः यस्मिन नवांशे तिष्ठति तद्राशिपत्युक्तं व्यवसायं जातकः करोतीति ज्ञेयम् ।

**उदा** - लग्नात् चन्द्रात् वा दशभावाधिपः ग्रहः यदि मेषनवांशे तिष्ठति तस्याधिपतिकुजवत् जातकस्य व्यवसायः भवतीत्यर्थः । अत्राधुना क्रमशः रव्यादीनां व्यवसायाः उच्यन्ते ।

## ५.३.१. सूर्योक्ताः व्यवसायाः

दशमभावस्य अधिपः सूर्यनवांशगतो भवति चेत् जातकः फलवृक्षैः, मन्त्रजपादिभिः, द्यूतकर्मद्वारा, असत्यभाषणेन, औषध्यादिद्वारा, राजसेवया, धातुक्रियाद्वारा च स्वीयाजीविकां प्राप्नोति। तदुक्तं यथा --

**फलद्रुमैर्मन्त्रजपैश्च शाठ्याद्द्यूतानृतैः कम्बलभेषजाद्यैः ।**

**धातुक्रियाद्वा क्षितिपालपूज्याज्जीवयत्यसौ पङ्कजवल्लभांशे ।।** इति ।

## ५.१.२. चन्द्रोक्ताः व्यवसायाः

दशमाधिपतिः चन्द्रनवांशस्थितश्चेत् जातकः जलोद्भूतपदार्थानां क्रयविक्रयेण, तीर्थाटनद्वारा, कृषिक्रियाद्वारा वस्त्रादीनां व्यापारेण, स्त्रीसाहाय्येन च आजीविकां प्राप्नोति ।

## ५.१.३. भौमोक्ताः व्यवसायाः

दशमभावाधिपतिः यदि कुजनवांशे स्थितो भवति तर्हि जातकः धातुसम्बन्धिक्रियाद्वारा,

युद्धेन, सुवर्णाभूषणादीनां व्यापारेण सैनिको भूत्वा, भूव्यवहारेण, भोजननिर्माणादिकार्येण,म्लेच्छानां माध्यमेन,चोरवृत्त्या च धनार्जनं करोति ।

### ५.१.४. बुधोक्ताः व्यवसायाः

दशमाधिपो यदि बुधनवांशगतो भवति तर्हि काव्यरचनाद्वारा, आगमादिशास्त्राध्ययन-नाध्यापनद्वारा, लिपिलेखनादिकार्यद्वारा, ज्योतिश्शास्त्रद्वारा, पौरोहित्यादिवैदिकक्रियाद्वारा स्वीयमुद्योगं साधयति । तदुक्तं यथा --

**काव्यागमैर्लेखलिप्युपायैर्ज्यौतिर्गणिज्ञानवशाद्बुधांशे ।**

**परार्थवेदाध्ययनाज्जपाच्च पुरोहितव्याजवशात्प्रवृत्तिः ।।** इति ।

### ५.१.५. बृहस्पत्युक्ताः व्यवसायाः

आजीविकाप्रसङ्गे फलदीपिकाकारः कथयति यत् दशमभावाधिपतिः अर्थात् कर्माधिपतिः यदि गुरुनवांशे भवति तर्हि देवतानां माध्यमेन राजकृपया, पौराणिककथाव्याख्यानद्वारा, शास्त्राध्ययनद्वारा धर्मोपदेशेन कुसीदवृत्त्या च धनमार्जयति अर्थात् स्वीयजीवनं यापयतीत्यर्थः।

## स्वावलोकनप्रश्नः

**१. रविचन्द्रकुजानां व्यवसायान् लिखत ?**

## ५.१.६. शुक्रोक्ताः व्यवसायाः

कर्मभावपतिः शुक्रनवांशे स्यात् तदा कथमाजीविकाप्राप्तिरित्यत्र कथयति ग्रन्थकारः यथा -

**स्त्रीसंश्रयाद् गोमहिषीगजाश्वैस्तौर्यत्रिकैर्वा रजतैश्च गन्धैः ।**

**क्षीराद्यलङ्कारपटीपटाद्यैः शुक्रांशकेऽमात्यगुणैः कवित्वात् ।।** इति ।

अर्थात् सङ्गीतनृत्यादिललितकलासम्बद्धव्यवसायद्वारा अङ्गरागसुगन्धादिद्रव्याणां विक्रयद्वारा, शिल्पादिव्यवसायद्वारा स्वीयं जीवनं यापयतीत्यर्थः ।

## ५-१-७. शनेः व्यवसायाः

कर्माधिपो यदि शनिनवांशगतो भवति तर्हि जातकः भारवहनादिश्रमसाध्यकार्यकरणद्वारा, प्रेष्यकर्मद्वारा, कुत्सितवृत्त्या, कन्दमूलादीनां विक्रयद्वारा, नीचव्यक्तीनां साहाय्येन जीवति । अत्र ग्रन्थोक्तं प्रमाणं यथा --

**शन्यंशके मूलफलैः श्रमेण प्रेष्यैः खलैः नीचधनैः कुधान्यैः ।**

**भारोद्वहात्कुत्सितमार्गवृत्त्या शिल्पादिभिर्दारुमयैर्वधाद्यैः ।।** इति ।

## ५-१-८. लाभस्थानभेदः

कर्मभावस्य अधिपतिः यस्य राशेः नवांशे स्थितो भवति तद्राश्यधिपतिः बलवान् भवति चेत् पूर्वोक्तानि फलानि सिध्यन्ति । एवमेव नवांशेशः यदि दुर्बलः तर्हि पूर्वोक्तानि फलानि पूर्णतया न सङ्गच्छन्ते । लग्नात् दशमभावगतराशिः यस्यां दिशि भवति तस्यां दिशि व्यवसायः सफलो भवति । एतदुक्तं ग्रन्थकारेण यथा --

**अंशेशे बलवत्ययत्नधनसम्प्राप्तिं बलोतेंशपे**

**स्वल्पं प्राक्तफलं भवेदुदयतः कर्मक्षदेशे फलम् ।**

**अंशस्योक्तदिशं वदेत्पतियुते दृष्टे स्वदेशे फलं**

**सत्यन्यैः परदेशजं तदधिपस्यांशे स्वदेशे स्थिरे ।।** इति ।

# स्वावलोकनप्रश्नः

**२. गुरुशुक्रशनिग्रहोक्ताः व्यवसायाः के ?**

## ५.४. आदर्शप्रश्नाः

१. रविचन्द्रकुजोक्ताः व्यवसायाः के ? विशदयत।

२. बुधगुरुशुक्रोक्ताः व्यवसायाः के ? विशदयत।

३. शनेः व्यवसायान् लिखत।

# षष्ठः खण्डः
# राजयोगमहाराजयोगभेदाध्यायौ

## संरचना

६.१. प्रस्तावना

६.२. लक्षिताधिगमविशेषाः

६.३. पञ्चमहापुरुषयोगाः

६.४.१. चान्द्रयोगाः

६.४.२. चान्द्रयोगफलानि

६.५.१. सूर्यवशात् जायमानाः योगाः

६.६. केचन मुख्याः राजयोगाः

६.७. ग्रहाणां राजयोगकारकस्थितिः

६.८. नीचभङ्गराजयोगाः

६.९. आदर्शप्रश्नाः

## ६.१. प्रस्तावना

राजयोगाध्यायस्य अध्ययनात् प्राक् ज्ञातव्यं यत् को नाम योग इति। **योजयन्तीति योगाः** इति व्युत्पत्त्यनुसारं शरीरिणं सर्वविधप्रारब्धकर्मसु शुभाशुभफलयोजनमेव योगः इत्युक्तं प्रश्नमार्गकारेण यथा --

**ग्रहाणां स्थितिभेदेन पुरुषं योजयन्ति हि।**

**फलैः कर्मसमुद्भूतैरिति योगाः प्रकीर्तिताः।।** इति।

अत्रोच्यते यत् रव्यादिग्रहाणां तत्कालस्थितिभेदेन योगप्रकाराः ज्ञायन्ते । इदमेव योगनिर्वचनमिति। ज्योतिश्शास्त्रे सप्तविधसम्बन्धेन योगाः भवन्ति। यथा - १) स्थानसम्बन्धेन २) भावसम्बन्धेन ३) ग्रहयोगसम्बन्धेन ४) स्थान-भाव-ग्रहाणां सम्बन्धेन ५) स्थान-भावयोः सम्बन्धेन ६) भाव-ग्रहाणां च सम्बन्धेन ७) स्थान-ग्रहाणां च सम्बन्धेन ।

एवं सप्तविधसम्बन्धेन जातके शुभाशुभयोगाः भवन्ति। तत्र शुभयोगेषु अन्यतमाः भवन्ति राजयोगाः। जातके अत्युत्कृष्टग्रहस्थित्या योगेन वा राजयोगाः सम्भवन्ति। राजयोगजाताः धनिनः, राजानः, श्रेष्ठाः, प्रसिद्धाश्च भवन्ति। अध्यायेऽस्मिन् राजयोगानां महाराजयोगानां च विषये चर्चा क्रियते। अत्र ज्योतिश्शास्त्रे विद्यमानानां सर्वेषामपि प्रसिद्धानां राजयोगानां महाराजयोगानां च लक्षणानि फलसहितानि क्रमशः उपस्थाप्यन्ते।

## ६.२. लक्षिताधिगमविशेषाः

* पञ्चमहापुरुषयोगानां ज्ञानम्।
* चान्द्रयोगाः।
* चान्द्रयोगफलानां ज्ञानम्।
* सौरयोगः।
* केसरीयोगः।
* श्रीकण्ठ-श्रीनाथ-वसुमद्योगाः
* महाराजयोगाः।

## ६.३. पञ्चमहापुरुषयोगाः

राजयोगेषु पञ्चमहापुरुषयोगाः अत्यन्तं मुख्याः। एतेषु योगेषु उत्पन्नः अवश्यं राजा राजसमो वा जायते। एते महापुरुषयोगाः आहत्य पञ्च भवन्ति। कीदृशग्रहस्थितौ एतेषां योगानां सम्भवः? कदा च तेषां फलप्राप्तिकाल इत्येतेषां प्रश्नानां समाधानमग्रे प्रदीयते।

### योगलक्षणम्

रुचक - भद्र- हंस- मालव्य- शश इति एते पञ्चमहापुरुषयोगाः। कुजादिपञ्चताराग्रहाः क्रमशः एतेषां योगानां कारकाः भवन्ति। ग्रहस्थितिस्तावत् कीदृशी भवेदित्यत्रोच्यते। कुजादिपञ्चताराग्रहेषु यः कोऽपि ग्रहः स्वोच्चस्थाने अथवा स्वक्षेत्रे भूत्वा लग्नात् केन्द्रे भवति तर्हि तत्तद्ग्रहात्कः महापुरुषयोगः सम्भवति। पञ्चमहापुरुषयोगानां कारकाः सारण्या दर्श्यन्ते।

| **योगः** | **कारकाः** |
|---|---|
| रुचकः | कुजः |
| भद्रः | बुधः |
| हंसः | गुरुः |
| मालव्यः | शुक्रः |
| शशः | शनिः |

उक्तञ्च यथा --

**रुचकभद्रकहंसकमालवाः सशशका इति पञ्च च कीर्तिताः।**

**स्वभवनोच्चगतेषु चतुष्टये क्षितिसुतादिषु तान् क्रमशो वदेत्।।** इति।

महापुरुषयोगस्य एकमुदाहरणम् --




अत्र कुजस्योच्चस्थानं मकरराशिः। कुजः उच्चस्थानस्थितो भवति। कुजः लग्नात् केन्द्रेषु अन्यतमे दशमे स्थितत्वात् रुचकमहापुरुषयोगः सम्भवति। कुजस्य मेषवृश्चिकयोः अन्यतरस्थाने स्थितत्वादपि योगोऽयं सम्भवति। एवमेव अन्येषामपि ग्रहाणां ज्ञेयम्। अधुना महापुरुषयोगफलानि उच्यन्ते --

## ६.३.१. रुचकयोगफलम्

रुचकयोगे जातः दीर्घास्यः , शूरः, शक्तिमान्, गर्वोत्तमः, सद्गुणविख्यातः, विजयी, सेनापतिश्च जायते।

### ६.३.२. भद्रयोगफलम्

दीर्घजीवी, आचारवान् , निर्मलः, विद्वज्जनश्लाघितः, अतुलवैभवसम्पन्नः राजा भवति भद्रयोगे जातः।

### ६.३.३. हंसयोगफलम्

हंसयोगे जातः सज्जनैः प्रशंसितः राजा भवति। तस्य हस्ते पादे च शङ्खकमल - मत्स्याङ्कुशादीनां चिन्हानि भवन्ति। हंसयोगजातः सुन्दरः मिष्टान्नभोजी, धार्मिकश्च भवति।

### ६.३.४. मालव्ययोगफलम्

मालव्ययोगे जातः दृढनिश्चयः, धनवान्, स्त्रीपुत्रादिसौभाग्यसम्पन्नः, भोजनप्रियः, अनेकवाहनसम्पन्नः, यशस्वी राजा भवति। अयं विद्वान्, प्रसन्नमतिश्च भवति।

### ६.३.५. शशयोगफलम्

शशयोगे जातः सर्वजनैः प्रशंसितः, सुभृत्ययुक्तः, बलवान्, ग्रामाधिपः नृपो वा भवति। अयं कुटिलमतिः सौभाग्यशाली भवति।

एते पञ्चमहापुरुषयोगाः लग्नदुक्ताः चन्द्रादपि कदाचित् स्वीकर्तुं शक्यन्ते। अत्र प्रमाणमुपलभ्यते यथा – "**लग्नेन्द्वोरपि योगपञ्चकमिदं साम्राज्यसिद्धिप्रदम्**" इति। अत्रोच्यते यत् एते योगाः साम्राज्यसिद्धिप्रदा भवन्ति इति।

कस्यचित् जातके यदि एतेषु पञ्चमहापुरुषयोगेषु एकोऽपि योगः स्यात्तर्हि सः जातकः भाग्यवान् भवति। महापुरुषयोगद्वयं यदि कस्यचित् जातके दृश्यते तर्हि सः जातकः राजसमो भवति। त्रयः ग्रहाः यदि महापुरुषयोगकारकाः भवन्ति सः जातकः राजा भवति। चत्वारो ग्रहाः यदि योगकारकास्तर्हि जातकः साम्राट् भवति। तथैव यदि पञ्चापि ग्रहाः महापुरुषयोगकारकाः भवन्ति अर्थात् पञ्चमहापुरुषयोगाः जातके भवन्ति चेत् तर्हि सः समस्तस्य भूमण्डलस्य अधिपतिर्भवति इत्यत्र संशयलेशोपि नास्ति इति शास्त्रवचनम्।

### ६.४.१. चान्द्रयोगाः

चान्द्रयोगाः चन्द्रात् चिन्त्याः भवन्ति। अत्र चन्द्रलग्नस्यैव प्राधान्यमित्यतः एतेषां चान्द्रयोगाः इति प्रसिद्धिः। चान्द्रयोगेषु सुनफा - अनफा - दुरुधरा - केमद्रुम - इत्येते

चत्वारः योगाः मुख्याः प्रसिद्धाश्च। अधुनात्र कथं चतुर्णामेतेषां चान्द्रयोगानां सङ्गतिरिति जानीमः।

**६.४.१.१. सुनफायोगः** - चन्द्रात् द्वितीये रविभिन्ने ग्रहे स्थिते अर्थात् कुजादिपञ्चताराग्रहे स्थिते सुनफायोगसम्भवः।

**६.४.१.२. अनफायोगः** - चन्द्रात् द्वादशे रविभिन्ने ग्रहस्थिते अनफायोगसम्भवः।

**६.४.१.३. दुरुधरायोगः** - चन्द्रात् द्वितीये द्वादशे च रविभिन्नग्रहस्थित्या अर्थात् कुजादिपञ्चताराग्रहाणां चन्द्रात् द्वितीयद्वादश इत्युभयत्रापि स्थितिर्भवति तर्हि दुरुधरायोगः सम्भवति।

**६.४.१.४. केमद्रुमयोगः** - चन्द्रात् द्वितीयद्वादशे ग्रहाभावे अर्थात् जन्मराशितः द्वितीये द्वादशे च यदि न कोऽपि ग्रहः स्थितः। भवति तर्हि केमद्रुमयोगसम्भवः।

इत्येवंरीत्यात्र चान्द्रयोगाः प्रतिपादिताः। इतः परं चान्द्रयोगानां फलानि क्रमशः उपस्थाप्यन्ते।

## ६.४.२. चान्द्रयोगफलानि

अधुना पूर्वोक्तानां सुनफादियोगानां फलानि जानीमः। आधुनिकेऽस्मिन् युगे यः कोऽपि विषयः उच्यते अथवा अस्माभिरुपस्थाप्यते चेत् झटित्येव तस्य किं प्रयोजनमथवा फलमिति प्रश्नो जागर्ति। अतः अस्माभिः यत्किमपि उच्यते- तत् प्रमाणपुरस्सरं फलसहितं स्यादेव इति कृत्वैव अत्र योगानुक्त्वा तदनु फलान्यपि कथ्यन्ते। तत्रादौ-

### ६.४.२.१. सुनफायोगफलम्

सुनफायोगोत्पन्नः स्वार्जितधनेन वैभवसम्पन्नः राजा तत्समो वा जायते इति शास्त्रवचनम्।

### ६.४.२.२.अनफायोगफलम्

अनफायोगसम्पन्नः शक्तिमान् , स्वस्थः, शीलवान् विख्यातः, भौतिकसुखसम्पन्नः, प्रसन्नचित्तश्च भवतीति वाच्यम्।

### ६.४.२.३. दुरुधरायोगफलम्

दुरुधरायोगोत्पन्नः भोगसुखसौभाग्यवाहनादिसुखं प्राप्नोति। जाकतोऽयं त्यागी सत्कर्मचारिभिर्युक्तश्च भवति।

### ६.४.२.४. केमद्रुमयोगफलम्

केमद्रुमयोगजातः राजकुलोत्पन्नोऽपि मलिनः, नीचः, दासः, निर्धनश्च सञ्जायते।

फलकथनावसरे ग्रहाणां बलाबलं निरीक्ष्य एव निर्णयस्वीकरणं भवेदिति शास्त्र वचनम्। चान्द्रयोगानां उदाहरणानि सारण्या दर्शयन्ते --













## स्वावलोकनप्रश्नः

**१. सुनफायोगलक्षणं सफलं निरूपयत ?**

______________________________

______________________________

______________________________

______________________________

______________________________

# स्वावलोकनप्रश्नः

**२. पञ्चमहापुरुषयोगानां लक्षणानि लिखत ?**

## ६.५.१. सूर्यवशात् जायमानाः योगाः

एतावत्पर्यन्तं चान्द्रयोगाः तेषां स्वरूपं फलञ्च अस्माभिः सम्यगधिगतम्। अधुना सूर्यवशात् अर्थात् सूर्यं केन्द्रीकृत्य जायमानाः योगाः पठ्यन्ते। तत्रादौ वेसि-वासि-कर्तरि-उभयचरी-इत्यादियोगानां विचारः क्रियते।

### ६.५.१.१..शुभवेसियोगः

सूर्याधिष्ठतराशितः द्वितीये भावे यदि शुभग्रहाणां अर्थात् बुध-गुरु-शुक्राणां स्थितिः स्यात्तर्हि शुभवेसि योगस्सञ्जायते। अस्मिन् योगे जातः भाग्यवान् , धैर्यवान्, धार्मिकश्च राजा भवति।

### ६.५.१.२. शुभवासियोगः

सूर्याधिष्ठराशितः द्वादशे यदि शुभग्रहाणां स्थितिर्भवेत् तर्हि शुभवासियोगः सम्भवति। शुभवासियोगजातः विख्यातः, सर्वप्रियः, भाग्यवान्, दानवीरः, राजप्रियश्च भवति।

### ६.५.१.३. शुभोभयचारियोगः

सूर्याधिष्ठितराशितः द्वितीये द्वादशे च यदि शुभग्रहाणां स्थितिर्भवेत् तर्हि शुभोभयचारियोगो वाच्यः। योगेऽस्मिन् उत्पन्नस्तु सुन्दरः , प्रियवाकपटुः, वाचालः, यशस्वी, धनधान्यसम्पन्नश्च भवति।

### ६.५.१.४. अशुभवेसि- वासि-उभयचारियोगाः फलञ्च

सूर्यस्थितराशितः द्वितीये भावे पापग्रहौ अर्थात् शनिकुजौ यदि भवेतां तर्हि अशुभवेसियोगो वाच्यः। उभयोर्मध्ये एकः ग्रहः भवति चेदपि योगः भवेदेव।

सूर्यात् द्वादशे यदि पापग्रहस्थितिर्भति तर्हि अशुभवासि योगः सम्भति।

सूर्यात् द्वितीयद्वादशे यदि अशुभग्रहस्थितिश्चेत् तर्हि अशुभोभयचरीयोगः सम्भवति।

अशुभवेसियोगफलं तावत् इत्थं प्रदीयते।

अशुभवेसियोगजातः अन्यनिन्दकः, दुष्टः, निम्नस्तरीयव्यक्तीनां प्रियश्च भवति।

अशुभवासियोगजातः अन्यनिन्दकः, दुष्टैः मित्रैः युतः, दीनवृत्तियुतः, शास्त्रमर्मज्ञश्च भवति। अशुभोभयचरीयोगजातस्तु अपकीर्तिमान्, धनहीनः, विद्याविहीनः, भाग्यरहितश्च भवति।

### ६.५.१.५. शुभाशुभकर्तरीयोगफलम्

१. शुभकर्तरीयोगजातः निर्भयः, निरोगी, शत्रुरहितः, सुखी, धनैवैभवादिसुखसम्पन्नो भवति।

२. अशुभकर्तरीयोगोत्पन्नः निर्धनः, मलिनः, स्त्रीपुत्रादिरहितः अङ्गहीनश्च जायते।

## ६.६. केचन मुख्याः राजयोगाः

### ६.६.१. अमलायोगः

जन्मलग्नात् चन्द्रलग्नात् वा दशमभावे शुभग्रहयोगो भवति तदा अमला योगः सम्भवति। **फलम्** - अमलायोगे जातः आचारवान्, धर्मिकप्रवृत्तिमान् , प्रसन्नचित्तः, सौभाग्यवान्, मृदुस्वभावः, धनी, स्मितमृदुभाषणश्च भवति।

### ६.६.२. महाभाग्ययोगः

कस्यचित् पुरुषस्य जन्म यदि दिवा भवति तदानीं लग्नं, सूर्यः, चन्द्रमा इत्येते त्रयः अपि यदि विषम राशिषु भवति तर्हि महाभाग्ययोगः उत्पद्यते। स्त्रीणां विषये तु तद्विपरीततया अर्थात् स्त्रीणां यदि रात्रौ जन्म भवति लग्नचन्द्रसूर्याश्च विषमराशिगताः चेत् तर्हि महाभाग्ययोगः उत्पद्यते।

योगेऽस्मिन् जातः वाक्पटुः, उदारः, विख्यातः, राजसमः, सकलनयनानन्दजनकश्च भवति। यदि महाभाग्ययोगजाता कन्या चेत् सुचरित्रा, धनसुमाङ्गल्यसहिता, पुत्रपौत्रादिभिर्युक्ता सौभाग्यशालिनी च भवति।

### ६.६.३.केसरी योगः

जातके गुर्वधिष्ठतराशितः चतुर्थ- सप्तम-दशम स्थानेषु कुत्रचित् चन्द्रस्य स्थितिर्भवेत् तदानीं केसरियोगः सम्भवति। केसरियोगस्य गजकेसरियोग इत्यपि पर्यायः। **फलम्**-केसरीयोगजातः सिंह इव शत्रुनाश करोति। सः गम्भीरः, राजसवृत्तिसम्पन्नः , दीर्घजीवी अतियशाश्च भवति।

### ६.६.४. शकटयोगः

बृहस्पत्यधिष्ठितराशितः षष्ठे अष्टमे वा चन्द्रस्य स्थित्या शकटयोगः सम्भवति। परं तस्मिन्नेव जातके यदि चन्द्रः लग्नात् केन्द्रगतश्चेत् शकटयोगस्य भङ्गः भवति। **फलम्** -शकटयोगजातः कदाचित् भाग्यपरिच्युतः भवति। एवमेव कदाचित् पुनः भाग्यं विन्दति। शकटयोगजातः लोके अप्रसिद्धः सन् सामान्यजीवनं यापयति। मानसिकवेदनामनुभवन् सर्वदा दुःखी तिष्ठति।

### ६.६.५. अधम-सम-वरिष्ठयोगाः

रव्यधिष्ठितराशितः केन्द्रस्थानेषु चन्द्रस्थित्या अधमयोगः। रव्यधिष्ठितराशितः पणपरस्थानेषु चन्द्रस्थित्या समयोगः। रव्याधिष्ठितराशितः आपोक्लिमस्थानेषु चन्द्रस्थित्या वरिष्ठयोगः।

उदाहरणानि -

| | | | |
|---|---|---|---|
| | | | **चन्द्रः** |
| | **दिवाजन्म महाभाग्ययोगः** | | |
| | | | **रविः** |
| | | | |

| | | | |
|---|---|---|---|
| | | | |
| | **रात्रिजन्म महाभाग्ययोगः** | | **चन्द्रः** |
| | | | |
| | | | **रविः** |













## ६.६.६. वसुमत् -अमला-पुष्कलयोगलक्षणानि फलञ्च

### ६.६.६.१. वसुमद्योगः

लग्नात् चन्द्राद्वा उपचयस्थानेषु (३,६,१०,११) सर्वेऽपि शुभग्रहाः व्यवस्थिताः भवन्ति तदा वसुमत् नामको योगः उत्पद्यते। उदा -




* लग्नस्य स्थाने चन्द्रस्य स्थितिरपि योगमुत्पादयति।

**फलम्**- वसुमद्योगजातः धनधान्यसम्पन्नः, स्वगृहनिवासी च भवति।

### ६.६.६.२. अमलायोगलक्षणं फलञ्च

लग्नात् चन्द्राद्वा यदि दशमे भावे सर्वेऽपि शुभग्रहाः तिष्ठन्ति तर्हि अमलायोगः सम्पद्यते। **उदा** -

| | | | |
|---|---|---|---|
| **लग्नम्** | **चन्द्रः** | | |
| | **अमलायोगः** | | |
| | | | |
| **बु गु शु** | | | |

* चन्द्रादपि एवमेव चिन्तनीयम्।

**फलम्**- अमलायोगसमुत्पन्नः धनवैभवसम्पन्नः सत्पुत्रयुक्तः नीतिमान् यशस्वी भूपतिर्भवति।

### ६.६.६.३. पुष्कलयोगः

लग्नाधिपतिः राश्याधिपतिश्च स्वाधिमित्रस्थानेषु केन्द्रस्थानेषु वा व्यवस्थिता भवन्ति तथैव लग्ने शुभग्रहाणां दृष्टिः भवति चेत् पुष्कलयोगः सम्भवति।

ग्रन्थकारेण पुष्कलयोगस्य प्रकारद्वयमुच्यते। यथा --

१. लग्नेशः तथा चन्द्रराशीशः इत्येताभ्यां युतिः केन्द्रस्थाने स्यात्तथैव लग्नस्योपरि शुभग्रहाणां दृष्टिः अपि स्यात्तदानीं पुष्कलयोगो वाच्यः।

२. चन्द्रराशीशलग्नेशौ स्वीयाधिमित्रराशौ युतौ भवतः तथैव लग्नस्योपरि शुभग्रहदृष्टिश्च भवति तदानीं पुष्कलयोगो भवति।

| | | | |
|---|---|---|---|
| | | **लग्नम्** | **चन्द्रः** |
| | **पुष्कलयोगः** | | |
| | | | **बु शु** |
| | **बु शु** | | **गु** |

| | | | |
|---|---|---|---|
| | **र गु** | **बु** | |
| **शुक्रः** | **पुष्कलयोगः** | | |
| **शनिः** | | | **लग्नम्** |
| **चन्द्रः** | | | |

**६.६.६.३.१. पुष्कलयोगफलम्**

पुष्कलयोगे जातः राजश्रेष्ठः, धनसम्पन्नः, विख्यातः, बहुमूल्यवस्त्रालङ्कृतो सर्वोत्तमश्च राजा भवति।

**६.६.६.४. शुभमालायोगः**

पञ्चम-षष्ठ-सप्तमभावेषु सर्वेऽपि शुभग्रहाः पङ्क्त्या भवन्ति चेत् शुभमालायोगः सम्भवति।

**६.६.६.४.१. शुभमलायोगफलम्**

शुभमालायोगजातः उदारः, दानी, परोपकारी, सत्सुतसुदारयुतो राजा भवति।

**उदा -**

| | | | |
|---|---|---|---|
| | | | **लग्नम्** |
| | **शुभमालायोगः** | | |
| | | | |
| **शुक्रः** | **गुरुः** | **बुधः** | |

**६.६.६.५.अशुभमालायोगः**

शुभग्रहाः यदि षष्ठाष्टमद्वादशभावेषु स्थिताः भवन्ति तदा अशुभमालायोगः सम्भवति।
**फलम्** - कृतघ्नः, कुमार्गयुक्तः, कलहप्रियः, लोकनिन्दापात्रश्च भवति।

**उदा -**

| | | | |
|---|---|---|---|
| | | **शुक्रः** | **लग्नम्** |
| | **अशुभमालायोगः** | | |
| **बुधः** | | | |
| | **गुरुः** | | |

### ६.६.६.६. लक्ष्मीयोगः तत्फलञ्च

स्वक्षेत्रगतः स्वोच्चगतो वा शुक्रः तथा भाग्येशः यदि केन्द्रे त्रिकोणे वा स्थितश्चेत् लक्ष्मीयोगः। लक्ष्मीयोगजातः सुलक्षणः, धनी, लोकप्रियः श्रेष्ठश्च भवति।

**उदा** --

| | | | |
|---|---|---|---|
| | | | **लग्नम्** |
| | **लक्ष्मीयोगः** | | |
| | | | |
| | | **शु श** | |

### ६.६.६.७.गौरीयोगः तत्फलञ्च

स्वक्षेत्रगतः स्वोच्चगतो वा चन्द्रः केन्द्रे त्रिकोणे वा स्थितो यदि तर्हि गौरीयोगो वाच्यः। एतद्योगजातः सुन्दरः, राजप्रियः, सत्पुत्रवान् च भवति।

### ६.६.६.८. सरस्वतीयोगः तत्फलञ्च

गुरुशुक्रबुधाः केन्द्रे त्रिकोणे वा अथवा द्वितीयभावगताः वा भवेयुः। तेषु गुरुः स्वोच्चस्थानगतः मित्रक्षेत्रगतो वा बलवान् भवति चेत् तदा सरस्वतीयोगः सम्भवति। सरस्वतीयोगजातः बुद्धिशाली, गणितालङ्कारादिशास्त्रेषु निष्णातः, धनवान्, स्त्रीपुत्रादिसंयुक्तः श्रेष्ठो राजा भवति।

**उदा** --

| | | | |
|---|---|---|---|
| | | | |
| | **सरस्वतीयोगः** | | **गु बु शु** |
| | | | |
| | **लग्नम्** | | |

### ६.६.६.९. श्रीकण्ठयोगः फलञ्च

रवि-चन्द्र-लग्नेशाः स्वोच्चराशौ, स्वराशौ मित्रगृहे वा सन्तः लग्नात् केन्द्रे त्रिकोणे वा भवन्ति चेत् तदा श्रीकण्ठयोगसम्भवः। श्रीकण्ठयोगजातः रुद्राक्षाभरणः, विभूतिधवलः, अतिधार्मिकः, शैवसम्प्रदायनियमानां पालकः, निरन्तरं शिवाराधनतत्परश्च भवति।

**उदा -**

| | | | |
|---|---|---|---|
| | **लग्नम्** | | |
| | **श्रीकण्ठयोगः** | | **चन्द्रः** |
| **कुजः** | | | |
| **रविः** | | | |

### ६.६.६.१०. श्रीनाथविरिञ्चियोगौ

शुक्रबुधभाग्येशाः स्वोच्चस्थाः, स्वराशिगताः, मित्रगृहगताः वा भूत्वा लग्नात् केन्द्रे त्रिकोणे वा भवन्ति चेत् श्रीनाथयोगः। श्रीनाथयोगोक्तग्रहस्थितौ यदि रवि-गुरु-पञ्चमे भवन्ति तदा विरिञ्चियोगो वाच्यः। **फलम्** - श्रीनाथयोगोजातः धनसम्पन्नः, विष्णोः आधारकः, भाग्यवान् च भवति। विरिञ्चियोगजातस्तु ब्रह्मज्ञानी, बुद्धिमान्, वैदिकज्ञानसम्पन्नः, गुणवान् प्रसन्नचित्तश्च भवति।

### ६.६.६.११. राजयोग-शङ्खयोगौ

धर्मकर्माधिनेतारौ शुभस्थानगतौ चेत् राजयोगः सम्भवति। केन्द्रस्थानाधिपतिः त्रिकोणाधिपतिना सार्धं शुभस्थानगतश्चेत् शङ्खयोगः सम्भवति। राजयोगसमुत्पन्नः समस्तराजचिह्नयुक्तो राजा भवति। शङ्खयोगोत्पन्नः श्रेष्ठाभिः स्त्रीभिः सहितः अनेक सुखभोगयुक्तो जायते।

## ६.६.७. संख्यायोगाः

केषुचित् सप्तसु भावेषु सर्वे ग्रहाः स्थिता भवन्ति चेत् वीणानामकः योगः।

केषुचित् षट्सु भावेषु सर्वे ग्रहाः तिष्ठन्ति तदा दामयोगः।

केषुचित् पञ्चसु भावेषु सर्वे ग्रहाः तिष्ठन्ति तदा पाशयोगः।

केषुचित् चतुर्षु भावेषु सर्वे ग्रहाः तिष्ठन्ति तदा केदारयोगः।

केषुचित् त्रिषु भावेषु सर्वे ग्रहाः तिष्ठन्ति तदा शूलयोगः।

केषुचित् भावद्वयो एव सर्वे ग्रहाः स्थिता भवन्ति तदा युगयोगः।

एकस्मिन्नेव भावे सर्वे ग्रहाः स्थिता भवन्ति तदा गोलयोगः।

इत्येवं रीत्या वीणा, दाम, पाश, केदार, शूल, युग, गोल, इत्येते सप्तयोगाः संख्यायोगाः भवन्ति। पूर्वोक्तानां योगानामभावे एतेषां योगानां ग्रहणं कार्यमिति ग्रन्थकारस्य आशयः।

**६.६.७.१. सप्तसंख्यायोगानां फलानि**

१) वीणायोगजातः नृत्यसङ्गीतादिषु रक्तः धनसम्पन्नश्च भवति।

२) दामयोगजातः दानशूरः राजा भवति।

३) पाशयोगजातः शीलवान्, धनवान् बन्धुयुतश्च भवति।

४) केदारयोगजातः कृषिभूमियुक्तः धनसम्पन्नश्च भवति।

५) शूलयोगे जातः धनहीनः, क्रोधी, हिंसकश्च जायते।

६) युगयोगयुक्तः द्रव्यहीनः दुःखितश्च भवति।

७) गोलयोगजातस्तु नीचजनानुरक्तः, अल्पज्ञः, अलसः, अल्पायुश्च भवति।

## स्वावलोकनप्रश्नः

**२. संख्यायोगानां नामानि लक्षणं च लिखत ?**

## ६.६.८. अधियोगः तत्फलञ्च

सर्वेऽपि शुभग्रहाः लग्नात् चन्द्रात् वा सप्ताष्टमभावेषु व्यवस्थिताश्चेत् अधियोगः सम्भवति। अधियोगे उत्पन्नः, धनी, नेता, मन्त्री, विख्यातश्च भवति। इत्येवं रीत्यात्र राजयोगेषु मुख्याः प्रसिद्धाश्च योगाः चर्चिताः। अग्रे महाराजयोगाध्याये इतोऽपि केषाञ्चित् प्रसिद्धानां योगानां चर्चा विधास्यते।

## महाराजयोगभेदाः

## ६.७. ग्रहाणां राजयोगकारकस्थितिः

यदि उच्चस्थाः स्वराशिगता वा त्रयः ततोऽधिका वा ग्रहाः केन्द्रगाः स्युः तर्हि जातकः प्रसिद्धो राजा भवति। यदि ईदृशाः पञ्चग्रहाः केन्द्रस्थाः स्युः तर्हि इतरकुलोत्पन्नोऽपि जातकः गजतुरगादिसमूहेन युक्तो राजा भवति। यदि जातकः दुर्योगे उत्पन्नो न स्यात् तथा उक्तयोगकारको ग्रहः अस्तंगतो न स्यात् तर्हि राजकुलोत्पन्नो बालो राजा भवत्येव।

एक एव ग्रहो यदि नीचस्थो भूत्वा, सुस्थानेषु वक्रीभूत्वा, प्रखरैः किरणैर्युक्तः स्यात्तर्हि जातकः राजतुल्यं वैभवमाप्नोति। यदि जन्माङ्गे इत्थं ग्रहद्वयं स्यात्तर्हि जातकः राजा भवति। एवं स्थितौ अधिका ग्रहाः सन्ति चेत् जातकः किरीटच्छत्रचारमादिराजलक्षणान्वितो राजा भवति। तथाहि --

**यद्येकोऽपि दिशजितांशुनिकरः सुस्थानगो वक्रगो**

**नीचस्थोऽपि करोति भूपसदृशं द्वौ वा त्रयो वा ग्रहाः।**

**एवं चेज्जनयन्ति भूपतिममी शस्तांशराशिस्थिता-**

**स्तद्वच्चेद्बहवो नृपं समुकुटच्छत्रोल्लसच्चामरम्।।** इति।

ग्रहद्वयं ग्रहत्रयं वा यदि दिग्बलयुक्तं स्यात् तर्हि राजकुलोत्पन्नः जातकः राजा भवति। शन्यतिरिक्ताः पञ्च चत्वारो वा ग्रहाः दिग्बलयुक्ताः स्युश्चेत् सामान्यकुलोत्पन्नोऽपि जातको राजा भवति।

यदि लग्ने वर्गोत्तमनवांशः उदितः स्यात् चन्द्रो वा वर्गोत्तमनवांशे स्थितः स्यात् तथा इतरे चत्वारो ग्रहाः लग्नं पश्येयुः तर्हि नीचकुलोत्पन्नः जातकः अपि राजा भवति। तथाहि -

**गणोत्तमे लग्ननवांशकोद्गमे निशाकरश्चापि गणोत्तमेऽपि वा।**

**चतुर्ग्रहैश्चन्द्रविवर्जितैस्तदा निरीक्षितः स्यादधमोद्भवो नृपः।।** इति।

लग्नेशो यदि केन्द्रे नवमे वा स्थितो वर्गोत्तमनवांशे स्थितः स्यात्तथा नवमेशः उच्चस्थः स्वराशिगतो वा भूत्वा वर्गोत्तमनवांशे स्यात् तर्हि जातकः गजपृष्ठस्थहैमासनासीनः चामरयुगसम्भावितो राजा भवति।

प्रखरकिरणैर्युक्तश्चन्द्रः उच्चस्थेन स्वराशिगतेन वा दृष्टश्चेत् नीचकुलोत्पन्नोऽपि राजा भवति। यदि पूर्णकलाभिः किरणैश्च युक्तः चन्द्रः लग्नेतरकेन्द्रे स्थितो भवति तर्हि गजवाजिसेवितो राजा उत्पद्यते। लग्नस्थः शुक्रः अश्विनीस्थः त्रिभिः ग्रहैः दृष्टो भवति चेत् जातकः शत्रुञ्जयी राजा स्यात्। यदि लग्नेशः शुक्रेण युतो द्वितीयभावगतो भवेत् अथवा नीचराशिगतो न भवेत् तथा लग्नेशो बलवान् भवेत् तर्हि जातकः राजा भवति।

यदि मेषसिंहधनूराशिषु लग्नं स्यात्, लग्ने कुजः स्यात् मित्रग्रहैः दृष्टः स्यात्तर्हि जातकः राजा भवति। दशमेशः नवमे तथा नवमेशः दशमे चेत् प्रजाभिः प्रशस्तो राजा भवति। चन्द्रेण साकं सूर्यः धनुषो मध्यगतः, शनिः लग्नस्थः तथा बली कुजः उच्चस्थश्चेत् शत्रुदमनकारी प्रतापी राजा भवति। तथाहि ---

**चापार्धे भगवान् सहस्रकिरणस्तत्रैव ताराधिपोः**

**लग्ने भानुसुतेऽतिवीर्यसहितः स्वोच्चे च भूनन्दनः।**

**यद्येवं भवति क्षितेरधिपतिः संश्रुत्य दूरं भयात्**

**त्रस्ता एव नमन्ति तस्य रिपवो दग्धाः प्रतापाग्निना।।**

सुधाधवलबिम्बेन शोभितः चन्द्रः (पूर्णिमाचन्द्रः इत्यर्थः) यदि रवेर्नवांशे स्थितः स्यात् तथा पापग्रहैः युतः शुभग्रहः केन्द्रे स्यात् तर्हि जातकः राजा भवति। शत्रुराशिगतो नीचस्थो वा न भूत्वा त्रयः चत्वारो ग्रहाः सुधाधवलं चन्द्रं पश्यन्ति चेत् जातकः रिपुञ्जयी राजा भवति। यदि वर्गोत्तमांशस्थः चन्द्रः बलिना ग्रहेण दृष्टः तथा लग्ने पापग्रहः न स्यात्तर्हि जातकः सुन्दरकायः सार्वभौमिकः राजा भवति। बुध-जीव-चन्द्र-शुक्राः प्रखरकिरणैः युक्ताः नवमभावगताः स्युः अस्तंगताश्च न भवेयुः, मित्रग्रहैर्युताः दृष्टाः वा भवन्ति चेत् जातकः राजा भवति।

यदि शनि-गुरु-शुक्राः मीनराशौ, पूर्णचन्द्रः वृषभे मेषस्थो रविश्च कुजेन दृष्टश्चेत् जातकः राजा भवति। तस्य च महत्याः सेनायाः गमनेन उत्थितेन धूलिमण्डलेन सूर्यः अस्तंगत इव भाति तथा पद्मानि सङ्कुचितानि भवन्ति। तथाहि --

**शुक्रेद्वयौ सवितुः शिशुस्तिमियुगे स्वोच्चे च पूर्णः शशी**
**दृष्टस्तीव्रविलोचनेन दिनकृन्मेषोदयेऽसौ नृपः।**
**सेनायाश्चलनेन रेणुपटलैर्यस्य प्रविष्टे रवा-**
**वस्तभ्रान्तिसमाकुला कमलिनी सङ्कोचमागच्छति।।**

जातकस्य यदि रात्रौ जातस्य शुभाग्रहाः नीचस्थाः शत्रुग्रहस्थाश्च तृतीये षष्ठे एकादशे वा स्थिताः अथवा परमोच्चगताः प्रखरकिरणैर्युक्ताः केन्द्रस्थाः भवन्ति तथा चन्द्रः दशमभावस्थः चेत् जातकः त्रैलोक्याधिपतिः भवति। यदि पूर्णचन्द्रः वर्गोत्तमांशे स्थितः तर्हि जातकः यशस्वी, पराक्रमी राजा भवति। यदि चन्द्रः गुरुणा सह केन्द्रे स्यात् शुक्रेण दृष्टश्च स्यात्, कोऽपि ग्रहः नीचस्थो न स्यात् तर्हि जातकः राजा भवति।

यदि चन्द्रः जलचरराशौ तन्नवांशे वा स्थितः सन् लग्ने भवति, अथवा चन्द्रः शुभवर्गे स्ववर्गे वा स्थितः तथा केन्द्रः पापग्रहैः हीनः भवेत् तर्हि जातकः गजानां स्वामी प्रजाहितकरो राजा च भवति। तथाहि --

**जलचरराशिनवांशक इन्दुस्तनुभवने शुभदस्वकवर्गे।**
**अशुभकरः खलु कण्टकहीनो भवति नृपो बहुवारणनाथः।।** इति।

यदि शुक्रः गुरुणा दृष्टः स्यात् तर्हि राजकुलोत्पन्नो जातकः राजा भवति। मकरेतरराशिः लग्ने स्यात् तथा गुरुः लग्ने भवेत् चेत् जातकः मत्तगजनिकरयुक्तो राजा भवति। लग्नेशः जन्मराशीशो वा बली सन् केन्द्रगतश्चेत् जातको राजा भवति। बुधः गुरुणा दृष्टः चेत् राजाधिराजोऽपि जातकस्य वचः शृणोति। सः अतीव बुद्धिमान् भवति। तथाहि ---

**शुक्रो जीवनिरीक्षितो वितनुते भुपोद्भवं भूपतिं**
**देवेड्यो मृगभं विहाय तनुगो मत्तेभयुक्तं नृपम्।**
**केन्द्रे जन्मपतिर्बलाधिकयुतः कुर्याद् धरित्रीपतिं**
**दृष्टे वाक्पतिना बुधे दधति पृथ्वीशाश्च तच्छासनम्।।** इति।

जन्माङ्गे एको ग्रहः उच्चस्थः मित्रैर्दृष्टश्चेत् जातकः राजा भवति। उच्चस्थो ग्रहः मित्रग्रहैः युतश्चेत् जातकः धनाढ्यो भवति। रविः स्वनवांशे चन्द्रश्च स्वराशौ स्थितश्चेत् जातकः गजतुरगादिसमन्वितो राजा भवेत्। मीनराशिस्थः पूर्णचन्द्रः मित्रैर्दृष्टश्चेत् जातकः विश्वस्य आह्लादको राजा भवति।

पूर्णचन्द्रः उच्चस्थश्चेत् जातकः त्यागी सज्जनवन्दनीयः राजा भवति। चन्द्र यदि अधिमित्रस्य नवांशे स्थितः शुक्रेण पूर्णदृष्टः स्यात्तर्हि जातकः धनाढ्यो राजा भवति। एवं स्थितौ गुरुणा दृष्टः चन्द्रः पृथ्वीपतिर्भवति।

जन्मलग्नेशः राशीशो वा यत्र तिष्ठति ततः त्रि-षष्ठ-एकादशेषु पापग्रहः अस्ति चेत्,

द्वितीयभावः कुजेन युतश्चेत्,

चतुर्थे रविशुक्रौ स्तः चेत् तथा

दशमैकादशलग्नेषु यथाक्रमं कुजशनिगुरवः सन्ति चेत् जातको राजा भवति।

तथाहि --

**पापास्त्रिशत्रुभवगा यदि जन्मनाथा-**

**ल्लग्नोद्भवे कुजबुधौ हिबुकेऽर्कशुक्रौ।**

**कर्मायलग्नसहिताः कुजमन्दजीवा-**

**स्तज्ज्ञा वदन्ति चतुरस्त्विह राजयोगान्।।** इति।

नवमेश एकादशेशः द्वितीयेशः इतीमेषु एकः ग्रहः चन्द्रराशेः केन्द्रभावे स्थितः तदा एषु एकस्य स्वामी गुरुश्चेत् जातकः अखण्डसाम्राज्यस्य अधिपो भवति ।

## ६.८. नीचभङ्गराजयोगाः

जातकस्य जन्माङ्गे यो ग्रहः नीचस्थो भवेत्, तद्राशिनाथः अथवा तस्य ग्रहस्य उच्चराशिनाथः यदि चन्द्रलग्नात् केन्द्रे स्यात् तर्हि नीचग्रहस्य नीचताभङ्गो भवति। जातकः राजा धार्मिकचक्रवर्ती च भवति। तथाहि --

**नीचस्थितो जन्मनि यो ग्रहः स्यात्**

**तद्राशिनाथोऽपि तदुच्चनाथः।**

**स चन्द्रलग्नात् यदि केन्द्रवर्ती**

**राजा भवेद्धार्मिकचक्रवर्ती ।।** इति।

✵ यः ग्रहः नाचरीशगतः तद्राशिनाथः तस्य उच्चराशिनाथश्च यदि परस्परं केन्द्रगतः स्यात्तर्हि जातकः राजपूज्यः भवति।

✵ यः ग्रहः नीचराशिगतः स तद्राशिनाथेन दृष्टश्चेत् जातकः यशस्वी राजा भवति।

✵ नीचस्थो ग्रहः सुस्थाने स्थितः चेत् जातकः राजश्रेष्ठो भवति।

✵ ग्रहः नीचस्थः चेत् तद्राशीशः तदुच्चराशीशश्च जन्मलग्नात् जन्मराशेर्वा केन्द्रे स्याच्चेत् जातकः वैभवशाली, धार्मिकः, राजपूज्यः, यशस्वी, भाग्यवान्, चक्रवर्ती, राजा भवति।

✵ यो ग्रहः नीचस्थः तद्राशिनाथः तदुच्चनाथ इत्यनयोः एकः केन्द्रगश्चेत् जातकः राजा भवति।

## ६.९. आदर्शप्रश्नाः

१. पञ्चमहापुरुषयोगान् वर्णयत।

२. सुनफानफादुरुधरायोगान् वर्णयत।

३. गजकेसरीयोगलक्षणं सफलं निरूपयत।

४. अमलावसुमत्पुष्कलयोगलक्षणानि सफलानि वर्णयत।

५. संख्यायोगान् वर्णयत।

६. पञ्चमहाराजयोगान् वर्णयत।

७. नीयभङ्गराजयोगलक्षणं लिखत।

# सप्तमः खण्डः
# भावाश्रयफललग्नफलभेदाध्यायौ

## संरचना

७.१. प्रस्तावना

७.२. लक्षिताधिगमविशेषाः

७.३. लग्नादिभावगतसूर्यस्य फलविचारः

७.४. चन्द्रस्य विविधभावेषु स्थित्या जायमानफलानि

७.५. कुजस्य विविधभावेषु स्थितेः फलानि

७.६. विविधेषु भावेषु बुधस्य स्थितिफलानि

७.७. बृहस्पतेः विविधभावेषु स्थितेः फलानि

७.८. विविधभावेषु शुक्रस्य स्थितिफलानि

७.९. शनेः विविधभावेषु स्थितिफलानि

७.१०. राहोः भावफलविचारः

७.११. केतोः द्वादशभावफलविचारः

७.१२. द्वादशराशिषु लग्नस्य चन्द्रस्य वा स्थितिफलानि

७.१३. ग्रहाणाम् उच्यादिस्थितिवशात् फलानि

## ७.१. प्रस्तावना

ज्योतिश्शास्त्रे अध्यायोऽमत्यन्तं मुख्यो भवति। अत्र रव्यादिग्रहाणां द्वादशभावगतफलान्युच्यन्ते। द्वादशराशिषु लग्नस्य चन्द्रस्य वा स्थितिफलानि चात्र वर्ण्यन्ते। जातकदर्शनावसरे आदौ अस्माभिः दृश्यते यत् कः राशिः लग्नम्? रव्यादिग्रहाः केषु भावेषु वर्तन्ते? किं च तेषां फलं भवितुमर्हति? इति। सर्वेषामप्येतेषां प्रश्नानां समाधानम् पाठस्यास्य सम्यगध्ययनेन भवितुमर्हति।

## ७.२. लक्षिताधिगमविशेषाः

* लग्नादिद्वादशभावगतानां रव्यादिग्रहाणां फलं ज्ञातुं शक्नेति।

* राहोः केतोश्च लग्नादिभावफलानि ज्ञायन्ते।

* द्वादशराशिषु लग्नस्य चन्द्रस्य वा स्थित्या यानि फलानि भवन्ति तानि अवगच्छति।

* ग्रहाणाम् उच्च-स्वक्षेत्र-मित्र-नीच-शत्रुक्षेत्र - मूलत्रिकोणेषु च स्थितिवशात् जायमानानि फलानि अवगच्छति।

## ७.३. लग्नादिभावगतसूर्यस्य फलविचारः

७.३.१. प्रत्येकस्य ग्रहस्य विचारसमये तस्य स्थितिरपि गणनीया भवति। सः ग्रहः कस्मिन् भावे तिष्ठति इत्येतदनुसृत्य फलभेदः जायते। तादृशफलानामत्र विचारः क्रियते। तत्र प्रथमतया सूर्यस्य विविधभावाश्रितस्य फलानि विव्रियते।

७.३.२. **लग्नस्थसूर्यः** - यदि जातकस्य सूर्यः लग्ने स्थितः तर्हि जातकः अल्पकेशी, अलसः, क्रोधी, तेजस्वी, उन्नतः, कृशतनुः, मानी, शूरः, अक्षमः, मलिननेत्रः, तथा क्रूरमनाश्च भवति। **अयमत्र विशेषः** - कर्कमेषसिंहराशिषु अन्यतमं लग्नं भूत्वा तत्र सूर्यः यदि तिष्ठति तर्हि सः नेत्ररोगी भवति। एवमेव तुलालग्ने सूर्यः अस्ति तर्हि सः दरिद्रः पुत्रहीनश्च भवति। तदुक्तं - "**दारिद्र्योपहतो विनष्टतनयो जातस्तुलायां भवति**" इति।

७.३.३. **द्वितीयस्थसूर्यः** - द्वितीयभावे सूर्यः भवति चेत् जातक विद्याहीनः, निर्धनः, विनयरहितः तथा स्खलितवाक् च भवति।

७.३.४. **तृतीयस्थसूर्यः** - तृतीयभावगतसूर्यः जातकं शक्तिशालिनं, पराक्रमिणं, धनिकम्, उदारमनस्कं तथा स्वजनशत्रुञ्च कारयति।

७.३.५. **चतुर्थभावस्थसूर्यः** - चतुर्थस्थितसूर्येण जातकः स्वजनमित्रभूभवनादिरहितः राजसेवकः, पितृसम्पद्विनाशकश्च जायते।

७.३.६. **पञ्चमभावस्थसूर्यः** - यदा सूर्यः पञ्चमे तिष्ठति तदा जातकः सुखधनसन्तानहीनः, बुद्धिमान्, वनचारी च भवति।

**७.३.७. षष्ठभावे सूर्यः** - सूर्यः षष्ठभावस्थः चेत् जातकः विशालभूमण्डलस्य स्वामी, विजयी, गुणवान्, धनिकश्च भवति।

**७.३.८. सप्तमस्थः सूर्यः** - सप्तमस्थः सूर्यः जातकं राजविरोधिनं, विकृतशरीरयुतं यायावरं, तिरस्कृतं, स्त्रीसुखरहितञ्च कारयति।

**७.३.९. अष्टमभागवतः सूर्यः** - सूर्यस्य अष्टमभावस्थित्या जातकः धनहीनः, विकलनेत्रः अल्पायुश्च भवति।

**७.३.१०. नवमभावगतः सूर्यः** - जातकस्य नवमभावे सूर्यः वर्तते चेत् सः पितृहीनः, बन्धु-बान्धवसन्ततिसुखयुक्तः, देवब्राह्मणेष्वास्थावान् च भवति।

**७.३.११. दशमस्थसूर्यः** - दशमभावगतः सूर्यः जातकं सन्तानेन, वाहनेन, यशसा, बुद्ध्या, धनेन बलेन, च सम्पन्नं करोति।

**७.३.१२. एकादशभावस्थसूर्यः** - विनष्टशोकः राजा च भवति।

**७.३.१३. द्वादशभावस्थसूर्यः** - सूर्यः द्वादशस्थः चेत् जातकः पितृद्वेषी, नेत्ररोगी , धनसन्तानहीनश्च भवति।

## ७.४. चन्द्रस्य विविधभावेषु स्थित्या जायमानफलानि

**७.४.१. लग्ने चन्द्रः** - चन्द्रः यदि लग्ने भवति तर्हि जातकः दृढतनुः दीर्घायुः, निर्भयः, बलवान् तथा धनसम्पन्नश्च भवति। **अत्र विशेषः** - एतत्सर्वं बलवति चन्द्रे भवति। इत्युक्ते शुक्लपक्षीयः अथवा उच्चादिबलयुक्तः चेत्। अन्यथा तु एतस्य विपरीतमेव फलं भवति।

**७.४.२. द्वितीयभावे चन्द्रः** - चन्द्रः यदि द्वितीय भावे भवति तर्हि सः विद्वान्, मृदुभाषी, विषयसुखभोगी तथा विकलाङ्गश्च भवति।

**७.४.३. तृतीयभावे चन्द्रः** - तृतीयस्य चन्द्रेण जातकः मातृसुखयुक्तः, मदमत्तः, बलवान्, शूरः, अत्यन्तकृपणश्च जायते।

**७.४.४. चतुर्थे चन्द्रः** - चन्द्रः चतुर्थभावे वर्तते चेत् सः सर्वसुखयुतः, भोगलिप्तः, त्यागी , मित्रवाहनसुखयुतः, यशस्वी च भवति।

**७.४.५. पञ्चमभावे चन्द्रः** - पञ्चमस्थचन्द्रेण सत्पुत्रवान्, मेधावी, मन्दगामी, राज्यस्य मन्त्री च भवति।

**७.४.६. षष्ठभावे चन्द्रः** - चन्द्रः यदि षष्ठस्थः चेत् जातकः अल्पायुः मूर्खः, उदररोगपीडितः, मानहीनश्च भवति।

**७.४.७. सप्तमभावे चन्द्रः** - सप्तमे यदि चन्द्रः तर्हि रूपगुणयुतश्रेष्ठयुवतीनां प्रियः अत्यन्तसौभाग्यवान् च भवति।

**७.४.८.अष्टमभावे चन्द्रः** - यस्य अष्टमे चन्द्रः तिष्ठति सः रुग्णः, अल्पायुः च भवति।

**७.४.९. नवमभावे चन्द्रः** - नवमे चन्द्रः अस्ति चेत् सम्पन्नः, धर्मात्मा, सन्तानसुखी च भवति।

**७.४.१०. दशमभावस्थः चन्द्रः** - चन्द्रः यस्य दशमभावे तिष्ठति सः विजयी सिद्धकार्यः, शुभकार्ययुतः, सज्जनोपकारकश्च भवति।

**७.४.११. एकादशे चन्द्रः** - यदि चन्द्रः एकादशे तर्हि सः मनस्वी, दीर्घायुः, धनिकः, सन्तानयुक्तः, सेवकालंकृतश्च भवति।

**७.४.१२. द्वादशे चन्द्रः** - यस्य द्वादशे चन्द्रः अस्ति सः विद्वेषी. दुःखी, परास्तः, अत्यलसश्च भवति।

## ७.५. कुजस्य विविधभावेषु स्थितेः फलानि

**७.५.१.** एतावता अस्माभिः रविचन्द्रयोः विविधेषु भावेषु स्थित्या कानि फलानि भवन्तीति दुष्टम्। इदानीं विविध भावेषु स्थितः कुजः कथं फलानि यच्छतीति पश्यामः।

**७.५.२. लग्ने स्थितः कुजः** - जातकस्य शरीरे क्षतं कारयति तथा व्रणादिचिह्नितः भवति। सः जातकः अत्यन्तक्रूरः साहसी च भवति। यदि कुजः द्वितीये तिष्ठति तर्हि जातकः कुरूपः विद्याधनहीनः, दुर्जनाश्रितश्च भवति। तृतीयभावस्थितेन कुजेन जातकः गुणवान् , धनिकः , शूरवीरः, उद्धतः तथा सुखी च भवति, किन्तु तस्य सोदरः न भवति। यदि चतुर्थे भावे कुजः तर्हि सः स्वजनरहितः, मातृभूवाहनादि सुखरहितश्च भवति।

यस्य पञ्चमभावे भौमः सः शारीरिकसुखविहीनः निर्धनः, पिशुनः, अल्पधीश्च भवति। षष्ठभावगतेनकुजेन जातकः अतिकामी, धनसम्पन्नः विख्यातः, विजयी च भवति। मङ्गलः

सप्तमभावगतः चेत् जातकः रोगी, प्रवासी, अनुचितकरः मृतदारः, अटनश्च भवति। अष्टमस्थने कुजेन जातकः विकलाङ्गः , निर्धनः , अल्पायुः निन्दनीयश्च भवति। भौमः यदि नवमे भवति तर्हि जातकः राज्ञः मित्रं , निन्दितः, पितृरहितः, अपराधी च भवति। दशमगतेन भौमेन जातकः क्रूरमना, राजा, दानवीरः, प्रधानः, लोकप्रशंसितश्च भवति। एकादशतमे भावे भौमः यदि भवति तर्हि शोकहीनः, धनसुखी, शूरः, शीलवान् च भवति। द्वादशभावगतः कुजः चेत् जातकः नेत्ररोगी, निर्ममः, पत्नीरहितः, पिशुनश्च भवति। एवं विविधेषु भावेषु कुजस्य स्थितिफलं ज्ञातव्यम्।

## ७.६. विविधेषु भावेषु बुधस्य स्थितिफलानि

**७.६.१.** यस्य लग्ने बुधः वर्तते सः दीर्घायुः, वाक्पटुः, मधुरवचः, शास्त्रज्ञः च भवति। द्वितीय भावे यदि बुधः भवति तर्हि सः स्वबुद्ध्योपार्जितधनः, कविः, शुद्धवाची, मिष्टान्नभोजी च भवति। तृतीय भावे यदि बुधः भवति तर्हि जातकः शूरवीरः, मध्यायुः, सुसोदरयुतः, परिश्रमी, दीनः, दरिद्रश्च भवति। चतुर्थस्थाने बुधेन जातकः विद्वान् , चाटुवाक्, मित्रभूधनधान्यादि सुखयुतः च भवति। पञ्चमे बुधः भवति चेत् जातकः, विद्वान् सुखी, प्रतापी भवति तथा मन्त्रविद्यापारंगतः, बहुपुत्रवान् च भवति। षष्ठभावे यदि बुधः तिष्ठति तर्हि क्रोधी, विवादी, शत्रुञ्जयः, अलसः , कटुवाक् च भवति। सप्तमस्थः यदि बुधः तर्हि विद्वान्, सुन्दरवस्त्रयुतः महिमवान्, धनिकयुवत्याः भर्ता च भवति। बुधः अष्टमे तिष्ठति चेत् जातकः विख्यातः, चिरायुः , स्वकुलपालकः, दण्डनेता च भवति। नवमभावगतेन बुधेन जातकः धनविद्यासम्पूर्णः, आचारवान् , धार्मिकः, वाचालश्च भवति। बुधस्य दशमभावस्थित्या जातकः कार्यसाधकः, विद्याबलबुद्धिसुखसम्पन्नः, सत्कर्मकर्ता च भवति। यदि एकादशस्थः भवति बुधः तर्हि सः दीर्घायुः सत्यवादी, विपुलधनवैभवेन सेवकवृन्देन च सुखी भवति। द्वादशभावे यदि बुधः तर्हि जातकः दुःखी, विद्याहीनः, क्रूरः तिरस्कृतश्च भवति।

## ७.७. बृहस्पतेः विविधभावेषु स्थितेः फलानि

**७.७.१.** बुधस्य भावफलविचारानन्तरं गुरोः भावफलानि चर्च्यन्ते। यदि गुरुः लग्ने तिष्ठति तर्हि सः सुन्दरः, भाग्यशाली, निर्भयः, सन्ततिसुखयुतः च भवति। यदि गुरुः द्वितीये तिष्ठति तर्हि जातकः वाचालः, सुन्दरभोजनस्य प्रेमी, सुमुखः, धनसम्पन्नः, विद्वान् च भवति। यस्य

गुरुः तृतीये तिष्ठति तर्हि जातकः तिरस्कृतः कृपणः, ख्यातसहोदरयुक्तः, पापकर्मा, दुष्टबुद्धिश्च भवति। यस्य चतुर्थे गुरुः भवति तर्हि स्वजनपरिच्छदः स्त्रीपुत्रसुखी तथा धनधान्यसम्पन्नः च भवति। यदि गुरुः पञ्चमे तर्हि जातकः अलसः, शत्रुहन्ता, तिरस्कृतः, मन्त्राभिचारे पारंगतश्च भवति। षष्ठे यदि गुरुः तिष्ठति तर्हि पुत्रैः प्राप्तदुखः, बुद्धिमान्, मन्त्री च भवति। सप्तमे यदि गुरुः तिष्ठति तर्हि सुपत्नीपुत्रयुतः सुन्दरः, उदारमनस्कः च भवति। यस्य नवमभावे गुरुः वर्तते सः प्रसिद्धः, सचिवः, धनपुत्रादियुतः, धार्मिककार्योत्सुकः च भवति। यदि दशमे गुरुः तर्हि सदाचारी, निर्भयः, अल्पसुतः, वाहनयुतः च भवति। गुरुः द्वादशे यदि भवति तर्हि द्वेष्यः, धिक्कृतः, पुत्रहीनः, पापी, अलसः, सेवकः च भवति।

## स्वावलोकनप्रश्नः

**१. द्वादशभावेषु रवेः स्थितिफलानि विशदयत ?**

## ७.८. विविधभावेषु शुक्रस्य स्थितिफलानि

**७.८.१.** गुरोः भावफलज्ञानानन्तरं शुक्रस्य भावफलानि विचारयामि। लग्ने यदि शुक्रः भवति तर्हि सुन्दरः, आकर्षकव्यक्तित्ववान्, सुखी, दीर्घायुः च भवति। द्वितीये यदि शुक्रः

तर्हि कविः, धनी च भवति। यदा तृतीये भावे शुक्रः तिष्ठति तदा जातकः स्त्री - सुख-सम्पत्तिरहितः, पिशुनः, अप्रियः च भवति। चतुर्थे यदा शुक्रः भवति तदा जातकः वाहन-भवनाभूषणवस्त्रादियुतः भवति। पञ्चमे यदि शुक्रः भवति तर्हि अखण्डितधनी, राजा, सद्बुद्धियुक्तः, पुत्रवान् च भवति। षष्ठस्थेन शुक्रेण शत्रुरहितः, धनरहितः, स्त्रिया पीडितः च भवति। सप्तमे यदि शुक्रः तर्हि सुपत्नीयुतः तथापि अन्यस्त्रीरतः, धनी, मृतपत्नीकः च भवति। अष्टमे यदा शुक्रः भवति तर्हि दीर्घायुः, पृथ्वीपतिः, धनिकः च भवति। यस्य नवमे शुक्रः सः स्त्री-पुत्र-मित्रयुतः राजभाग्येन अभिवृद्धः च भवति। दशमस्थाने यस्य शुक्रः तिष्ठति सः बहुयशस्वी, बहुमित्रयुक्तः सुखवृत्तियुतः, प्रभुत्वयुतः अधिकारी च भवति। यदि शुक्रः एकादशे भवति तर्हि धनिकः अन्यस्त्रीरक्तः, अनेक सुखभोगी च भवति। द्वादशे शुक्रः तर्हि स्त्रीधनसुखयुतः भवति।

## ७.९. शनेः विविधभावेषु स्थितिफलानि

**७.९.१.** शुक्रस्य भावफलज्ञानात् परं शनेः विचारः क्रियते। यस्य लग्ने शनिः उच्चः अथवा स्वक्षेत्री चेत् सः राजा, राजतुल्यः अथवा देशपतिः भवति। ततोऽन्यत्र शनिः तिष्ठति तर्हि सः दुःखितः, पीडितः, दरिद्रः, अलसः, मलिनश्च भवति। द्वितीये यस्य शनिः वर्तते सः दुर्मुखः, धनरहितः, न्यायविहीनः, स्थानान्तरे सुखी च भवति। तृतीये शनिः यस्य सः बुद्धिमान् , उदारः, स्त्रीसुखयुतः, ईषदलसः च रोगपीडितः च भवति। यदि शनिः चतुर्थे तर्हि दुःखितः, गृहवाहनसुखरहितः, बाल्यो रोगपीडितः च भवति। यदि शनिः पञ्चमे तिष्ठति तर्हि सः भ्रान्तः विद्यापुत्रार्थसुखदरिद्रः, पापी च भवति। यदि शनिः षष्ठे भवति तर्हि बहुभाषी, धनी, शत्रुपीडितः, दुष्टः, अहंकारी च भवति। सप्तमे यदि शनिः भवति तर्हि कुदारयुतः, दरिद्रः, पापी च भवति। अष्टमे यस्य शनिः सः मलिनः, अर्शपीडितः, धनरहितः विकृतबुद्धिः, मित्ररहितः, बुभुक्षितश्च भवति। यस्य शनिः नवमे तिष्ठति सः भाग्यपुत्रधनपिताधर्मादिरहितः, दुर्जनः भवति। दशमे यस्य शनिः सः मन्त्री, धनी, कृषकः प्रसिद्धश्च भवति। यस्य एकादशे शनिः सः दीर्घायुः, स्थिरसम्पत्तिसहितः, शूरः , रोगरहितः च भवति। द्वादशे शनिः चेत् सः निर्लज्जः, पुत्ररहितः, विकलाङ्गः, मूर्खः, शत्रुपीडितः च भवति। एवं शनेः फलविचारः अवसितः।

## ७.१०. राहोः भावफलविचारः

**७.१०.१.** पञ्चताराग्रहाणां भावफलविचारानन्तरं तमोग्रहेष्वन्यतमस्य राहोः भावफलविचारः प्रस्तूयतेऽत्र। लग्ने यस्य राहुः सः अल्पायुः, धनिकः, बलवान् च भवति। द्वितीये राहुः तिष्ठति तर्हि खण्डितवाणी, मुखरोगी, घृणितः, क्रोधी, गणधनी च भवति। तृतीयभावे राहु अस्ति चेत् स्वाभिमानी, सोदरद्वेषी, दृढमतिः, दीर्घायुः, धनी च भवति। यस्य चतुर्थे राहुः सः मूर्खः, दुःखी, मित्रयुतः, अल्पायुः च भवति। पञ्चमे यस्य राहुः सः अनुनासिकवचनः, पुत्ररहितः, कठिनहृदयः, उदररोगी च भवति। षष्ठे राहुः तिष्ठति चेत् गुदरोगी भवति। यस्य राहुः सप्तमे भवति सः स्त्रीसङ्गात् निर्धनः, विधुरः, वीर्यदोषयुतः, अल्पबुद्धिः, स्वतन्त्रश्च भवति। अष्टमे यदि भवति राहुः तर्हि अल्पायुः, अपवित्रः, रोगी, विकलाङ्गः, अल्पसुतश्च भवति। नवमे यस्य राहुः सः प्रतिकूलवाक्, ग्रामाग्रणी, पुण्यवान् च भवति। दशमे यस्य राहुः सः प्रसिद्धः , अल्पपुत्रः, अन्यकार्यरतः, सकर्मरहितः, निर्भयश्च भवति। यस्यैकादशे राहुः सः श्रीमान्, पुत्रवान्, दीर्घायुः, कर्णरोगपीडितश्च भवति। द्वादशे राहुः अस्ति चेत् प्रच्छन्नयापः , बहुव्ययी, जलोत्पन्नरोगपीडितः च भवति।

## ७.११. केतोः द्वादशभावफलविचारः

**७.११.१.** लग्ने यदि केतुः तर्हि कृतघ्नः, कृपणः, विवर्णः, स्थानभ्रष्टः, विकलशरीरः, असज्जनसङ्गयुतश्च भवति। द्वितीये चेत् केतुः विद्याधनरहितः, अपशब्दभाषी, कुदृष्टियुतः, परान्नपोषितश्च भवति। तृतीये केतु अस्ति चेत् आयुष्मान् धनयशस्त्रीभोजनयुतः, सोदररहितश्च भवति। चतुर्थे केतुः तिष्ठति चेत् भूक्षेत्रयानजननीसुखवञ्चितः, परगृहवासी च भवति। यस्य पञ्चमे केतुः तस्य पुत्रक्षयं भवति। उदरपीडा, भूतपीडा, दुष्टस्वभावश्च भवति। यस्य षष्ठे केतुः चेत् उदारः, प्रसिद्धः, प्रभुः, शत्रुहन्ता, सफलश्च भवति। यस्य सप्तमे केतुः सः अपमानितः, अन्यस्त्रीरतः, आन्त्ररोगी, स्वदारवियुक्तः, च भवति। अष्टमस्थकेतुना अल्पायुः, इष्टवस्तुवियोगः, कलहप्रियः, शस्त्रक्षतः, सर्वत्र विघ्नवान् च भवति। नवमस्थेन केतुना जातकः पापकार्यनिरतः, तेजोमयव्यक्तित्ववान् सफलश्च भवति। यस्यैकादशे केतुः सः सञ्चितधनः, गुणवान्, भोगी, सफलश्च भवति। यदि द्वादशे भवति केतुः तर्हि प्रच्छन्नपापः, अपत्यययुतः, विरुद्धः, नेत्ररोगी च भवति।

अयमत्र विशेषः - **“शनिवद्राहुः कुजवत् केतुः फलदाने स्यादिह संप्रोक्तः”** इति प्रमाणेन शनेः इव भावफलानि राहोः कुजस्य इव भावफलानि केतोः इति ज्ञातव्यम्। तथैव भावसन्धौ ग्रहाः फलानि न यच्छन्ति। भावस्पष्टे एव तानि फलदायकानि। भावस्पष्टं ज्ञातुं लग्नस्पष्टात् प्रत्येकस्य राशेः योजनं करणीयम्। एवं विविधग्रहाणां विविधभावफलानि दृष्टानि। एतदनन्तरं विविधराशयः लग्नं भवति चेत् तेषां फलानि कानीति पश्यामः।

## ७.१२. द्वादशराशिषु लग्नस्य चन्द्रस्य वा स्थितिफलानि

**७.१२.१.** मेषराशौ लग्नमथवा चन्द्रमा भवति चेत् मनुष्यः वृत्तेक्षणः दुर्बलजानुः, उग्रस्वभावः, जलात् भीतः, लघुभुक्, कामसक्तः संचारशीलः चपलः, अनृतभाषी, व्रणाङ्किताङ्गश्च भवति।

**७.१२.२.** वृषभराशौ लग्नमथवा चन्द्रः भवति चेत् पुरुषः पृथूरुवक्त्रः, कृषिकर्मकर्ता, मध्यावस्थायां वृद्धावस्थायां च सुखी, स्त्रीप्रियः, दानशीलः, सहनशीलः, क्षमी, पशुधनयुक्तः, मुखे पृष्ठे वा व्रणाङ्किताङ्गश्च भवति।

**७.१२.३.** मिथुने लग्नमथवा चन्द्रः स्थितश्चेत् तद्वशात् मनुष्यः श्यामेक्षणः, कुचितमूर्धजः, स्त्रीक्रीडानुरागी, परेङ्गितज्ञः, उत्तुङ्गनासः, प्रियगीतनत्यः, सर्वत्र एकान्तप्रियः, न्यूनमित्रश्च भवति।

**७.१२.४.** कर्काटकराशौ लग्नस्य चन्द्रस्य वा स्थितौ सत्यां जातकः स्त्रीवशीभूतः, पीनगलः, समित्रः, बह्वालयः, तुङ्गकटिः, धनाढ्यः, ह्रस्वः, वक्रः, द्रुतगः, बुद्धिमान् , जलप्रियः, तथा अल्पपुत्रः भवति।

**७.१२.५.** सिंहराशौ लग्नमथवा चन्द्रः विद्यते चेत् सः जातक पिङ्गेक्षणः, स्थूलहनुः, विशालवक्त्रः अभिमानी, पराक्रमी भवति तथैव अयं विना कारणमपि कुप्यमानः, वनशैलगामी मातुर्विधेयः, स्थिरबुद्धियुक्तश्च भवति।

**७.१२.६.** कन्याराशौ लग्नमथवा चन्द्रः अस्ति चेत् अन्येभ्यः प्राप्तधनसत्कारः, सत्यप्रियः, प्रियभाषी, क्रीडालसाक्षः, सुखप्रियः, शास्त्रार्थज्ञाता,अप्लपुत्रश्च भवति।

**७.१२.७.** तुलाराशौ लग्नस्य चन्द्रस्य वा स्थितौ कीदृशोऽयं जातकः स्यादिति पृच्छायां ब्रवीति फलदीपिकाकारः -

> "**चलत्कृशांगोऽल्पसुतोऽतिभक्तो देवद्विनामटनो द्विनामा ।**
> **प्रांशुश्च दक्षः क्रयविक्रयेषु धीरोऽदयस्तौलिनि मध्यवादी**" ।

अस्यायमर्थः भवति यत् जातकः चपलः कृशाङ्गः, अल्पसुतः, देवद्विजानां भक्तः, द्विनामा प्रांशुश्च भवति तथैव क्रयविक्रयेषु चतुरः, धीरः, निर्दयः तथा मध्यवादी च भवति।

**७.१२.८.** वृश्चिकराशौ लग्नमथवा चन्द्रः स्थितश्चेत् मनुष्यः वृत्तोरुजङ्घः, पृथुनेत्रवक्षाः, बाल्ये रुग्णः, गुरुतातहीनः, क्रूरकर्मा, राजकुलाभिमुख्यः, पङ्कजरेखाङ्कितपाणिपादश्च भवतीति फलदीपिकाकारः कथयति।

**७.१२.९.** धनूराशौ लग्नस्य चन्द्रस्य वा विद्यमानत्वे जातकः दीर्घकण्ठः, पृथुकर्णनासः, कर्मोद्यतः, कुब्जतनुर्नपेषः, प्रगल्भवाक्, त्यागशीलः, अरिहन्ता, प्रेम्णा वशीकर्तुं साध्यः, बलाढ्यश्च भवति।

**७.१२.१०.** मकरराशौ लग्नमथवा चन्द्रः भवति चेत् जातकस्य स्थितिः कथं स्यात् इति जिज्ञासायामुपदिशति ग्रन्थकर्ता "**अधः कृशः सत्वयुतो**" इत्यादिना यत् सः जातकः अधः कृशः, मनोबलयुक्तः, ग्रहणधारणपटुः, अलसः, अगम्यः, जरांगनेष्टः, धार्मिककार्येषु अग्रगण्यः, भाग्ययुतो, भ्रमणशीलः वातार्दितो, नक्रभवः, लज्जायुक्तश्च भवति इति।

**७.१२.११.** कुम्भराशौ लग्नस्य चन्द्रस्य विद्यमानत्वे जायमानः जातकः प्रच्छन्नपापी, घटतुल्यदेहः, विघातः, अध्वसहः, अल्पवित्तः, लोभयुक्तः, परार्थी, जीवने व्ययवृद्धियुक्तश्च भवति तथा गन्धपुष्पादिषु अस्य रुचिः भवति इति।

**७.१२.१२.** मीनराशौ लग्नमथवा चन्द्रः स्थितः भवति चेत् जातकस्य स्थितिः कीदृशी भवति इति फलदीपिकाकारः कथयति अत्यम्बुपानः इत्यनेन श्लोकेन । अयं जातक अत्यम्बुपानः भवति तस्य शरीरं समरूपं सुन्दरञ्च भवति, स्वपत्न्या साकं रतिप्रियः जलमाध्यमेनैव प्राप्तवित्तः, विद्वान्, कृतज्ञः, शत्रुं जेतुं समर्थो भवति। तथैव अयं शुभेक्षणः भाग्यशाली च

भवतिः। एवं रूपेण द्वादशराशिषु लग्नस्य चन्द्रस्य वा स्थितौ जातकस्य स्वरूपं फलदीपिकाकारः रचयामास।

**राशेः स्वभावाश्रयरूपवर्णान् ज्ञात्वानुरूपाणि फलानि तस्य युक्त्या वेदत्रयफलं विलग्ने यच्चन्द्रलग्नेऽपि तदेव वाच्यम्**।। इति फलदीपिकाकारेण उक्तत्वात् ज्ञायते अस्माभिः यत् लग्नविषयकफलान्येव चन्द्रराशिविचारे योजनीयानीति।

## ७.१३. ग्रहाणाम् उच्यादिस्थितिवशात् फलानि

**७.१३.१.** ग्रहाणां भावस्थित्यनुसारं फलानि विचारितानि। इदानीं ग्रहाणाम् उच्चादि स्थानवशात् फलविचारः कुर्मः। यः ग्रहः उच्चराशिगतः सः स्वभावस्य अभिवृद्धिं कारयति। तेन जातकः राजा, भूपतिः, राज्ञा पूजितः, सम्पन्नः , उदारः, गुणी च भवति। सः नीतिमान् , यशस्वी, पराक्रमी, दानी च भवति। स्वस्थानगतः ग्रहः चेत् राजादिसहाय्यात् सः उन्नतः भवति। सः उच्चस्थितिं, सुखं, प्रतिष्ठां, भूमिं च प्राप्नोति। नष्टसुखानामपि प्राप्तिः तस्य भवति। ग्रहः यदि सुहृत्क्षेत्रगतः तर्हि मित्रसाहाय्येन कार्यसिद्धिः भवति। नूतनमित्राणां प्राप्तिः, योग्यपुत्रः, भाग्यं, सर्वेषामानुकूल्यञ्च प्राप्नोति। यदि ग्रहः शत्रुक्षेत्रगतः तर्हि सः परान्नभुक्, परगेहवासी, दीनः, शत्रुपीडितः च भवति। यदि ग्रहः नीचः तर्हिः सः प्रतिष्ठातः पतितः, नीचकार्यरतः, दीनः, दुराचारी, नीचाश्रितः, च भवति। समराशिगतेन फले न कोऽपि भेदः। अस्तंगतेन ग्रहेण शीघ्रनिधनं , धनपुत्रादिनाशः च भवति। यदि ग्रहः वक्रः तर्हि उच्चवत् फलानि वक्तव्यानि। यदि वर्गोत्तमः तर्हि स्वक्षेत्रवत् फलानि वक्तव्यानि।

## स्वावलोकनप्रश्नः

**२. द्वादशराशिषु लग्नस्य चन्द्रस्य वा स्थितिफलानि विशदयत ?**

### ७.१४. आदर्शप्रश्नाः

१. द्वादशराशिषु लग्नस्य चन्द्रस्य वा स्थितिफलानि वर्णयत।

२. ग्रहाणाम् उच्चादिस्थितिवशात् कीदृशानि फलानि भवन्तीति वर्णयत।

३. लग्नादिभावगतसूर्यस्य फलं विशदयत।

४. लग्नादिभावगतचन्द्र-कुज-बुध-गुरूणां फलं निरूपयत।

५. लग्नादिभावगतशुक्र-शनि-राहु-केतूनां फलं विशदयत।

# अष्टमः खण्डः
# सप्तमभावफलस्त्रीजातकफलभेदाध्यायौ

## संरचना

८.१. प्रस्तावना
८.२.लक्षिताधिगमविशेषाः
८.३. स्त्रीविनाशकयोगाः
८.४. स्त्रीसंख्या तथा विवाहदिशा - समयादिविचारः
८.५. स्त्रीजातकेष्वशुभयोगाः
९.६. स्त्रीजातके शुभयोगाः
९.७. त्रिंशांशेन स्वभावपरिज्ञानम्
९.८. गर्भाधानविचारः
९.९. आदर्शप्रश्नाः

## ८.१. प्रस्तावना

सप्तमभावस्य पत्नीभाव इति पर्यायपदम्। अतः सप्तमभावात् स्त्रीविचारः क्रियते। मम विवाहः कदा भवति? मनोऽनुकूला पत्नी लभ्यते न वा? कस्यां दिशि मम विवाहः भवेत्? तस्याः स्वभावः कथं स्यात्? इत्यादयः अनेके प्रश्नाः विवाहवयसि सर्वेषामपि मनसि आयान्ति। उपर्युक्ताः प्रश्नाः स्त्रीणामपि मनस्सु जायन्ते। एतेषां सर्वेषामपि प्रश्नानां समाधानमस्ति ज्योतिश्शास्त्रे। एते एव विषयाः अध्यायेस्मिन् चर्चिताः सन्ति। ग्रन्थेऽस्मिन् स्त्रीचिन्ताविषयकः अध्यायः प्रदत्तः इत्यस्मात् अन्येषु सर्वेष्वपि अध्यायेषु पुरुषानुद्दिश्य एव सर्वे योगाः विषयाश्च प्रकीर्तिताः इति कदाचित् सन्देहः स्यात्। परन्तु ते सर्वेऽपि योगाः स्त्रीणामपि फलदायकाः एव। विशिष्यात्र स्त्रीजातकचिन्तनस्याध्यायः किमर्थं कृतः इत्यत्रोच्यते। गर्भसम्भवः, शारीरसौन्दर्यम्, सौभाग्यम्, लावण्यमित्यादि विचाराणां विशदतया चर्चार्थमेव स्त्रीजातकभेदाध्यायः लिख्यते सर्वैः अपि ग्रन्थकारैः। अतोऽत्र सप्तमभावस्य स्त्रीजातकभेदस्य च विशदतया वर्णनं क्रियते।

## ८.२.लक्षिताधिगमविशेषाः

* स्त्रीविशानकयोगज्ञानं सम्पादयति।
* स्त्रीणां संख्याविषयकयोगानां ज्ञानं प्राप्नुवन्ति।
* कस्यां दिशि विवाहः विवाहसमयश्च कः इत्येते विचाराः ज्ञायन्ते।
* स्त्रीजातकेषु विद्यामानानाम् अशुभयोगानां ज्ञानं सम्भवति।
* स्त्रीजातके विद्यमानानां शुभयोगानां ज्ञानप्राप्तिः।
* गर्भाधानविचारं ज्ञास्यति।
* त्रिंशांशवशात् स्त्रीणां स्वभावपरिज्ञानं कथमिति ज्ञायते।

## ८.३. स्त्रीविनाशकयोगाः

**८.३.१.** एतावता अस्माभिः विविधभावानां ग्रहाणां विषये फलचिन्ता सामान्यतः कृता। इतः परं विशेषभावनामत्र विशेषचिन्ताः विचारयामः। तत्र प्रथमतया सप्तमभावस्य चिन्ता क्रियते। तदनुबन्धतया स्त्रीजातकस्यापि विचारः भवति।

**८.३.२.** लग्नात् चन्द्रात् वा पञ्चमसप्तमेशौ शुभयुक्तौ चेत् पत्नीसुतयोः शुभफलानि भवन्ति। तद्विपरीते इत्युक्ते पापयुक्तौ पापदृष्टौ वा अशुभफलानि भवन्तीति तु सामान्यतः नियमः।

**८.३.३.** शुक्रात् चतुर्थे अष्टमे व्यये (द्वादशे) वा पापग्रहाः भवन्ति अथवा शुक्रः पापग्रहाणां मध्ये तिष्ठति अथवा शुक्रे पापदृष्टि पापयोगो वा अस्ति चेत् पत्न्याः नाशः भवति।

**९.३.४.** सप्तमेशः यदि पञ्चमे तिष्ठति तर्हि तस्य स्त्री अल्पायुः भवति अथवा सन्तानरहिता भवति।

**८.३.५.** पञ्चमेशः सप्तमे अथवा अष्टमेशः सप्तमे अस्ति चेत् पत्न्याः हानिः वक्तव्या।

**८.३.६.** पञ्चमे क्षीणचन्द्रः लग्न-सप्तम-द्वादशेषु पापग्रहः च भवति चेत् पत्नीपुत्रयोः हानिः भवति।

**८.३.७.** सप्तमे राहुः अथवा सूर्यः अस्ति चेत् स्त्रिया धननाशः भवति।

**८.३.८.** सप्तमं वृश्चिकं भूत्वा तत्र शुक्रः तिष्ठति चेत् स्त्रीनाशः।

८.३.९. सप्तमं वृषभः तत्र बुधः वर्तते चेदपि स्त्रीनाशः भवति।

८.३.१०. नीचः गुरुः सप्तमे अस्ति चेत् पत्नीवियोगः भवति।

८.३.११. सप्तमे शनिः अथवा कुजः अस्ति चेत् पत्नी अल्पायुषी भवति।

८.३.१२. सप्तमभावः अथवा सप्तमेशः पापयुतः अथवा पापदृष्टः अथवा पापमध्यः भवति अथवा सप्तमेशः नीचगतः, शत्रुक्षेत्रस्थः अस्तंगतो वा अस्ति चेत् कलत्रच्युतिः भवति।

८.३.१३. पञ्चमसप्तमनवमभावेषु पापयुतः शुक्रः अस्ति चेत् पत्नी रुग्णा भवति।

८.३.१४. शुक्रः यदि कुजस्य अथवा शनेः वर्गे तिष्ठति तथा तैः दृष्टश्च भवति तर्हि जातकः परस्त्रीरतः भवति।

८.३.१५. चन्द्रात् शुक्राद्वा सप्तमे कुजः अथवा शनिः अस्ति चेत् सः स्त्रीरहितः पुत्ररहितश्च भवति।

८.३.१६. सप्तमे नपुंसकग्रहः अस्ति चेत् पत्नीरहितः भवति।

८.३.१७. द्वितीयसप्तमौ पापयुतौ अथवा पापदृष्टौ चेत् पत्नीसुखं न भवति।

८.३.१८. स्त्रीजातके सप्तमाष्टमयोः पापयोगः दृष्टिः वा अस्ति चेत् पतिनाशः वक्तव्यः।

८.३.१९. शनिचन्द्रौ यदि सप्तमे भवतः तर्हि पुनर्विवाहः भवति।

८.३.२०. द्वितीयसप्तमाष्टमयोः नीचस्थः शत्रुक्षेत्रस्थः वा ग्रहः अस्ति चेत् पत्नीमृत्युः अथवा पतिमृत्युः वक्तव्यम्।

एभिः यौगैः पत्नीसुखराहित्यं जातकस्य स्पष्टं वक्तुं शक्नुमः।

## ८.४. स्त्रीसंख्या तथा विवाहदिशा - समयादिविचारः

८.४.१. स्त्रीनाशकयोगानां ज्ञानानन्तरं स्त्रीसंख्याविचारः तथा विवाहसमयस्य, पत्न्याः दिशायाः च विचारः प्रस्तूयते।

८.४.२. एकादशे यदि द्वौ ग्रहौ भवतः अथवा सप्तमेशः अथवा शुक्रः द्विस्वभावराशिषु भवतः तर्हि द्वे पत्न्यौ भवतः।

८.४.३. सप्तमेशः अथवा शुक्रः यावद्भिः ग्रहैः युक्तः अस्ति तावत्यः पत्न्यः भवन्ति।

**८.४.४.** सप्तमे स्थितग्रहाणां संख्याकाः पत्न्यः भवन्ति। तत्र पापग्रहाणां संख्याकां पत्न्यः नष्टाः भवन्ति। शुभग्रहसंख्याकाः पत्न्यः जीविताः भवन्ति।

**८.४.५.** सप्तमभावस्थितस्य ग्रहस्य अथवा सप्तमे स्थितस्य शुक्रस्थितराश्यधिपस्य वा दिशि विवाहो भवति।

**८.४.६.** लग्नेशः तथा सप्तमेशः शुक्रो वा नवांशराशेः त्रिकोणे यदा चरति तदा विवाहो भवति। तथैव सप्तमभावस्थग्रहस्य सप्तमभावे दृष्टिकारकग्रहस्य सप्तमेशस्य वा दशान्तर्दशासु विवाहः भवति। यदा लग्नेशः सप्तमभावे गोचरः भवति तदा विवाहः। सप्तमेशस्य राशिनवांशाधिपयोः शुक्रचन्द्रयोः च बलवत्तरस्य दशायां बृहस्पतिः सप्तमेशश्च नवांशात् त्रिकोणे यदा भवति तदा विवाहः भवति।

## ८.५. स्त्रीजातकेष्वशुभयोगाः

**८.५.१.** विवाहसमयादिविचारानन्तरं स्त्रीजातकस्य शुभाशुभविचारः प्रवर्तते। तत्र प्रथमतया अशुभयोगाः विमृश्यन्ते।

**८.५.२.** सप्तमः क्रूरराशिनवांशे भवति तर्हि पतिः जडबुद्धिः, कुशतनुः, दीनः, वञ्चकः च भवति। पतिवियोगोऽपि भवति।

**८.५.३.** सप्तमे आग्नेयग्रहाः सूर्यः, कुजः, केतुः अथवा पापयुक्तः बुधः अस्ति चेत् वैधव्यभयं भवति।

**८.५.४.** सप्तमे मिश्रग्रहाः वर्तन्ते चेत् पुनर्विवाहः भवति। अष्टमे पापग्रहः अस्ति चेत् पत्युः मरणं, द्वितीये पापग्रह अस्ति चेत् स्वस्य च मरणं भवति।

**८.५.५.** सप्तमे शुभदृग्योगेन शुभफलानि भवति। पापयोगे अस्ति चेदपि तस्य फलानि न्यूनानि भवति।

**८.५.६.** पञ्चमाष्टमद्वितीयषट्सु कुत्रापि चन्द्रः अस्ति चेत् अल्पपुत्रा भवति। सप्तमे मङ्गलः, शनिः सूर्यनवांशे भवति चेत् योनिरोगः वक्तव्यः। चतुर्थे पापग्रहः अस्ति चेत् सा कुलटा भवति। शुक्रलग्नचन्द्राः शनिमङ्गलयोः नवांशे भवति चेत् सा परपुरुषगामिनी भवति।

## ९.६. स्त्रीजातके शुभयोगाः

स्त्रीजातकस्य अशुभयोगज्ञानावाप्त्यनन्तरं तासां शुभयोगानां चर्चा भवति।

**९.६.१.** प्रायशः पुरुषजातकस्य शुभाशुभचिन्तनं स्त्रीजातकेऽपि तथैव सम्भवति। स्त्रीजातके अष्टमेन पतिः, नवमेन पुत्रादयः, लग्नेन सौन्दर्यं, सप्तमेन पतिसम्पर्कः, चतुर्थेन चारित्र्यं च विचारणीयानि। एषु भावेषु शुभग्रहाः भवन्ति चेत् शुभफलानि भवन्ति।

**९.६.२.** लग्नं तथा चन्द्रः उभावपि समराशौ भवति चेत् स्त्री सौम्या, सुगुणा, सुचरित्रा, पतिव्रता च भवति। यदि द्वावपि विषमे स्तः तर्हि कुटिला, कलहप्रिया, दरिद्रा, पुरुषप्रवर्तिनी च भवति।

**९.६.३.** सप्तमभावे शुभराशिनवांशः वर्तते चेत् सौभाग्यवती, सुन्दरपादवती च भवति। चन्द्रस्य शुभराशिनवांशसम्बन्धेनापि शुभफलानि भवन्ति।

**९.६.४.** पञ्चमनवमभावयोः शुभग्रहाः वर्तन्ते चेत् सुखपुत्रसम्पत्तिगुणयुक्ता भवति। यदि लग्नचन्द्रचतुर्थसप्तमेषु निर्बलपापग्रहाः सन्ति चेत् स्त्री वन्ध्या अथवा मृतसन्तानवती स्यात्।

**९.६.५.** स्त्रीजातके लग्नेशः, चन्द्रः, सप्तमेशः एवं भाग्येशः यदि समीचीनस्थानेषु बलवच्छुभग्रहयुक्ताः सन्तः तिष्ठन्ति तर्हि सा उन्नतकुलजा, पूज्या, पुण्यवती, कार्यकुशला, सुन्दरी, भाग्यवती च भवति। सा पत्युः प्रिया, पुत्रवती, कल्याणी, सच्चरित्रा च भवति। अष्टमे शुभयोगदृष्ट्या उक्तफलानि वर्धते। पापयोगदृष्ट्या भावे अधिकतरं च भवति। एवं स्त्रियः शुभाशुभफलविवेकः ज्ञातव्यः।

## ९.७. त्रिंशांशेन स्वभावपरिज्ञानम्

**९.७.१.** मेषवृश्चिकयोः अन्यतरत् लग्नम् अथवा चन्द्रराशिः चेत् मङ्गलस्य त्रिंशाशे दुष्टा, शनेः त्रिंशांशे दासी, परिवारौन्नत्यै परिश्रमयुता च भवति। गुरोः त्रिंशांशे सुशीला, वैभवशालिनी च भवति। बुधस्य चेत् मायाविनी, कपटा, शुक्रस्य चेत् कुचरित्रा च भवति।

**९.७.२.** वृषतुलयोः अन्यतरे लग्नं चन्द्रो वास्ति चेत् तच्च कुजत्रिंशांशे चेत् दोषयुक्ता, शनित्रिंशांशे चेत् अन्यपुरुषगामिनी, गुरुत्रिंशांशे चेत् आदरणीया, बुधत्रिंशाशे चेत् विदुषी, बुद्धिमती, शुक्रत्रिंशांशे चेत् प्रसिद्धा च भवति।

**९.७.३.** मिथुनकन्ययोः अन्यतरे लग्नं वा चन्द्रः सः च कुजत्रिंशांशे चेत् कष्टवती, शनित्रिंशांशे चेत् नपुंसकरूपिणी, गुरुत्रिंशांशे चेत् साध्वी, बुधत्रिंशांशे चेत् गुणवती, शुक्रत्रिंशाशे चेत् भोगविलासिनी च भवति।

**९.७.४.** कर्कः लग्नम् अथवा चन्द्रराशिः, तत्र कुजत्रिंशांशे स्वैरिणी, शनेः त्रिंशांशे पतिघातिनी, गुरुत्रिंशांशे सुन्दरगुणवती, बुधस्य त्रिंशांशे कालशिल्पज्ञा, शुक्रत्रिंशांशे सच्चरित्रा च भवति।

**९.७.५.** धनुर्मीनयोः लग्नम् अथवा चन्द्रराशिः चेत् तत्र मङ्गलस्य त्रिंशांशे गुणवती, शनित्रिंशांशे विषयभोगेच्छारहिता, गुरुत्रिंशांशे गुणवती, बुधत्रिंशांशे शिल्पनिपुणा, शुक्रत्रिंशांशे साध्वी च भवति।

**९.७.६.** मकरकुम्भौ लग्नम् अथवा राशिः भवति तत्र च कुजत्रिंशांशे दुष्टा, दासी, शनित्रिंशांशे परपुरुषरता, गुरुत्रिंशांशे श्रितपती, बुधत्रिंशांशे शिथिलचरित्रा, शुक्रत्रिंशांशे धनसन्तानरहिता च भवति। सिंहराशिः शनित्रिंशांशे शिथिलचरित्रा, गुरुत्रिंशांशे राजवधूः, बुधत्रिंशांशे पुंचेष्टावती, शुक्रत्रिंशांशे अन्यपुरुषासक्ता च भवति। अत्र विशेषः -- चन्द्रलग्नयोः बलानुसारं त्रिंशांशफले भेदः भवति। अत्र यस्य बलाधिक्यं तस्य फलाधिक्यं वक्तव्यम्। एवं रीत्या त्रिंशांशतः स्वभावस्वरूपः स्त्रीणां विचारणीयः।

## स्वावलोकनप्रश्नः

**१.स्त्रीजातके शुभयोगान् विलिखत ?**

## ९.८. गर्भाधानविचारः

**९.८.१.** स्त्रीजातकविचाराङ्गतया अत्र गर्भाधानसमयविचारः प्रस्तुतः। तदत्र किञ्चित् विवेचयामः।

**९.८.२.** यस्मिन् मासे आर्तवसमये अनुपचयस्थानेषु इत्युक्ते लग्नद्वितीयचतुर्थपञ्चमसप्ताष्टम-नवमद्वादशस्थानेषु चन्द्रः चरति, तं च कुजः पश्चति तदा गर्भाधानं भवितुमर्हति। अन्यथा गर्भाधानसम्भावना न्यूना।

**९.८.३.** स्त्रीणां गर्भाधानयोग्यसमये पुरुषस्य राशेः तृतीयषष्ठदशैकादशेषु स्थानेषु यदा चन्द्रः भवति तदा गर्भाधानं भवति। तथैव अमावास्या, पूर्णिमा, पतिपत्न्योः जन्मतिथयः, संक्रान्तिः, ग्रहणम्, अष्टमी इत्याद्याः त्याज्याः भवन्ति।

## ९.९. आदर्शप्रश्नाः

१. स्त्रीविनाशकयोगान् लिखत।

२. स्त्रीजातकेषु विद्यमानान् शुभयोगान् वर्णयत।

३. त्रिंशांसवशात् स्त्रीणां स्वभावपरिज्ञानं कथमिति विशदयत।

४. गर्भाधानयोगान् व्याख्यात।

# नवमः खण्डः - सन्तानचिन्ताध्यायः

## संरचना

९.१. प्रस्तावना

९.२.लक्षिताधिगमविशेषाः

९.३. विविधप्रकारकसन्तानयोगाः

९.४. सन्तानहीनयोगाः

९.५. सन्तानसंख्या - आधानकालादीनां निर्णयः

९.६. सन्तानदोषपरिहाराः

९.७. सन्तानप्राप्तिकालः

९.८. आदर्शप्रश्नाः

## ९.१. प्रस्तावना

**"अपुत्रस्य गतिर्नास्ति"** इति भारतीयानां विश्वासः। अतः सन्तानविचारस्य बहु महत्त्वं विद्यते लोके। सन्तानप्राप्ति-दत्तकपुत्र-सन्तानहीनयोगादिविचाराः विशदतयाऽत्र वर्णिताः सन्ति। पाठस्यास्य अध्ययनेन सन्तानविषयसम्बद्धाः सर्वेऽप्यंशाः स्पष्टाः भवन्ति।

## ९.२.लक्षिताधिगमविशेषाः

* सन्तानप्राप्तियोगान् जानन्ति।

* दत्तकपुत्रयोगान् ज्ञातुं प्रभवन्ति।

* पुत्रविलम्बयोगानां ज्ञानं सम्भवति।

* सन्तानप्राप्तिकालं ज्ञास्यन्ति।

* सन्तानदोषपरिहारादीनां विचारं ज्ञास्यन्ति।

## ९.३. विविधप्रकारकसन्तानयोगाः

पत्नीभावचिन्तनानन्तरं सन्तानभावस्य चिन्ता ग्रन्थेऽस्मिन् प्रारभ्यते।

**९.३.१. सुस्थाः विलग्नशशिनोः सुतभेशजीवाः सुस्थाननाथशुभदृष्टियुते सुतर्क्षे।**

**लग्नात्मपौ यदि युतौ च मिथः सुदृष्टौ क्षेत्रे परस्परगतौ यदि पुत्रसिद्धिः।।**

लग्नात् चन्द्राद्वा पञ्चमेशः गुरुः च यदि शुभस्थानीयौ अथवा पञ्चमभावे शुभग्रहाणां शुभभावाधिपानां वा योगः दृष्टिः च यदि स्यात् अथवा लग्नपञ्चमेशौ मिलितौ लग्ने पञ्चमे वा स्थितौ अथवा परस्परं दृष्टौ स्थानपरिवर्तितौ (लग्नेशः पञ्चमे पञ्चमेशः लग्ने) वा यदि स्यातां तर्हि सन्तानलाभः वर्तते।

**९.३.२.** पञ्चमाधिपतिः गुरुः, कुजः एते यदि पुरुषराशिनवांशे यदि वर्तन्ते तर्हि बहवः पुत्राः भवन्ति। तत्र पञ्चमेशस्य बलाबलेन सुपुत्रकुपुत्रनिर्णयः भवेत्।

**९.३.३.** सूर्यः यदि एकाकी कर्कस्थः पञ्चमे भवति तर्हि द्वितीयभार्यायां पुत्रोत्पत्तिः भवति। एवमेव कुजः शुक्रो वा भवति चेदपि तदेव फलम्। अस्मिन् योगे यदि शनिः तर्हि सः अनेकपुत्रदः भवति। गुरुः कन्याप्रदः भवति उक्तयोगे। उक्तयोगस्थौ चन्द्रबुधौ सन्तानोच्छेदकौ भवतः।

**९.३.४. दत्तपुत्रकयोगः** - मिथुनकन्यामकरकुम्भेष्वन्यतमः पञ्चमभावः भूत्वा तत्र यदि शनिगुलिकयोगः दृष्टिः वा भवति तर्हि तस्य दत्तकपुत्रः भवति। तथैव पञ्चमेशः निर्बलः लग्नाधिपसप्तमाधिपैरसम्बद्धः यदि भवति तर्हि एवमेव फलं वक्तव्यम्।

**९.३.५. विलम्बेन पुत्रलाभयोगाः** - अल्पसुतसंज्ञकेषु राशिषु पञ्चमस्थः सूर्यः यदि भवति तथा लग्ने कुजः अष्टमे शनिः च भवति तर्हि विलम्बेन पुत्रोत्पत्तिः भवति। लग्ने शनिः, अष्टमे गुरुः, द्वादशे मङ्गलः तथा पञ्चमभावः अल्पसुतराशिः च यदि भवति तर्हि पुत्रप्राप्त्यां विलम्बः भवति। तथैव एकादशे चन्द्रः गुरुस्थितराशेः पञ्चमराशिः पापाक्रान्तः लग्ने नैके ग्रहाश्च यदि भवन्ति तर्ह्यपि पुत्रोत्पत्तिः विलम्बते। **अत्र विशेषः** - अल्पसुतराशयः एते भवन्ति - वृश्चिकः, वृषभः, कन्या, सिंहः।

**९.३.६.** यदि पञ्चमेशः पुरुषराशिनवांशे पुरुषग्रहयुतः दृष्टो वा भवति तर्हि पुत्रः भवति। यदि स्त्रीराशिनवांशे स्त्रीग्रहयुतः दृष्टश्च वा भवति तर्हि कन्या भवति।

## ९.४. सन्तानहीनयोगाः

सन्तानकारकयोगाः विविधप्रकारकाः परिशीलिताः। इतःपरं सन्तानोत्पत्तिविघातकान् योगान् परिशीलयामः।

**९.४.१.** लग्नाच्चन्द्रात् गुरोः च पञ्चमभावाः पापग्रहयुताः दृष्टाः शुभग्रहयोगदृष्टिविरहिताः वा एतत्पञ्चमभावत्रितयं पापग्रहमध्ये स्थितः तथा एषां स्वामिनः त्रिक (षष्ठाष्टमद्वादश) स्थिताः च यदि भवन्ति तर्हि जातकः सन्तानरहितः भवति। पापग्रहः स्वगृहीभूत्वा पञ्चमे भवति चेत् सन्तानप्राप्तिः भवति। सः यदि अन्यपापयुतः चेदधिकसन्ततयः भवन्ति। शुभग्रहः स्वक्षेत्री उच्चस्थो वा पञ्चमे भवति तर्हि सन्तानोत्पत्तिर्न जायते। अल्पसुतराशयः यदि पञ्चमे भवन्ति तर्हि सन्तानस्य विलम्बः भवति।

**९.४.२. वंशोच्छेदयोगाः** - चतुर्थसप्तमदशमेषु क्रमशः यदि पापग्रहः, शुक्रः, चन्द्रः च भवति तर्हि वंशोच्छेदः भवति। द्वादशाष्टमपञ्चमेषु लग्ने च पापग्रहाः भवन्ति चेत् वंशनाशः भवति। सप्तमे शुक्रबुधौ पञ्चमे बृहस्पतिः, चतुर्थे पापग्रहाश्च भवन्ति चेदपि पूर्वोक्तफलं भवति। पञ्चमे चन्द्रः अष्टमद्वादशलग्नेषु पापग्रहाश्च यदि भवन्ति तर्हि वंशनाशः वक्तव्यः। लग्ने पापग्रहः, लग्नेशः पञ्चमे, पञ्चमेशः तृतीये, चन्द्रः चतुर्थे च भवति तर्हि जातकस्य पुत्रोत्पत्तिः न भवति। विषमराशिनवांशस्थः चन्द्रः सूर्यदृष्टः सन् पञ्चमे भवति चेत् पुत्रदुःखं जायते। पञ्चमेशः यदि नीचः, शत्रुराशिस्थः, अस्तः वा भवति तथा षष्ठाष्टमद्वादशाधिपयुतः चेत् सन्तानविहीनत्वं भवति। पञ्चमेशः पञ्चमे शुभदृष्टिरहितः सन् तिष्ठति चेत् तदेवफलम्।

इत्येवं रीत्या अत्र बहुविधपुत्रोत्पत्तिविघातकान् योगान् व्यवृणोत्।

## ९.५. सन्तानसंख्या - आधानकालादीनां निर्णयः

सन्तानप्राप्त्युच्छेदयोगानां चिन्तनानन्तरं सन्तानसंख्या कालादीनां निर्णयः उच्यते।

**९.५.१.** तत्रादौ आधानकालनिर्णयः -

**बलयुक्तौ स्वगृहांशेष्वर्कसितावुपचयर्क्षगौ पुंसाम्।**

**स्त्रीणां वा कुजचन्द्रौ यदा तदा सम्भवति गर्भः।।**

पुरुषस्य जातके सूर्यशुक्रौ स्वराशिनवांशेषु स्थितौ स्त्रीणां च जातके कुजचन्द्रौ स्वराशिनवांशस्थौ भूत्वा यदा गोचरवशात् उपचयस्थानेषु भवतः तदा गर्भाधानं भवितुमर्हति।

**९.५.२. सन्तानसंख्या** - पञ्चमभावे पञ्चमाधिपेन सह वा ये ग्रहाः भवन्ति, तथैव गुरोः पञ्चमे अथवा पञ्चमेशेन सह च यावन्तः ग्रहाः, एवमेव सूर्यस्य पञ्चमे अथवा पञ्चमेशेन सह वा ये ग्रहाः वर्तन्ते तेषु यावन्तः ग्रहाः मित्रनवांशस्थिताः तावन्तः पुत्राः पुत्र्यः वा जातकस्य भवन्ति।

**९.५.३. सन्तानोत्पादकता** - स्त्रीजातके गुरोः चन्द्रस्य कुजस्य च राश्यादिभोगस्य योगः समराशिनवांशे भवति चेत् स्त्री सन्तानोत्पादनक्षमा अस्ति। यदि विषमराशौ समनवांशः अथवा समराशौ विषमनवांशः वा भवति तर्हि सन्तानोत्पादने क्लेशः भवति। पुरुषस्य तु सूर्यस्य शुक्रस्य बृहस्पतेश्च राश्यादिभोगयोगः विषमराशिनवांशतुल्यो भवति तर्हि सः पुत्रोत्पादनक्षमः भवति। यदि मिश्रितमर्थात् विषमराशिः, समनवांशः समराशिः विषमनवांशः चेत् कष्टेन पुत्रोत्पत्तिः भवति।

**९.५.४. सन्तानतिथिस्फुटम्** - सूर्यस्य राश्यादिभोगस्य पञ्चगुणितात् चन्द्रस्य राश्यादिभोगस्य पञ्चगुणितं न्यूनीकृत्य यत् प्राप्यते तदेव सन्तानतिथिस्फुटम्। एवं प्राप्तस्फुटं यदि शुक्लपक्षशुभतिथयः तर्हि विनाक्लेशं सन्तानोत्पत्तिः भवति। कृष्णपक्षशुभतिथयश्चेत् सन्तानप्राप्तिः भवति। उदाहरणार्थं यदि सूर्यस्फुटम् ०-१२-१५-३९ इति भवति। तस्य पञ्चगुणितम् ०-१२-१५-३९ x ५ = २-१-१८-१५। चन्द्रस्य तु ८-१७-२५-१६ x ५ = ४२-२७-६-२०। सूर्यात् चन्द्रस्य न्यूनीकरणेन २-१-१८-१५ - ४२-२७-६-२० = ४०-२५-४८-५। एतत् द्वादशतः विभज्य या लब्धिः १२ सा गततिथिः। अतः सन्तानतिथिः १३ भवति। अमावास्यातः तिथिगणना भवति। अतः इदानीं लब्धिः शुक्लपक्षे भवति। १५ तः अधिकमस्ति तर्हि १५ न्यूनीकृत्य तिथिनिर्णयः कार्यः।

आमावास्या तथा उभयत्र पक्षे छिद्रतिथयः च सन्तानसुखाभावे कारकाः भवन्ति। तथैव विष्टिः तथा शकुनिः, चतुष्पाद्, नाग, किंस्तुघ्नम् इति स्थिरकरणानि च दोषयुक्तानि भवन्ति। अत्रेदमवधेयम् - चतुर्थी, षष्ठी, अष्टमी, नवमी, द्वादशी, चतुर्दशी इत्येते छिद्रतिथयः भवन्ति, तथैव कृष्णचतुर्दश्याः उत्तरार्धमारभ्य स्थिरकरणानि भवन्ति। शुक्लप्रतिपत्पूर्वार्धं यावत्। एवमाधानकालादिनिर्णयाः अत्र विचारिताः।

## ९.६. सन्तानदोषपरिहाराः

सन्तानतिथ्यादिनिर्णयानन्तरं तिथ्यादयः यदि दोषयुक्ताः तर्हि तेषां दोषाणामपहारार्थं दोषपरिहाराः वर्णिताः।

**९.६.१.** यदि तिथिस्फुटं विष्टिः अथवा स्थिरकरणं वा भवति तर्हि पुरुषसूक्तेन कृष्णार्चना कार्या। षष्ठी चेत् स्कन्दस्य, चतुर्थी चेत् नागदेवतायाः उपासनया दोषः परिहर्तव्यः। नवमी चेत् रामायणकथाश्रवणेन, अष्टमी चेत् श्रवणव्रतेन, चतुर्दशी चेत् शङ्करपूजनेन, द्वादशी चेत् अन्नदानेन, अमावास्या चेत् पितृतोषेण च परिहारः भवति। कृष्णदशमीतः अमापर्यन्तं विशेषयजनादिना परिहारः भवति। कृष्णपक्षस्य प्रतिपदारभ्य पञ्चमीपर्यन्तं नागोपासनया, षष्ठीतः दशमीं यावत् स्कन्दोपासनया, ततः ऊर्ध्वं हर्युपासनापूजनेन दोषपरिहारः कार्यः।

**९.६.२.** पञ्चमेशः यदि शत्रुराशिगतः नीचः अथवा अस्तङ्गतः षष्ठाष्टमद्वादशस्थो वा अथवा पञ्चमभावे षष्ठाष्टमद्वादशेशाः शत्रुगता नीचा अथवा अस्ता वा भवन्ति तर्हि अनपत्यतादोषः भवति।

**९.६.३.** पूर्वोक्तदोषपरिहाराय ग्रहस्थितराशिसम्बद्धदेवतावृक्षपश्वादीनामुपासना कार्या। यदि दोषकारकः सूर्यः तर्हि शिवस्य गरुडस्य वा कोपेन, चन्द्रः मातुः साधुस्त्रीणां वा कोपेन, कुजः चेत् ग्रामदेवतायाः, स्वजनानां शत्रूणां वा कोपेन अनपत्यता भवति। यदि बुधः तर्हि मार्जारहत्यया, प्राणिनामण्डनाशनेन, बालबालिकानां विष्णोर्वा कोपेन, गुरुः चेत् गुरुद्रोहेण, फलवृक्षच्छेदनेन वा, शुक्रः चेत् पुष्पद्रुमच्छेदनेन, साध्वीगो इत्यादिपीडनेन यक्षिणीशापात् वा, शनिः चेत् अश्वत्थवृक्षच्छेदनेन यमप्रेतादिकोपेन, राहुश्चेत् सर्पनाशेन, केतुश्चेत् ब्राह्मणशापेन चानपत्यता जायते। पञ्चमे यदि मान्दिः तर्हि मृतात्मनः कोपेन, शुक्रचन्द्रयुतश्चेत् युवतीहत्या - गोहत्यापापेन चानपत्यता भवति। गुरुः अथवा केतुः चेत् ब्रह्महत्यया अनपत्यता भवति।

**९.६.४.** एवं प्रकारेण पूर्वजन्मकृतपापेन अनपत्यतादोषः भवति। तेषां परिहाराय तत्तत् ग्रहाणां कृते प्रोक्तः जपदानादयः कार्यः। तथैव सेतुस्नानं, कीर्तनम्, सत्कथाश्रवणम्, विष्णुशिवार्चनम्, व्रतोपासनादिकार्याणि, दानश्राद्धादिकर्म, नागोपासना इत्यादिना सन्तानप्राप्तिः जायते। एवं सन्तानक्लेशपरिहाराः अत्र कथिताः।

# स्वावलोकनप्रश्नः

**१. सन्तानप्राप्तियोगान् लिखत ?**

## ९.७. सन्तानप्राप्तिकालः

सन्तानतिथिनिर्णयानन्तरं तद्दोषपरिहाराः निर्दिष्टाः। ततः परं सन्तानस्य प्राप्तिकालः जननकालश्च निर्णीयते।

**९.७.१. लग्नास्तपुत्रपतिजीवदशापहारे पुत्रेक्षकस्य सुगतस्य च पुत्रसिद्धिः।**

**पुत्रेशराशिमथवा यमकण्टकर्क्षं जीवे गते तनयसिद्धिरथांशभे वा।।**

लग्नसप्तमपञ्चमाधिपानां, गुरुः, पञ्चमे दृष्टग्रहाः, पञ्चमस्थग्रहः एषां दशान्तर्दशासु सन्तानप्राप्तिः भवितुमर्हति। पञ्चमेशस्थितराशिनवांशयोः अथवा यमकण्टकस्थितराशिनवांशयोः गोचारात् यदा गुरुः भवति तदा पुत्रप्राप्तिः भवति। यदा लग्नेशः गोचरवशात् पञ्चमाधिपयुतः, उच्चराशिस्थः, स्वक्षेत्रे पञ्चमभावराशौ पञ्चमेशाधिष्ठित राशौ वा भवति तदा सन्तानप्राप्तिः जायते।

**९.७.२.** लग्नेशसप्तमेशपञ्चमेशानां राश्यादिभोगस्य योगः यस्मिन् नक्षत्रे भवति तस्य स्वमिग्रहस्य महादशायां पञ्चमस्थग्रहस्य पञ्चमभावद्रष्टुः ग्रहस्य पञ्चमेशस्य वा अन्तर्दशायां पुत्रोत्पत्तिः

भवितुमर्हति। पञ्चमेशगुरुकुजाः यस्मिन् राशौ नवांशे वा स्थिताः तेषामधिपेषु बलवतः ग्रहस्य दशान्तर्दशायां पुत्रः भवति।

**९.७.३.** गुरोः पञ्चमाधीशस्य राशिनवांशयोः त्रिकोणराशौ गोचरवशात् यदा गुरुः सङ्क्रान्तो भवति तदा पुत्रप्राप्तिः वक्तव्या। जन्मनक्षत्रस्य ततः पञ्चमनक्षत्रस्य च स्वामिनोः स्पष्टराश्यादियोगात् प्राप्तराश्यादौ अथवा ततः पञ्चमे, नवमे वा गोचरवशात् गुरुः यदा भवति तदा पुत्रोत्पत्तिः।

**९.७.४.** आधानलग्नात् तृतीयभावे अथवा पञ्चमे नवमे वा गोचरवशात् सूर्यः भवति तदा सन्तानसुखं भवति। आधानलग्नात् पञ्चमे नवमे वा यदि पुत्रजन्म तर्हि पितृपुण्येन भवति। आधानकाले शुभग्रहयोगः दृष्टिः वा अस्ति चेत् जातः दीर्घायुः ऐश्वर्यवान् च भवति।

**९.७.५.** आधानकाले चन्द्रः यस्य राशेः यस्मिन् द्वादशांशे स्थितः, मेषात् तत्तुल्यराशिः जातकस्य राशिः भवति। अथवा आधानकालिकचन्द्रराशेः द्वादशांशतुल्यराशिः वा भवति। यथा -- आधानकालिकः चन्द्रः कुम्भराशौ अष्टमः कन्या वा जातकस्य जन्मराशिः भवति।

**९.७.६.** प्रश्नकालिकलग्नात्, दत्तपुत्रस्वीकरणलग्नात्, उपनयनलग्नात्, कन्यादानलग्नात्, आर्तवदर्शलग्नात्, आधानलग्नाच्च जन्मलग्नसदृशफलविचारः कर्तुं शक्यः। इत्येवं सन्तानप्राप्तिकालः ग्रन्थेऽस्मिन् समुपवर्णितः।

## ९.८. आदर्शप्रश्नाः

१. सन्तानप्राप्तियोगान् लिखत।

२. विलम्बेन पुत्रलाभयोगान् विशदयत।

३. सन्तानदोषपरिहाराः के ? निरूपयत।

४. सन्तानप्राप्तिकालं विशदयत।

५. वंशोच्छेदनयोगान् लिखत।

# दशमः खण्डः
# अरिष्टरोगचिन्तनाध्यायौ

## संरचना

१०.१. प्रस्तावना

१०.२.लक्षिताधिगमविशेषाः

१०.३. आयुर्निर्णयः

१०.४. आयुर्भेदाः

१०.५. मृत्युभागः

१०.६. मृत्युकालः

१०.७. रोगचिन्ता

१०.८. आदर्शप्रश्नाः

## १०.१. प्रस्तावना

अध्यायेऽस्मिन् आयुर्विचारः प्रतिपाद्यते। अल्पायु-मध्यायु-पूर्णायुर्योगानां वर्णनमत्र विधास्यते। तदनन्तरं विविधग्रहेभ्य उत्पन्नानां रोगाणां क्रमशः वर्णनञ्चास्मिन् अध्याये विधीयते। इत्येवं क्रमेण विविधारिष्टयोगाः रोगयोगाश्च अध्ययनेऽस्मिन् निरूप्यन्ते।

## १०.२.लक्षिताधिगमविशेषाः

* आयुर्विचारस्य ज्ञानम्।

* रोगविचारस्य ज्ञानम्।

* विविधग्रहेभ्य उत्पन्नानां रोगाणां ज्ञानं सम्भवति।

* पूर्वजन्मभविष्यज्ञानं सम्भवति।

## १०.३. आयुर्निर्णयः

बालकस्य जन्मानन्तरं सर्वेऽपि तस्यायुष्यस्य विचारं कुर्वन्ति, तदनु अन्येषां फलानां विचारः क्रियते, आयुष्यं विना राजयोगादीनां सर्वेषां वैयर्थ्यात् प्रथमम् आयुष्यस्य विचारः कार्यः, अत उक्तं -

**पूर्वमायुः परीक्ष्येत पश्चाल्लक्षणमादिशेत्।**

**अनायुषां तु मर्त्यानां लक्षणैः किं प्रयोजनम्।।** इति।

### १०.३.१. जनिकालनिर्णयः

केचन आधानकालं, केचन शीर्षोदयकालं, केचन भूस्पर्शकालं, केचनपुनः नालोच्छेदकालमेव जन्मकालत्वेन अङ्गीकुर्वन्ति।

### १०.३.२. द्वादशवर्षपर्यन्तमायुर्निर्णयः

जन्मनः द्वादशवर्षपर्यन्तं जातकस्यायुः निश्चेतुं न शक्यते, यतो हि एतेषु वर्षेषु बालः जननीजनकयोः पूर्वजन्मार्जितपापेन बालारिष्टात् मृतो भवेत्।

आरम्भे वर्षचतुष्टये जनन्याः पापवशात्, चतुर्थादष्टमपर्यन्तं जनकस्य पापेन तत उत्तरेषु चतुर्षु वर्षेषु स्वकीयपापैः बालः मृतिमाप्नुयात्, तदुक्तम् -

**आद्ये चतुष्के जननीकृताघैर्मध्ये च पित्रार्जितपापसङ्घैः।**

**बालस्तदन्त्यासु चतुःशरत्सु स्वकीयदोषैः समुपैति नाशम्।।** इति।

चान्द्रगणनानुसारं बालकस्य जन्मदिवसे अरिष्टदोषशमनाय जपहोमादि आयुष्यप्रदायकं विहितं कर्म कर्तव्यं तथा औषधादिभिः पित्रा जातकस्य रक्षा करणीया भवति, एतद् द्वादशवर्षपर्यन्तं कार्यम्।

## १०.४. आयुर्भेदाः

जन्मनः अष्टवर्षपर्यन्तं बालारिष्टं नवमात् विंशतिपर्यन्तं योगारिष्टं ततो द्वात्रिंशत्पर्यन्तम् अल्पायुः, ततः सप्ततिपर्यन्तं मध्यायुः तदनन्तरं दीर्घायुः भवति। तन्नाम मनुष्यस्य पूर्णायुषः (१०० वर्षाणि) तृतीयभागः अल्पायुरित्युक्तं भवति।

जन्मकाले यदि दिनमृत्युः दिनरोगः विषघटीत्यादिकुयोगः उपस्थितो भवेत् तर्हि जातकः शीघ्रं म्रियते, पुष्यपूर्वाषाढाश्चित्रानक्षत्राणां प्रथमे चरणे जन्म चेत् जनकस्य, द्वितीये चेत् जनन्याः तृतीये चेत् स्वस्य चतुर्थे चेत् मातुलस्य अरिष्टकारकं स्यात्। जन्मलग्नं शुभैः युतं दृष्टं वा न भवति चेत् तथा जन्मसमये मूलनक्षत्रस्य प्रथमचरणं चेत् जनकस्य, द्वितीयं चेत् जनन्यास्तथा तृतीयं चेत् वंशस्यैव नाशः स्यात्। मूलस्य चतुर्थे जन्म चेत् धनवृद्धिः स्यात्, आश्लेषाप्रथमचरणे श्रीवृद्धिः, द्वितीये कुलनाशः, तृतीये जनन्याः तथा चतुर्थे जनकस्य च हानिः स्यात्।

लग्नस्यान्तिमांशेषु यदि जातकस्य जन्म स्यात् तथा सोंऽशः पापग्रहैर्दृष्टो युतो वा स्यात् तर्हि जातकः शीघ्रं मरणं प्राप्नुयात्। यदि गण्डान्तकाले जन्म स्यात् तर्हि जातकस्य पितुः मातुः स्वस्य च मृतिर्भवेत्, किन्तु यदि जातको जीवितः स्यात् तर्हि राजा भवेत्। एवं चतुःसन्धिषु (मीन-मेषयोः, मिथुनकर्कयोः, कन्यातुलयोः, धनुर्मकरयोश्च) जन्मलग्नं यदि पापग्रहैर्युतं दृष्टं वा स्यात् तर्हि जातकस्य शीघ्रं मृत्युर्भवेत्। मृत्युभागस्थश्चन्द्रो यदि दशमाष्टमयोः स्थितः स्यात् तर्हि जातकः शीघ्रं मृतः स्यात्।

## १०.५. मृत्युभागः

मेषादिराशिषु तत्तदंशेषु चन्द्रः मृत्युप्रदः भवति। तदितः अवगन्तव्यम्।

| राशिः | फलदीपिकाकारानुसारेणांशाः | मतान्तरेणांशः |
|---|---|---|
| मेषः | २६ | २ |
| वृषभः | १२ | ९ |
| मिथुनः | १३ | २२ |
| कर्कः | २५ | २२ |
| सिंहः | २४ | २५ |
| कन्या | ११ | १४ |
| तुला | २६ | ४ |
| वृश्चिकः | १४ | २३ |
| धनुः | १३ | १८ |

| | | |
|---|---|---|
| मकरः | २५ | २० |
| कुम्भः | ५ | १२ |
| मीनः | २९ | १० |

**१०.५.१. यदि पापग्रहः --**

१. केन्द्रे अष्टमे वा

२. लग्ने अष्टमे च

३. लग्नसप्तमयोः

४. लग्नस्य चन्द्रस्य वा पार्श्वयोः

५. दुर्बलचन्द्रेण सह (६,८,१२)

६. चन्द्रेण युक्तः लग्नपञ्चमनवमसप्तमेषु

७. सप्तमाष्टमयोः भवति चेत् जानकः शीघ्रं मृतिं प्राप्नोति।

## स्वावलोकनप्रश्नः

**१. द्वादशवर्षपर्यन्तं आयुर्निर्णयः किमर्थं न कार्य इति लिखन्तु ?**

## १०.६. मृत्युकालः

राशीशो लग्नेशो वा यदि निर्बलः सन् दुःस्थानेषु (६,८,१२)स्थितो भवति तर्हि मेषादिक्रमात् तस्य सङ्ख्या तुल्ये वर्षे, यद्राशेः द्रेष्काणे स्थितः भवेत्, यदि द्रेष्काणपतिः उक्तस्थानेषु दुर्बलः सन् तिष्ठति तर्हि तद्राशिसङ्ख्यातुल्ये मासे, तथा यद्राशिनवांशे स्थितः तद्राशिसङ्ख्यातुल्यदिवसे जातकः पञ्चमाष्टमयोः स्थितस्य पापग्रहस्य अनुरूपेण अरिष्टेन मृतिं प्राप्नोति। तदुक्तम् -

**जन्मेशोऽथ विलग्नपो यदि भवेद् दुःस्थोऽबलो वत्सरै**

**स्तद्राशिप्रमितैश्च मारयति तन्मासैर्दृगाणाधिपः।**

**अंशेशो दिवसैस्तथा यदि मृतिर्द्वित्र्यादियोगान्बहू-**

**नालोच्य प्रवदेत्सुताष्टमगतैः पापैररिष्टं शिशोः।।** इति।

### १०.६.१. ह्रस्वमध्यदीर्घायुः

१. लग्नद्रेष्काणम् चन्द्रदेष्काणं वा

२. लग्नेशस्य जन्मराशीशस्य च नवांशः

३. लग्नेशस्य अष्टमेशस्य द्वादशांशः च

एषु युग्मत्रयेषु यदि राशिद्वयं चरं तर्हि दीर्घं, यदि एकः चरोऽपरः स्थिरस्तर्हि मध्यं, यदि एकः चरः अपरः द्विस्वभावः तर्हि स्वल्पं, यदि एकः स्थिरः अपरः द्विस्वभावः तर्हि दीर्घं, यदि द्वयं स्थिरं तर्हि अल्पं, यदि द्वयं द्विस्वभावं तर्हि मध्यम् आयुः जातकस्य भवति, एतदित्थमवगन्तुं शक्यते -

| लग्नम्, लग्नद्रेष्काणम् नवांशः - द्वादशांशः | जन्मराशिः - जन्मराशीशद्रेष्काणः - नवांशः- अष्टमेशद्वादशांशः | आयुः प्रमाणम् |
|---|---|---|
| चरः | चरः | दीर्घम् |
| चरः | स्थिरः | मध्यम् |
| चरः | द्विस्वभावः | अल्पम् |
| स्थिरः | चरः | मध्यम् |
| स्थिरः | स्थिरः | अल्पम् |
| स्थिरः | द्विस्वभावः | दीर्घम् |
| द्विस्वभावः | चरः | अल्पम् |
| द्विस्वभावः | स्थिरः | दीर्घम् |
| द्विस्वभावः | द्विस्वभावः | मध्यम् |

लग्नेशः शुभग्रहाश्च यदि क्रेन्द्रे स्युः तर्हि जानकः दीर्घायुः, यदि पणपरे (२,५,८,११) तर्हि मध्यायुः तथा आपोक्लिमे (३,६,९,१२) अल्पायुः स्यात्। उक्तस्थितौ यदि अष्टमेशः पापग्रहाश्च केन्द्रादिषु भवन्ति चेत् यथाक्रमम् अल्पायुः मध्यायुः दीर्घायुश्च भवति जातकः।

१. जन्मराशीशः चन्द्रादष्टमस्य स्वामी, २. लग्नेशः लग्नादष्टमस्य स्वामी, ३. लग्नेशः सूर्यश्च यदि परस्परं मित्रं स्यात् तर्हि जातकः दीर्घायुः, समः स्यात् तर्हि मध्यायुः, शत्रुः स्यात् तर्हि अल्पायुः भवेत्। अत्र ग्रहाणां नैसर्गिकसम्बन्धस्यैव विवेचनं कार्यम्।

लग्नेशः लग्ननवांशेशश्च यदि लग्नाद् लग्ननवांशाच्च अष्टमस्य अधिपतेरपेक्षया बलवान् भवेत् तर्हि जातकः दीर्घायुः स्यात्। अन्यथा अष्टमेशः यदि बलवान् स्यात्तर्हि जातकः अल्पायुः स्यात्। एवं जन्मराशीशः जन्मराशिनवांशेशश्च यदि राशेः नवांशाद्वा अष्टमस्य अधिपतेः बलवान् स्यात्तर्हि जातकः दीर्घायुः अन्यथा अल्पायुः भवति। अष्टमेशः

लग्नेशाद् बलशाली सन् केन्द्रे भवति तथा अष्टमद्वादशयोः पापग्रहः भवति द्वित्रिप्रकारेभ्यः यः रोगः दृश्यते सैव रोगः वाच्यः। उक्तञ्च --

**रोगस्य चिन्तामपि रोगभावस्थितेर्ग्रहैर्वा व्ययमृत्युसंस्थैः।**

**रोगेश्वरेणापि तदन्वितैर्वा द्वित्र्यादिसंवादवशाद्वदन्तु।।** इति।

यदि तस्य आयुः मध्यम् अधिकं वा भवति तथापि तस्य जीवनं कष्टमयं स्यात्। जातकः अल्पायुः स्यात्तर्हि शनिः गुरुः रविः चन्द्रः इत्येषां स्पष्टराश्यादिभोगस्य योगजराशौ यदा शनिः स्वकीयप्रथमभगणे सङ्क्राम्यति तदा जातकस्य मरणं स्यात्। यदि जातकः मध्यायुस्तर्हि द्वितीयभगणसङ्क्रमणे जातकस्य मृतिः स्यात्। जातकः दीर्घायुश्चेत् तृतीयभगणसङ्क्रमणे जातकः मरणं प्राप्नुयात्।

लग्नेशः शत्रुराशौ नीचराशौ वा स्थित्वा अस्तंगतश्चेत् गोचरवशात् लग्नेशः दुःस्थाने (६,८,१२) लग्नराशिं वा सङ्क्राम्यति चेत् जातकः मरणं प्राप्नुयात्। यदि बलवान् गुरुः लग्ने स्यात्तर्हि बह्वीः विपदः जातकः तद्बलात् तरति। यस्य जन्माङ्गे केन्द्रत्रिकोणाष्टमेषु पापग्रहा न स्युः तथा गुरुः बलवान् लग्नेशश्च स्यात् स पुण्यकर्माचारी सुखी च स्यात्।

## १०.७. रोगचिन्ता

रोगाणां विचारः षष्ठाष्टमद्वादशस्थग्रहैः तथा षष्ठेशात् तद्युतग्रहेण च करणीयः।

### १०.७.१. विविधग्रहेभ्य उत्पन्ना रोगाः

विविधेभ्यो ग्रहेभ्यः विविधा रोगाः स्युः। तदित्थमवगच्छन्तु -

**रविः-** पित्तविकृतिः, ज्वरः, दाहः, अपस्मारः हृद्रोगः, नेत्रपीडा, शत्रुभयं, चर्मरोगः, अस्थिस्रुतिः, काष्ठाग्निशस्त्रविषाघातः, पुत्रभार्यादीनां कष्टं, चतुष्पादचोरसर्पेभ्यो भयं, राज्ञो यमात् रुद्रात् भयम्।

**चन्द्रः** - निद्राविकारः, आलस्यं, कफविकारः अतिसारः स्फोटकः, शीतज्वरः, श्रृङ्गिपशुभ्यः, जलचरेभ्यो वा भीतिः, मन्दाग्निः अरुचिः, स्त्रीजन्यव्याधिः, कामितः, मनः श्रान्तिः, रक्तविकारः, जलभयं, बालग्रहदुर्गाकिन्नरयमसर्प यक्षिण्यादिकोपाद् भयम्।

**कुजः** - तृष्णाधिक्यम्, रक्तविकारः, पित्तज्वरः, अग्निविषशस्त्रघातभयं, कुष्ठः नेत्रविकारः, गुल्मरोगः, अपस्मारः, मज्जाविकारः, शारीरिकरूक्षत्वं, पामिका, अङ्गविकारः, राज-शत्रु-मित्रेभ्य उत्पीडनं, भ्रातृ-पुत्र-मित्रशत्रुभिः कलहः, गन्धर्वादिदुष्टात्मभिः कष्टं, शरीरस्योपरिभागे क्लेशः।

**बुधः** - विभ्रमः, वाग्दोषः, नेत्रकण्ठनासादोषः, ज्वरः, वातकफपित्तजव्याधयः, विषसेवनाद्रोगः, चर्मरोगः, पाण्डुरोगः, दुःस्वप्नः, विचर्चिका, पामिका, अग्नौ पतनभयं, बन्धनात् कठोरव्यवहाराच्च श्रान्तिः, गन्धर्वादिकुटिलेभ्यः कष्टम्।

**गुरुः** - गुल्मरोगः, आन्त्रविकृतिज्वरः, शोकजन्यव्याधयः, मूर्च्छा, कर्णविकारः, मोहः, देवस्थानसम्बन्धिःविवादात् कष्टं, ब्राह्मणशापात् क्लेशः, यक्षकिन्नरविद्याधरादिभ्यः उत्पीडनम्, विद्वद्भ्यः गुरुभ्यश्च दुर्व्यवहारात् कष्टम्।

**शुक्रः** - पाण्डुरोगः, वातकफविकारजव्याधयः, नेत्रविकारः, मूत्रविकारः, प्रमेहः, जननेन्द्रियविकारः, मूत्रकृच्छ्रं, मैथुनासामर्थ्यं, वीर्यस्रावः, शीघ्रपतनं, मैथुनाधिक्यात् कान्तिहीनता, क्षयः योगिनीयक्षिण्यादिभ्यो भयं, परमप्रियमित्रस्य मैत्रीभङ्गः।

**शनिः** - वातकफजव्याधयः, पादवैकल्यं, विपत्तिः, श्रान्तिः, तन्द्रा, भ्रान्तिः, कुक्षिरोगः, अन्तःशूलं, भृत्यनाशः, पार्श्वयोः क्लेशः, स्त्रीपुत्रादीनां क्लेशः अङ्गभङ्गः, मार्मिकवेदेना, वृक्षप्रस्तरादिभ्य आघातः, पिशाचादिभ्य उत्पीडनम्।

**राहुः** - हृत्तापः, कुष्ठं, बौद्धिकभ्रमः, विषयव्याधिः, पादरोगः, स्त्रीपुत्रादीनां कष्टम्, पिशाचसर्पादिभ्यः, कष्टम्।

**केतुः** - ब्राह्मणक्षत्रियविरोधात्कष्टं, शत्रुजन्यभयम्।

**गुलिकः** - प्रेतबाधा, विषभयं, दैहिकपीडनं, निकटात्मीयस्य मरणाद् आशौचम्।

**१०.७.२. विविधारोगाणां योगः** - इदानीं विविधानां रोगाणां योगा उच्यन्ते । तदित्थमवगच्छन्तु -

१. द्वितीयद्वादशयोः शनिकुजाभ्यां दृष्टः युतो वा रविः चन्द्रो वा - **नेत्ररोगः।**

२. तृतीयैकादशयोः शनिकुजाभ्यां दृष्टो युतो वा गुरुः - **कर्णरोगः।**

३. षष्ठेशेन अष्टमेशेन वा सह पञ्चमस्थः कुजः - **उदरव्याधिः।**

४. षष्ठेशोऽष्टमेशो वा सप्तमस्थः - **गुदामार्गे रोगः।**

५. षष्ठेशः अष्टमेशो वा शुक्रेण युतः सप्तमस्थः - **जननेन्द्रियविकारः।**

६. षष्ठाष्टमयोः एकत्र रविः - **ज्वरः।**

७. षष्ठाष्टमयोरेकत्र कुजः केतुर्वा- **व्रणम्।**

८. षष्ठाष्टमयोरेकत्र शुक्रः - **गुह्याङ्गे रोगः।**

९. षष्ठाष्टमयोरेकत्र गुरुः - **क्षयरोगः।**

१०. षष्ठाष्टमयोरेकत्र शानिः - **वातजव्याधिः।**

११. षष्ठाष्टमयोरेकत्र कुजो राहुर्वा - **कठिनव्रणम्**

१२. षष्ठाष्टमयोरेकत्र शनियुतः चन्द्रः - **प्लीहाशोधजव्याधिः।**

१३. जलराशौ पापग्रहैर्युतः क्षीणश्चन्द्रः षष्ठे अष्टमे वा अस्ति चेत् - **जलोदरः क्षयरोगः।**

### १०.७.३. मृत्युकारणम्

अष्टमभावस्थग्रहः, तदृष्टग्रहयोः यः बली तज्जन्यव्याधिना जातकस्य मरणं भवेत्। यदि अष्टमे कोऽपि न स्यात्, तं कोऽपि च न पश्येत् तर्हि अष्टमभावजन्यव्याधिना, अष्टमेशाधिष्ठितभावजन्यव्याधिना वा मृत्युः स्यात्। अष्टमेशः चतुर्थस्थश्चेत् हृद्रोगेण, पञ्चमस्थश्चेत् उदरव्याधिना, एवं कालपुरुषस्य अङ्गविभागानुसारं कल्पनीयम्।

लग्नात् खरद्रेष्काणस्य अधिपतिना जन्यव्याधिनाऽपि मृतिः स्यात्। रविः अग्निपित्त-ज्वरशस्त्राघातात् मरणं ददाति, चन्द्रः विषूचिजलोदरप्रभृतिभ्यः, कुजः रक्तस्रावात्, उत्तापात्, कुत्सिताभिचारात् शस्त्रघाताद्वा, बुधः पाण्डुरोगात्, रक्ताल्पताया, स्नायुजविकारात्, गुरुः कफावरोधात्, शुक्रः स्त्रीसंसर्गजन्यव्याधितः, शनिः वायुप्रकोपजन्यव्याधितः कफजन्यव्याधितो वा मरणं दद्यात्। राहुः मृत्युकारकश्चेत् कुष्ठेन, विषभोजनेन, विषकृमिदशनैः मसूरिकया वा रोगः भवति। केतुः मृत्युकारकश्चेत् अपमृत्युः विवादेन मृत्युः भवति।

### १०.७.४. राशिजन्यदोषः

अष्टमभावे कः राशिः भवति चेत् कीदृशः रोगः भवेत् इति कोष्ठके विचार्यते -

| अष्टमभावगतराशिः | रोगः |
|---|---|
| मेषः | पित्तजज्वरः, दाहः, यकृद्रोगः |
| वृषः | त्रिदोषकोपजव्याधिः, दाहः, शस्त्राघातः |
| मिथुनः | कासः, श्वासरोगः, पित्तदोषजशूलः |
| कर्कः | मानसरोगः, वायुविकारः |
| सिहः | वन्यपशुभ्य आघातः, ज्वरः, स्फोटः |
| कन्या | स्त्रीजन्यव्याधयः, गुह्याङ्गव्याधयः, उच्चस्थानात् पतनम् |
| तुला | मस्तिष्कज्वरः, सन्निपातादिः |
| वृश्चिक | प्लीहाविकारः, पाण्डुरोगः, सङ्ग्रहणी |
| धनुः | वृक्षपतनम्, काष्ठशस्त्राद्याघातः |
| मकरः | शूलः, अरुचिः, मानसरोगः |
| कुम्भः | श्वासकासौ, यक्ष्मा |
| मीनः | जले मज्जनं, जलीयव्याधिः जलोदरः |

अष्टमभावे पापराशिः पापग्रहश्चेत् शस्त्राघातः अग्निज्वलनं, वन्यपशुभ्यो भीतिश्च भवति। यदि पापग्रहद्वयं केन्द्रस्थं परस्परं पश्यतः तर्हि राज्ञः कोपः, शस्त्रविषादिभयं वा भवति।

### १०.७.५. ऊर्ध्वाधः गतिः

यदि द्वादशेशः उच्चे मित्राराशौ वा स्थितः सौम्यग्रहवर्गे सौम्यग्रहैर्युतो भवति तर्हि जीवः स्वर्गं प्राप्नोति, अन्यथा द्वादशेशः नीचस्थः शत्रुराशिगतो वा पापैः सम्बद्धश्चेत् जीवस्याधोगतिः भवति। वस्तुतस्तु द्वादशेशः, द्वादशस्थग्रहः द्वादशभावस्य नवांशराशौ स्थितो ग्रहः, एषु यः बलवान् तदनुसारं जीवस्य परजन्मविचारः कार्यः। यदि स ग्रहः रविः चन्द्रो वा

स्यात्तर्हि जीवः कैलासं कुजश्चेत् पृथिव्यामेव, बुधश्चेत् वैकुण्ठं गुरुश्चेत् ब्रह्मलोके शुक्रश्चेत् स्वर्गे, शनिश्चेत् यमपुरे, राहुश्चेत् लघुद्वीपे तथा केतुश्चेत् नरके निवत्स्यति।

### १०.७.६. पूर्वजन्मभविष्यजन्मज्ञानम्

नवमेशात् पूर्वजन्मनः पञ्चमेशात् भविष्यजन्मनो ज्ञानं कर्तव्यम्, एतेषां जातौ, दिशि, तद्दिक्स्थदेशे च जन्म वक्तव्यम्। यदि पञ्चमेशो नवमेशो वा उच्चस्थस्तर्हि देवलोके, शत्रुराशिस्थो नीचस्थो वा चेत् द्वीपान्तरे, मित्रराशिस्थश्चेत् भारतवर्षे निवासो वक्तव्यः। अर्थात् नवमेशः उच्चगतश्चेत् जीवः पूर्वजन्मनि देवलोकनिवासी इति वक्तव्यम् । इत्येवमन्यत्रापि। गुरोः आर्यावर्तेन, शुक्रचन्द्रयोः पुण्यनदीभिः सिञ्चितभूभागेन, बुधस्य तीर्थस्थानैः सह शनेः सम्बन्धः निन्दितभूम्या सह, रवेः पार्वत्यप्रदेशेन, कुजस्य कीकटप्रदेशेन सम्बन्धो भवति।

नवमेशः यदि स्थिरे अधोमुखे, पृष्ठोदये राशौ अथवा तन्नवांशे पापग्रहैः सह स्थितः स्यात् तर्हि जीवः पूर्वजन्मनि वृक्षलतादियोनौ भवति, एवं पञ्चमेशश्चेत् परजन्मनि तथा वक्तव्यम्, अन्यथा जीवस्य मनुष्ययोनिर्वक्तव्या। पञ्चमेशो नवमेशो वा उच्चस्थः स्वराशिस्थः अथवा लग्नेशस्य मित्रं चेत् जीवः पूर्वजन्मनि परजन्मनि वा मनुष्ययोनिं प्राप्स्यति इति वक्तव्यम्। यदि ग्रहः लग्नेशस्य समः तर्हि पशुयोनिः शत्रुः चेत् पक्षियोनिश्च वक्तव्या।

नवमेशपञ्चमेशौ समानराशिस्थौ चेत् जीवस्य स्वदेशे, समबलिनौ चेत् समानजातौ उत्पत्तिः वक्तव्या। ग्रहाणां वर्णधर्माद्यनुसारेण जातकस्य वर्णादिकं भवति।

## १०.८. आदर्शप्रश्नाः

१. पञ्चारिष्टयोगान् लिखत।

२. आयुर्भेदान् लिखत।

३. विविधग्रहेभ्य उत्पन्नान् रोगान् विशदयत।

४. विविधरोगाणां योगान् प्रतिपादयत।

५. पूर्वजन्मभविष्यजन्मज्ञानप्रकारं विशदयत।

# एकादशः खण्डः
# भावशुभाशुभभावसमुदायफलचिन्ताध्यायौ

## संरचना

११.१. प्रस्तावना

११.२. लक्षिताधिगमविशेषाः

११.३. भावशुभाशुभफलविचारः

११.४. भावनाशकग्रहाः

११.५. लग्नेशस्य शुभत्वविचारः

११.६. भावद्वयाधिपस्य फलम्

११.७. सन्धिगतग्रहाणां फलम्

११.८. सूर्यादिग्रहेभ्यो विचारणीयाः विषयाः

११.९. भावस्थग्रहाणां प्रभावः

११.१०. भावसमुदायफलचिन्ता

११.११. आदर्शप्रश्नाः

## ११.१. प्रस्तावना

अस्मिन् पाठे विद्यमानाः सर्वेऽपि अंशाः फलादेशार्थम् अत्यन्तमुपयुक्ताः मुख्याश्च भवन्ति। जातकदर्शनावसरे आदौ अस्माभिः लग्नादिद्वादशभावानां विचारः क्रियते। कस्मात् भावात् कः विचारः करणीय इति पाठस्यास्याध्ययनेन ज्ञायते। इत्येवं रीत्या भावशुभाशुभफलं तथा भावसमुदायफलमित्यध्यायद्वयोः विचारोऽत्र प्रस्तूयते।

## ११.२. लक्षिताधिगमविशेषाः

* भावशुभाशुभफलं ज्ञातुं प्रभवन्ति।

* सूर्यादिग्रहेभ्यः के विषयाः विचारणीयाः इति ज्ञानं सम्भवति।

* द्वादशभावानां कारकाः के भवन्तीति ज्ञानं भवति।

* तन्वादिभावानां चिन्तनक्रमं जानन्ति।

* भावसिद्धिकालविचारं ज्ञातुं प्रभवन्ति।

## ११.३. भावशुभाशुभफलविचारः

ये भावाः शुभैः ग्रहैः, स्वस्वामिभिः, शुभभावस्वामिभिः वा दृष्टो वा युतो वा भवति तथा पापग्रहेण युता अथवा दृष्टा न भवन्ति तेषां फलानि शुभानि भवन्ति। यदि भावस्य स्वामी पापग्रहो भवति किन्तु तस्मिन् भावे एव तिष्ठति, तं भावं पश्यति तथा पापग्रहेण असम्बद्धो भवति तर्हि अपि भावस्य वृद्धिर्जायते। एवं सर्वेऽपि ग्रहा यदि नीचस्थिताः शत्रुगृहस्थिताः वा न भवन्ति तथा सूर्यरश्मिभिः अस्तङ्गता न भवन्ति तर्हि स्वीयभावस्य वृद्धिं कुर्वन्ति। एतदेवोक्तं पराशरेण --

**यो यो भावः स्वामिदृष्टो युतो वा**
**स्मैम्यैर्वा स्यात्तस्य तस्याभिवृद्धिः।**
**पापैरेवं तस्य भावस्य हानिर्-**
**निर्दिष्टव्या जन्मतः प्रश्नतो वा।।**

उक्तञ्च जातकपारिजाते --

**ये ये भावाः सितज्ञामरगुरुपतिभिः संयुता वीक्षिता वा।**

**नान्यैर्दृष्टा न युक्ता यदि शुभफलदा मूर्तिभावादिकेषु।।**

यदि एकस्मात् भावात् द्वितीये, पञ्चमे, नवमे (त्रिकोणे), चतुर्थे, सप्तमे, दशमे केन्द्रे शुभग्रहाः भवन्ति, तथा भावाधिपः पापदृष्टो न भवति तर्हि भावः बली भवति। अन्यथा द्वितीये, केन्द्रे त्रिकोणे वा पापग्रहा भवन्ति तथा पापग्रहैः दृष्टो भवति तर्हि भावफलं नश्यति। यदि केन्द्रादिस्थलेषु पापाः शुभाः च भवन्ति भावेशः पापैः शुभैः च दृष्टो भवति तर्हि भावस्य फलमपि मिश्रं भवति। एतदेव वक्तुं शक्यते --

| | | | |
|---|---|---|---|
| | लग्नम् कुजः | चन्द्रः | शनिः |
| राहुः | | | गुरुः |
| | | | केतुः |
| | सूर्यः शुक्रः | बुधः | |

अत्र प्रथमभावाधिपः स्वक्षेत्रस्थितः, सौम्यग्रहेण दृष्टः भवति, तथा अस्य द्वितीये चतुर्थे सप्तमे शुभग्रहाः सन्ति, अतः तस्य भावस्य वृद्धिः भवति। तथा च तृतीयभावस्य अधिपतिः बुधः पापेन दृष्टः, तस्य केन्द्रे, शनिः (पापग्रहः) भवति। अतः तस्य भावस्य नाशः वक्तुं शक्यते।

यदि भावाधिपः अष्टमस्थः, सूर्यरश्मिना अस्तङ्गतः, नीचस्थः, शत्रुराशिस्थितो वा भवति तथा शुभैः दृष्टो वा युक्तो वा न भवति तर्हि तद्भावस्य नाशः भवति। तादृशः ग्रहः नाम अस्तङ्गतो, नीचस्थः शत्रुराशिस्थो वा ग्रहः शुभैः अयुक्तः अदृष्टो भूत्वा यस्मिन् भावे तिष्ठति तस्य भावस्यापि हानिं साधयति।

कस्माच्चित् भावात् षष्ठे, अष्टमे, द्वादशे च पापग्रहाः भवन्ति तर्हि भावफलं नश्यति। उक्तस्थलेषु शुभग्रहाः सन्ति चेदपि भावस्य पूर्णं फलं न लभ्यते। भावाधिपः षष्ठे अष्टमे द्वादशे वा स्थितश्चेत् तस्य भावस्य फलं नश्यति। यदि भावाधिपः षष्ठादिषु स्थितः शुभग्रहैः युक्तो दृष्टो वा भवति तर्हि तस्य भावस्य किञ्चित् फलं लभ्यते। एतदेवोक्तम् --

**यद्भावनाथो रिपुरन्ध्ररिःफे दुःस्थानपो यद्भवनस्थितो वा।**

**तद्भावनाशं कथयन्ति तज्ज्ञा शुभेक्षितस्तद्भवनस्य सौख्यम्।।**

यदि भावस्य स्वामी भावकारको ग्रहो निर्बलो भवेत् पापद्वयस्य मध्ये स्थितो भवेत्, शुभग्रहैः मित्रग्रहैर्वा दृष्टो न स्यात् अथवा भावात् चतुर्थे, अष्टमे, द्वादशे, त्रिकोणे वा पापग्रहः भवेत् तर्हि भावफलं नश्यति। उक्तस्थितिषु स्थितिद्वयं स्तितित्रयं वा जन्माङ्गे भवति चेत् भावफलं पूर्णतया नश्यति। अयमत्र सङ्ग्रहः --

**११.३.१.शुभफलम्**

१. भावाधिपः स्वराशिस्थः, उच्चस्थः, मित्रराशिस्थः, शुभैः दृष्टो युक्तो वा।

२. भावात् द्वितीये, केन्द्रे, त्रिकोणे शुभग्रहाः सन्ति।

३. भावकारको ग्रहः सबलः अस्ति।

४. भावः भावाधिपेन, शुभग्रहैः उच्चस्थग्रहेण वा दृष्टः।

### ११.३.२.अशुभफलम्

१. भावाधिपः नीचस्थः शत्रुराशिगतः पापैः दृष्टो युक्तो वा।

२. भावात् द्वितीये, केन्द्रे, त्रिकोणे पापग्रहाः।

३. भावात् षष्ठाष्टमद्वादशेषु पापग्रहाः सन्ति।

४. भावाधिपः षष्ठाष्टमद्वादशेषु अस्ति।

५. भावः पापैः नीचस्थग्रहेण वा दृष्टः।

६. भावकारकः निर्बलः अस्ति तथा पापद्वयस्य मध्ये अस्ति।

## ११.४. भावनाशकग्रहाः

इदानीं के के ग्रहाः भावफलं नाशयन्ति कस्याञ्च स्थितौ तथा कुर्वन्तीति विचार्यते। विचारणीयभावात् अष्टमस्य स्वामी, तद्भावस्य खरद्रेष्काणस्य (द्वाविंशतिततमद्रेष्काणस्य) स्वामी षष्ठे, सप्तमे, अष्टमे स्थितो ग्रहः यदि निर्बलः भवति तर्हि स्वदशायामेते ग्रहाः विचार्यभावस्य फलं नाशयन्ति। एवमेव कस्माच्चित् भावात् तृतीये, षष्ठे, एकादशे पापग्रहः तथा च केन्द्रे त्रिकोणे च बलवान् शुभग्रहः अथवा भावाधिपस्य मित्रग्रहः तत्रास्ति चेत् ते ते ग्रहाः स्वदशायां भावस्य वृद्धिं कुर्वन्ति। एतच्च इत्थं ज्ञातव्यम् --

| | | | |
|---|---|---|---|
| | शनिः | | कुजः |
| केतुः | | | लग्नम् |
| गुरुः | | | राहुः |
| | सूर्यः बुधः | शुक्रः | चन्द्रः |

अत्र प्रथमभावात् अष्टमस्य स्वामी शनिः नीचस्थः। अतः शनिः स्वदशायां प्रथमभावस्य नाशं करिष्यति। एवमेव द्वितीयभावात् केन्द्रे तद्भावाधिपः रविः, बुधश्च वर्तते, एवञ्च तस्मादेकादशे पापग्रहः वर्तते। एते स्वदशायां तद्भावस्य वृद्धिं कुर्वन्ति। एवञ्च --

१. जन्मलग्नाद् राशेर्वा तृतीयस्य स्वामी

२. अष्टमस्थो ग्रहः

३. अष्टमभावस्य द्रष्टा ग्रहः

४. शनिः

५. खरद्रेष्काणस्य स्वामी

६. गुलिकराशेः स्वामी

७. भावाधिपः यस्मिन् राशौ नवांशे च वर्तते तस्य स्वामी

८. राहुः

एते त्रिकस्थाः भूत्वा पापाक्रान्ता भूत्वा निर्बला भवन्ति चेत् एते स्वदशायां विचार्यभावस्य नाशं कुर्वन्ति। लग्नेशेन दृष्टो युतो वा ग्रहः यस्य भावस्याधिपतिर्भवति तस्याभिवृद्धिं लग्नेशः करोति। भावाधिपतिः दुःस्थाने तिष्ठति चेत् भावफलं नश्यति। तत्रापि भावाधिपः निर्बलश्चेत् अधिका हानिः सबलश्चेत् हानिः न्यूना भवति।

## स्वावलोकनप्रश्नः

**१. भावफलसिद्धान्तान् लिखत ?**

## ११.५. लग्नेशस्य शुभत्वविचारः

लग्नेशस्तु सदैव शुभं फलं प्रददाति। लग्नेशः यस्मिन् भावे तिष्ठति तस्य सदैव वृद्धिं करोति। लग्नेशः षष्ठाष्टमद्वादशानां स्वामी भवति चेदपि लग्नेशत्वात् शुभमेव ददाति। दुःस्थानेशत्वाद् अशुभं न ददाति। यथा कुजः यदि सिंहे मीने वा लग्नेशो भूत्वा तिष्ठति, तर्हि स षष्ठेशो वा अष्टमेशो वा भूत्वाऽपि पञ्चमभावस्य हानिं न करोति। यदि स शुभग्रहैर्दृष्टश्चेत् शीघ्रं सन्तानप्राप्तिं फलयति। इदमित्थम् -







१. अत्र कुजः अष्टमेशश्चेत् अपि पञ्चमभावस्य वृद्धिं करोति।

२. अत्र कुजः षष्ठेशश्चेदपि पञ्चमभावस्य वृद्धिं करोति।

## ११.६. भावद्वयाधिपस्य फलम्

यदि ग्रहः भावद्वयस्य स्वामी भवति, भावद्वयस्य मध्ये एकः भावः तस्य मूलत्रिकोणं भवति तर्हि तस्य भावस्य विकासः भवति। तस्यैव भावस्य पूर्णं फलं स ग्रहो ददाति, अन्यभावस्य अर्धमेव फलं ददाति। यथा -- वृषभलग्नजातकस्य द्वितीयेशः पञ्चमेशश्च बुधः भवति। बुधस्तु पञ्चमभावस्यैव फलं ददाति द्वितीयस्य फलम् अर्धं ददाति।

भावाधिपस्य दशायां भावद्वयस्यापि फलं लभ्यते। तत्र प्रथमं यः भावः भवति तस्य फलं दशायाः पूर्वार्धे द्वितीयार्धे च अन्यस्य भावस्य फलं प्रददाति। मतान्तरेण तु यदि भावेशः विषमराशिस्थितः भवति तर्हि दशायाः पूर्वार्धे यः भावः विषमराशौ भवति तस्य फलम् उत्तरार्धे अन्यभावस्य फलं ददाति। एवमेव भावेशः समराशिस्थितो भवति चेत् यः भावः समराशौ भवति तस्य फलं दशायाः पूर्वार्धे उत्तरार्धे अन्यभावस्य फलं ददाति। भावाधिपतेः अधिशत्रुग्रहस्य दशायाम् अष्टकवर्गे शुभबिन्दुरहितराशिस्थितग्रहस्य दशायां तस्य भावस्य हानिर्जायते।

## ११.७. सन्धिगतग्रहाणां फलम्

स्थानदिगादिषड्बलैर्युक्तोः ग्रहः स्वोच्चे वा मित्रराशौ स्थितो वा स्वदशायामन्तर्दशायां शुभं फलं न दद्यात् यदि सः भावसन्धौ तिष्ठति। अतः दशाफलकथनसमये ग्रहो भावसन्धौ अस्ति वा न वेति विचारणीयम्।

## ११.८. सूर्यादिग्रहेभ्यो विचारणीयाः विषयाः

इदानीं सूर्यादिग्रहेभ्यः कस्य कस्य भावस्य विचारः क्रियते इति विचार्यते। अत्र त्वयं श्लोकः --

**सूर्यादात्मपितृप्रभावनिरुजां शक्तिं श्रियं चिन्तयेत्**

**चेतोबुद्धिनृपप्रसादजननीसम्पत्करश्चन्द्रमाः।**

**सत्त्वं रोगगुणानुजावनिरिपुज्ञातीन्धरासूनुना**

**विद्याबन्धुविवेकमातुलसुहृद्वाकर्मकृद्बोधनः।।**

सूर्यादात्मा, पिता, प्रभावः, नैरोग्यता, शक्तिः, सौभाग्यम् इत्यादीनां, चन्द्रात् चैतन्यं, बुद्धिः, राजकृपा, माता, सम्पद् इत्येषां बुधाच्च विद्यायाः, बन्धोः, विवेकस्य, मातुलस्य मित्रस्य वाचश्च विचारः कर्तव्यः। एवमेव गुरोः बुद्धेः, धनस्य, शरीरस्य, पुत्रस्य, ज्ञानस्य, शुक्रात् भार्यायाः, वाहनस्य, आभूषणस्य, कामस्य, व्यापारस्य, सुखस्य, शनेः आयुषः, जीवनस्य, मरणहेतोः, विपत्तेः, भृत्यानां च राहोः पितामहस्य केतोः मातामहस्य विचारः कर्तव्यः। एतत्तु इत्थं ज्ञातव्यम् --

| ग्रहः | भावः |
|---|---|
| सूर्यः | पिता, प्रभावः, नैरोग्यं, शक्तिः, सौभाग्यम्। |
| चन्द्रः | चैतन्यं, बुद्धिः, राजकृपा, माता, सम्पद्। |
| कुजः | सत्त्वं, रोगः, गुणाः, अनुजीविनः, रिपवः, ज्ञातिः। |
| बुधः | विद्या, बन्धुः, विवेकः, मातुलः, मित्रं, वाक्। |
| गुरुः | बुद्धिः, धनं, शरीरं, पुत्रः, ज्ञानम्। |

| ग्रहः | भावः |
|---|---|
| शुक्रः | भार्या, वाहनम्, आभूषणम्, कामः, व्यापारः, सुखम्। |
| शनिः | आयुः, जीवनं, मरणहेतुः, विपत्तिः, भृत्यः। |
| राहुः | पितामहः |
| केतुः | मातामहः |

### ११.८.१. द्वादशभावानां कारकाः

इदानीं कस्य भावस्य कः कारकः इति विचारयामः, उक्तम् --

**द्युमणिरमरमन्त्री भूसुतः सोमसौम्यौ**

**गुरुरिनतनयारौ भार्गवो भानुपुत्रः।**

**दिनकरदिविजेज्यौ जीवभानुज्ञमन्दाः**

**सुरगुरुरिनसूनुः कारकाः स्युर्विलग्नम्।।**

लग्नादिभावानां यथाक्रमं - १. सूर्यः २. गुरुः ३. कुजः ४. बुधः चन्द्रश्च ५. गुरुः ६. शनिः ७. शुक्रः ८. शनिः ९. सूर्यः १०. गुरुः, सूर्यः, बुधः, शनिश्च ११. गुरुः १२. शनिः - इमे कारका भवन्ति। एतत्तु इत्थं ज्ञायताम् --

| भावः | ग्रहाः | भावः | ग्रहाः |
|---|---|---|---|
| प्रथमः | सूर्यः | द्वितीयः | गुरुः |
| तृतीयः | कुजः | चतुर्थः | बुधः, चन्द्रः |
| पञ्चमः | गुरुः | षष्ठः | शनिः |
| सप्तमः | शुक्रः | अष्टमः | शनिः |
| नवमः | सूर्यः, गुरुः | दशमः | गुरुः, रविः, बुधः, शनिः |
| एकादशः | गुरुः | द्वादशः | शनिः |

पराशरस्य मते तु एकस्य भावस्य एक एव कारकग्रहो भवति। तथाहि --

**सूर्यो गुरुः कुजः सोमो गुरुर्भौमः सितः शनिः।**

**गुरुश्चन्द्रसुतो जीवो मन्दश्च भावकारकाः।।**

अर्थात् - रविः, गुरुः, कुजः, चन्द्रः, गुरुः, कुजः, शुक्रः, शनिः, गुरुः, बुधः, गुरुः, शनिश्च यथाक्रमं प्रथमादि भावानां कारकाः।

## ११.९. भावस्थग्रहाणां प्रभावः

लग्नादिभावेषु स्थितानां ग्रहाणां प्रभावः तत्रत्यराशेः प्रकृतिम् आलोच्य वक्तव्यः। यथा भावस्य राशिः भावस्थग्रहस्य स्वराशिः उच्चराशिः, मित्रग्रहस्य राशिः, शत्रुग्रहस्य राशिः नीचराशिः स्यात्। एवं स्थितौ यदि भावस्थराशिः भावस्थग्रहस्य स्वराशिः, उच्चराशिः, शत्रुग्रहस्य राशिर्वा भवति तर्हि भावस्य वृद्धिं करोति, यदि नीचराशिः, शत्रुग्रहस्य राशिर्वा भवति तर्हि भावस्य हानिं करोति, यदि समराशिः स्यात्तर्हि न वृद्धिं न हानिं करोति।

सत्याचार्यमते तु शुभग्रहः अभिवृद्धिं करोति, पापग्रहः भावहानिं करोति। किन्तु पापग्रहः अशुभस्थाने शुभं फलं ददाति, शुभग्रहः अशुभस्थाने नाम षष्ठाष्टमद्वादशस्थानेषु अशुभं फलं ददाति। उक्तञ्च --

**पापग्रहाः षष्ठमृतिव्ययस्थास्तद्भाववृद्धिं कलयन्ति दोषैः।**
**शुभास्तु तद्भावलयं हि तस्मात्तन्वाभावात्फलप्रणाशः।।**

यस्य भावस्य फलं विचारणीयं तं भावं लग्नत्वेन गृहीत्वा ततो द्वादशराशिषु ग्रहस्थितिं ग्रहाणां परस्परसम्बन्धादीनां च विचारं कृत्वा फलं वक्तव्यम्। पितृमातृसहोदर - पुत्रादीनां विषये फलकथनसमये तेषां कारकग्रहाः यस्मिन् भावे भवन्ति तं भावं लग्नत्वेन गृहीत्वा विचारः कर्तव्यः।

सूर्यराशिं लग्नं कृत्वा जातकस्य जनकस्य विषये विचारः कार्यः। तस्य लग्नात् पितुः स्वरूपस्य, द्वितीयात् पितुः आर्थिकस्थितेः, ख्यातेश्च विचारः, तृतीयात् पितृव्यस्य, जनकस्य चरित्रस्य च चतुर्थात् पितामह्याः तथा जनकस्य शरीरिकस्थितेः, पञ्चमात् जनकस्य बौद्धिकशक्तेः, षष्ठात् पितुः कष्टस्य, विपत्तेः, रोगस्य, शत्रूणां च, सप्तमात् काममदादीनाम्, अष्टामात् मृत्योः, आयुष्यस्य, नवमात् पुण्यशुभसौभाग्यादीनां दशमात्, एकादशात् आयादीनां, द्वादशाच्च

व्यवक्षयादीनां विचारः कार्यः। एवं चन्द्रमसो राशेः मातुः, कुजस्य राशेः सहोदरादीनां च विचारः कर्तव्यः।

**११.९.१. भावबाधका ग्रहाः**

अथ के ग्रहाः कस्मिन् भावे स्थिताः भावफलस्य हानिं कुर्वन्तीति विचारयामः।

नवमे भावे रविः, चतुर्थे चन्द्रः, तृतीये कुजः, पञ्चमे गुरुः, सप्तमे शुक्रः, अष्टमे शनिः तस्य तस्य भावस्य हानिं कुर्वन्ति। लग्नेशः यस्य भावस्य अधिपतिना सह तिष्ठति तस्य भावस्य वृद्धिं करोति। किन्तु भावः भावेशश्च निर्बलश्चेत् भावफले हानिर्दृश्यते उक्तम् --

**लग्नेश्वरो यद्भवनेशयुक्तो यद्भावगस्तस्य फलं ददाति।**

**भावे तदीशे बलभाजि तेन भावेन सौख्यं व्यसनं बलोने।।**

लग्नेशस्य अष्टकवर्गे येषु भावेषु शुभबिन्दवः अधिका भवन्ति तथा येषां स्वामिनः बलयुताः सन्तः लग्नेशेन मिलिता भवन्ति, तेषां भावानां वृद्धिर्दृश्यते। एवं ये भावा शुभबिन्दुभिः अत्युक्तः येषां स्वामिनः, निर्बला लग्नेशेन मिलिता भवन्ति तेषां भावानां हानिर्भवति। दुःस्थानस्य स्वामी भावान्तरे स्वराशिगतो भवति चेत्, स्वदशायां स्वराशिगतभावस्य फलं ददाति। यथा शनिः पञ्चमेशः षष्ठेशः च भवति चेत् पञ्चमेशस्य फलं ददाति।

## स्वावलोकनप्रश्नः

**२. तन्वादि द्वादशभावानां कारकाः के ?**

## ११.१०. भावसमुदायफलचिन्ता

इदानीं भावानामेकैककशः फलमुच्यते -

### ११.१०.१. तनुभावफलम्

लग्नः यस्य राशेः नवांशे स्थितं भवति तस्य स्वामिग्रहस्य इव, अथवा बलितमग्रहस्येव जातकस्य शरीरं भवति। चन्द्रः यस्य राशेर्नवांशे तिष्ठति तदनुसारं जातकस्य वर्णः भवति, कालपुरुषस्य विविधेषु अङ्गेषु स्थितानां राशीनामनुसारेण जातकशरीरस्य तत्तदङ्गानि भवन्ति।

कालपुरुषस्य यस्मिन् अङ्गे ह्रस्वो राशिः भवति जातकस्य तदङ्गं ह्रस्वं भवति। एवं यस्मिन्नङ्गे दीर्घो भवति तदङ्गं दीर्घं भवति। कालपुरुषस्य यदङ्गं पापग्रहैर्युतं भवति जातकस्य तदङ्गं दुर्बलं यदङ्गं शुभग्रहैर्युतं भवति तदङ्गं सबलं भवति।

यदि लग्नेशः स्वराशौ स्वोच्चे वा स्थितः सूर्यात् दूरे च स्थितः केन्द्रगः, त्रिकोणस्थो वा भवति, तथा अष्टमेशः शुभग्रहैः युतः सन् केन्द्रत्रिकोणभिन्ने स्थाने भवति तर्हि जातकः आयुष्मान्, धनवान्, सुखी, प्रशंस्यः, सद्गुणी, वैभववान्, पुष्टः, सुन्दरः, निर्भीकः, धार्मिकः, सत्कुटुम्बस्य स्वामी भवति। तदुक्तम् --

**लग्नेशे केन्द्रकोणे स्फुटनिकरे स्वोच्चभे वा स्वभे वा**
**केन्द्रादन्यत्र संस्थे निधनभवनपे सौम्ययुक्ते विलग्ने।**
**दीर्घायुष्मान्धनाढ्यो महितगुणयुतो भूमिपालप्रशस्तो**
**लक्ष्मीवान् सुन्दराङ्गो दृढतनुरभयो धार्मिकः सत्कुटुम्बी।।**

लग्नेशः शुभग्रहयुतः भवति चेत् जातकः सुग्रामे सज्जनैः साकं निवसति। लग्नेशः बलवता ग्रहेण युक्तश्चेत् जातकः ख्यातिं राजाश्रयं प्राप्नोति लग्नेशः उच्चस्थश्चेत् राजा भवति। स्वगृही चेत् स्वजन्मभूमावेव निवसति। लग्नेशः चरराशौ भवति चेत् निवासे स्थैर्यं न भवति स्थिरे राशौ चेत् स्थायिन्यावासे निवसति, द्विस्वभावराशौ चेत् कदाचित् स्थायिनि कदाचित् अस्थाय्यावासे वासः भवति।

यदि लग्नेशः उज्ज्वलैः किरणैर्युक्तो भूत्वा केन्द्रे त्रिकोणे वा भवति तर्हि जातकः विख्यातः सुखी, विकासशीलश्च भवति लग्नेशः दुःस्थाने पापग्रहराशौ, नीचे, शत्रुराशौ भवति चेत् जातकः दुःखी निन्द्यस्थानवासी भवति। लग्नः बलवान् चेत् जातकः दीर्घायुष्मान् विकासशीलः प्रसन्नचितश्च भवति। लग्नः दुर्बलश्चेत् जातकः विपत्तिग्रस्तः खिन्नश्च भवति।

### ११.१०.२. द्वितीयभावचिन्ता

द्वितीयेशः लग्ने शुभग्रहैर्युक्तो भवति चेत् जातकः सम्पन्नः, गुणसम्पन्नः, धनिकः, मृदुभाषी, दूरदर्शी च भवति। यदि लग्नेशः द्वितीये भवति तदानीमपि जातकः धनी भवति। उक्तं जातकपारिजाते --

**धनस्थे यदि लग्नेशे निधिमान् बलसंयुते।**

**दुर्बले पापसंयुक्ते वञ्चनापि फलं वदेत्।।** इति।

यदि द्वितीयेशः रविणा युक्तो भवति तर्हि जातकः लोकोपकारकः, विद्यावान् धनवान् भवति यदि शनिना सम्बद्धश्चेत् निकृष्टविद्यायां पारङ्गतो भवति। द्वितीयेशः गुरुणा युक्तश्चेत् जातकः वेद-धर्मशास्त्रादिषु निष्णातः, बुधेन युक्तश्चेत् अर्थशास्त्रवेत्ता, शुक्रयुक्तश्चेत् शृङ्गारे कुशलः, चन्द्रयुक्तश्चेत् कलाविद्, कुजयुतश्चेत् क्रूरक्रर्मनिरतः, राहुणा युतः, कोलाहलप्रियः, केतुयुतश्चेत् जातकः भ्रष्टः भवति। द्वितीयभावे पापग्रहः भवति चेत् जातकः मूर्खो निर्धनश्च भवति।

### ११.१०.३.तृतीयभावचिन्ता

लग्नेशः तृतीयेशश्च परस्परयोः स्थाने भवतश्चेत् जातकः धीरः, वीरः, बन्धूनां सहयोगी तथा साहसिककार्येषु पटुर्भवति। तृतीयेशः बलवान् शुभग्रहैर्युतो भवति तथा तृतीयभावकारकोऽपि बली भवति चेत् जातकस्य भात्रादीनां वृद्धिर्भवति। ते ग्रहाः निर्बलाः दुःस्थानस्थाश्चेत् भातृनाशः वक्तव्यः। उक्तञ्च --

**सौम्यग्रहान्विते वाऽपि सौम्यनवांशके यदि।**

**नाथे वा कारके वाऽपि भावे सोदरवर्धनम्।।**

तृतीयेशः भावकारकश्च विषमे स्थितो गुरुणा रविणा कुजेन च दृष्टः तथा तृतीयभावे विषमराशिश्चेत् तृतीये भावे उदितनवांशस्य सङ्ख्यातः सोदराणां सङ्ख्या ज्ञातव्या।

### ११.१०.४. चतुर्थभावचिन्ता

चतुर्थेशः चन्द्रमाः च यदि षष्ठाष्टमद्वादशेषु स्थितः, शुभग्रहैः अयुतः पापग्रहैश्च दृष्टः पापग्रहाणां मध्ये वा स्थितो भवति तर्हि मातुः मृत्युकारकः भवति। यदि चन्द्रश्चतुर्थेशश्च बलिनौ शुभग्रहैः युतौ दृष्टौ वा स्यातां चतुर्थे शुभग्रहः स्यात् तर्हि माता सुखिनी भवति। चन्द्रः केन्द्रे त्रिकोणे वा भवति चेद् मातुः सुखं वक्तव्यम्।

यदि लग्नेशः चतुर्थे अथवा चतुर्थेशः लग्ने स्यात् तथा एतयोरेकः चन्द्रेण दृष्टः स्यात् तर्हि जातकः मातुः संस्कारम् अवश्यमेव करोति। यदि चतुर्थेशः लग्नेशः शत्रुराशौ लग्नेशश्च चतुर्थेशस्य शत्रुराशौ स्यात् अथवा परस्परं नीचराशौ स्यात् अथवा षष्ठाष्टमयोः स्यात् तर्हि जातकः मातुः संस्कारं न करोति।

मातृभावस्येव पितृभ्रात्रादिभावानामपि फलं विचारणीयम्। यदि चतुर्थेशः लग्ने शुक्रश्च चतुर्थे सुखपूर्वकम् आस्ते तर्हि जातकः वाहनादिसुखं राजवैभवं च प्राप्नोति। तथैव स्वर्णाभूषणानि, वस्त्रं, शय्या, गौः, हस्ती, अश्वः इत्यादीनां सुखमपि प्राप्नोति।

अत्र इदमवधर्तव्यं यत् लग्नेशः शुक्रो वा यदि स्वराशौ स्वोच्चे, मित्रराशौ अनस्तंगतो वा स्यात्तर्हि तयोः सुखपूर्विका स्थितिः वक्तुं शक्यते। अन्यथा ग्रहः विकलः सन् विपरीतं फलं दद्यात्। चतुर्थेशः यदि दुःस्थाने रविकुजाभ्यां युक्तः तिष्ठति, अथवा चतुर्थे रविकुजौ तिष्ठतः तर्हि जातकस्य जन्मस्थली अग्निदग्धा भवति। चतुर्थेशः दुःस्थानस्थः शनिराहुभ्यां युतश्चेत् जन्मस्थानं जीर्णं शीर्णं भवति। एवञ्च चतुर्थेशः दुःस्थाने शत्रुणा युतश्चेत् जातकस्य भूवाहनादीनां नाशः भवति।

### ११.१०.५. पञ्चमभावचिन्ता

यदि पञ्चमे बुधस्य राशिः, बुधस्यैव नवांशः, पश्चिमे बुधः स्वयं वा तिष्ठेत् तथा पञ्चमस्य स्वामी वैशेषिकांशेन युक्तः शुभे भावे स्यात्तर्हि जातकः बुद्धिमान् निष्कपटी च भवति। तदुक्तम् --

**सौम्यक्षारो सौम्ययुक्ते पञ्चमे वा तदीश्वरे।**

**वैशेषिकांशे सद्भावे धीमान्निष्कपटी भवेत्॥**

### ११.१०.६. षष्ठभावचिन्ता

यदि --

१. षष्ठे पापग्रहः स्यात्

२. लग्नेशः बलवान् भूत्वा षष्ठेशेन युतः दुष्टो वा स्यात्

३. लग्नेशः षष्ठे स्यात्

४. षष्ठेशः केन्द्रे पापग्रहैर्युतो दृष्टो वा स्यात्तर्हि जातकः निरन्तरं शत्रुभिः पीडितः भवति।

षष्ठेशात् लग्नेशः बलवान् स्यात्, शुभग्रहस्य नवांशे स्यात्, शुभग्रहेण युतो दृष्टो वा चतुर्थेशः केन्द्रे कोणे वा स्यात् चेत् जातकः नीरोगः पुष्टशरीरः भाग्यवांश्च भवति। यदि नीचस्थः, शत्रुराशिस्थः अस्तङ्गतो वा षष्ठेशः दुःस्थाने भवति, लग्नेशः बलवान् भवति, सूर्यश्च नवमे तिष्ठति तर्हि जातकस्य शत्रवो नाशं यान्ति। षष्ठेशः यस्य भावस्याधिपतिना सह तिष्ठति तद्भावस्य नाशं करोति। षष्ठेशः यस्मिन् भावे तिष्ठति तस्यापि नाशं करोति। यद्भावाधिपः षष्ठे स्यात् तद्भावस्यापि नाशः भवति। उक्तं च --

**यद्भावेशयुतो वैरिनाथो यद्भावसंश्रितः।**

**षष्ठस्थितो तद्भावेशस्ते भावाः शत्रुतां ययु॥**

### ११.१०.७. सप्तमभावचिन्ता

यदि सप्तमः शुभग्रहेण युक्तो दृष्टो वा भवेत् तथा सप्तमेशः बलवान् स्यात्तर्हि पत्नी साध्वी सौभाग्यवती च भवति।

### ११.१०.८. अष्टमभावचिन्ता

यदि अष्टमेशः लग्नेशाद्दुर्बलः सन् केन्द्रेतरस्थाने स्थितः भवति तर्हि जातकः नीरोगः बाधादुःखादिरहितः दीर्घायुष्मान् भवति।

### ११.१०.९. नवमभावचिन्ता

यदि नवमे कुजः सूर्यो वा स्यात् तथा नवमेशः दुःस्थाने स्यात् अथवा नवमेशः पापग्रहमध्यगतो भवेत् तर्हि जनकस्य मरणं स्यात्।

**धर्मे कुजे वा सूर्ये वा दुःस्थे तन्नायके सति।**
**पापमध्यगते वाऽपि पितुर्मरणमादिशेत्।।**

दिवाकाले जातस्य सूर्यः निशायां जातस्य शनिर्वा यदि शुभस्थानगतः शुभैर्युतो दृष्टो वा स्यात्तर्हि जातकस्य पिता दीर्घायुष्मान् भवति। यदि कुजात् शनेर्वा रविः चन्द्रः वा पञ्चमे वा नवमे वा स्यात्तर्हि जातकः पितृमातृपरित्यक्तः भवेत्। किन्तु तदुपरि गुरोर्दृष्टिरस्ति चेत् जातकः शुभैरदृष्टः चरे राशौ स्थितः स्यात्तथा सूर्यः दुःस्थाने स्यात्तर्हि जातकः अन्येन पाल्यते।

### ११.१०.१०.दशमभावचिन्ता

यदि दशमे शुभग्रहः स्यात् दशमेशः स्वराशौ स्वोच्चे वा केन्द्रे त्रिकोणे वा स्यात् अथवा लग्नेशः दशमे स्यात् तर्हि जातकः धार्मिकबुद्धिवृत्तियुतः, प्रथितयशाः राजेव भाग्यशाली दीर्घायुश्च भवति। दशमे यदि रविः कुजो वा स्यात्तर्हि जातकः ओजस्वी जनप्रियश्च भवति। दशमेशः यदि शुभस्थाने स्यात् तर्हि जातकः स्वपराक्रमेण महत्कार्यं साधयति यदि दशमे शुभग्रहाः भवन्ति तर्हि लाभकराणि कीर्तिकराणि च कर्माणि करोति। यदि दशमे शनिः, राहुः, केतुर्वा स्यात्तर्हि जातकः दुष्कृती भवति।

### ११.१०.११. एकादशभावचिन्ता

एकादशेशः यस्य भावस्य अधिपेन सह तिष्ठति, यस्मिन् भावे तिष्ठति, तथा तस्य भावस्य स्वामी एकादशे तिष्ठति तेषां भावानां वृद्धिः स्यात्।

### ११.१०.१२. द्वादशभावचिन्ता

यस्य भावस्य स्वामी व्ययभावे तिष्ठति व्ययेशश्च यत्र तिष्ठति भावद्वयस्यापि हानिर्भवति।

### ११.१०.१३. भावसिद्धिकालः

भावेशः यस्मिन् राशौ नवांशे च तिष्ठति तस्मात् पञ्चमे, नवमे भावस्य राशिश्च इतीमेषु राशिषु लग्नेशस्य गोचरवशात् सङ्क्रमणकाले भावफलस्य सिद्धिर्भवति। एवं लग्नेशाधिष्ठितराशेः तस्य नवांशाच्च पञ्चमनवमयोः लग्ने च यदा गोचरवशात् भावेशस्य

सङ्क्रमणं भवति तदाऽपि भावसिद्धिर्ज्ञातव्या। गोचरवशात् लग्नेशः भावेशश्च यदा परस्परं युतो दृष्टो वा भवतः तदापि भावसिद्धिः स्यात्।

भावेशाधिष्ठितराशौ तस्मात् पञ्चमे नवमे भावेशनवांशे तस्मात्पञ्चमे नवमे च गोचरवशात् गुरुसङ्क्रमणकाले भावफलं सिध्यति। गोचरवशात् लग्नेशषष्ठेशयोः युतौ लग्नेशः षष्ठेशात् बली चेत् जातकः शत्रून् विजयते। षष्ठेशः बली चेत् विपरीतं भवेत्। तदुक्तम् --

**लग्नरिनाथयोगे तु लग्नेशाद्दुर्बले रिपौ।**

**तदा तद्वशगः शत्रुर्विपरीतमतोऽन्यथा।।**

भावः लग्नेशश्च परस्परं नैसर्गिकः तत्कालिको वा रिपुः सन् परस्परात् षष्ठाष्टमे स्थितः चेत् गोचरवशात् भावेशलग्नेशयोर्युतिकाले भावसम्बन्धिजनेन सह जातकस्य शत्रुत्वं भवति। किन्तु भावेशलग्नेशौ परस्परं मित्रे तथा परस्परात् षष्ठाष्टमे न भवश्चेत् तयोर्युतिकाले भावसम्बन्धिजनेन जातकस्य मधुरः सम्बन्धः जायते। लग्नेशः यदा भावेशेन युतो भवति तदा भावेशः बली चेत् भावफलं सिध्यति यदि भावेशः निर्बलश्चेत् विपरीतं फलं जायते एवं चन्द्रात् चन्द्रराशेश्च फलं वक्तव्यम्।

## ११.११. आदर्शप्रश्नाः

१. भावशुभाशुभफलविचारं विशदयत।

२. भावनाशकग्रहाः के विशदयत।

३. सूर्यादिग्रहेभ्यो विचारणीयाः विषयाः के ?

४. द्वादशभावकारकाः के ?

५. तनुभावफलं विशदयत।

६. चतुर्थभावफलं वर्णयत।

७. भावसिद्धिकालं विवृणुत।

# द्वादशः खण्डः
# निर्याणविचारद्विग्रहयोगफलाध्यायौ

## संरचना

१२.१. प्रस्तावना
१२.२. लक्षिताधिगमविशेषाः
१२.३. निर्याणम्
१२.४. पितृ-भ्रात्ररिष्टयोगः
१२.५. पितृ-मात्रारिष्टयोगः
१२.६. पुत्रारिष्टयोगः
१२.७. स्वमृत्युयोगाः
१२.८. द्विग्रहयोफलम्
१२.९. चन्द्रे ग्रहदृष्टिफलम्
१२.१०. विविधग्रहाणां नवांशस्थितचन्द्रस्योपरि विविधग्रहाणां दृष्टेः फलम्
१२.११. आदर्शप्रश्नाः

## १२.१. प्रस्तावना

निर्याणं नाम भावनाशः। निर्याणवशात् पितृभ्रात्ररिष्टयोगाः, स्वमृत्युयोगाः, पुत्ररिष्टयोगाः च कथं सञ्जायतेऽत्यत्र वर्ण्यते। तदनु द्वग्रहयोगफलाध्याये रव्यादिभिः भौमादिग्रहयोगफलानि कथ्यन्ते। फलकथनावसरे विशिष्यास्य उपयोगः क्रियते।

## १२.२. लक्षिताधिगमविशेषाः

* निर्याणविचारमवगच्छन्ति।
* द्विग्रहयोगविचारं जानन्ति।
* पितृभ्रात्ररिष्टयोगान् ज्ञातुं प्रभवन्ति।
* स्वमृत्युयोगान् ज्ञातुं प्रभवन्ति।
* चन्द्रे ग्रहदृष्टिफलं किं भवतीति ज्ञातुं प्रभवन्ति।

## १२.३. निर्याणम्

इदानीं निर्याणं विचार्यते। सामान्यतः निर्याणं नाम भावनाशः। एतद्विषये सामान्यतः उच्यते --

**तत्तद्भावादष्टमेशस्थितांशे तत्रिकोणगे।**

**व्ययेशस्थितभांशे वा मन्दे तद्भावनाशनम्।।** इति।

विचारणीयभावात् अष्टमेशः द्वादशेशश्च यद्राशौ यन्नवांशे च भवतः तस्मात् पञ्चमे नवमे, तद्राशौ वा गोचरवशात् शनिः सङ्क्राम्यति चेत् भावफलस्य नाशः भवति।

### १२.३.१. शनिनिर्याणम्

अष्टमस्य स्वामी, गुलिकः, शनिः तथा खरद्रेष्काणस्य स्वामी यद्राशौ यन्नवांशे च भवति तस्मात् पञ्चमे नवमे च यदा गोचरवशात् शनिः सङ्क्राम्यति तदा जातकस्य मरणयोगो भवति।

### १२.३.२. गुरुनिर्याणम्

लग्ने द्रेष्काणेशः, अष्टमेशः, खरद्रेष्काणेशः च यस्मिन् राशौ नवांशे च भवति तत्र गुरुसङ्क्रमणे जातकस्य मरणयोगः भवति। ग्रहस्य नवांशात् पञ्चमे नवमे वा गुरुसङ्क्रमणेऽपि जातकः मरणयोगं प्राप्नुयात्।

### १२.३.३.रविनिर्याणम्

सूर्यः यस्य राशेः द्वादशांशे भवति तस्मिन्, तस्मात् त्रिकोणे, अष्टमेशः यद्राशिगः नवांशगः भवति तस्मिन्, तस्मात् त्रिकोणे लग्नेशः यद्राशिगः नवांशगश्च भवति तस्मिन् तस्मात् त्रिकोणे च रविसङ्क्रमणे जातकस्य मरणयोगः स्यात्।

### १२.३.४.चन्द्रनिर्याणम्

अष्टमेशः यद्राशौ नवांशे वा, सूर्यः यद्राशौ नवांशे वा भवति तस्मात् पञ्चमे नवमे वा चन्द्रस्य सङ्क्रमणे जातकस्य मृत्युयोगः भवेत्।

## १२.४. पितृ-भ्रात्ররিষ্টযোগঃ

यमकण्टकस्य राश्यादिभोगं लग्नेशस्य राश्यादिभोगात् ह्रासयित्वा अवशिष्टराशौ

तन्नवांशे तस्मात् पञ्चमनवमयोः गोचरवशात् गुरुसङ्क्रमणे जातकः मरणभयं प्राप्नुयात्। शनेः राश्यादितः चन्द्रस्य राश्यादि ह्रासयित्वा अवशिष्टराशौ तन्नवांशे तस्मात् पञ्चमनवमयोश्च गुरुसङ्क्रमणे जातकस्य मरणयोगः स्यात्।

कुजस्य राश्यादिभोगाद् हीने राहोः राश्यादिभोगे तस्मात् पञ्चमे नवमे वा, अवशिष्टराशिनवांशयोः तस्मात् पञ्चमनवमयोश्च गोचरवशात् गुरुसङ्क्रमणकाले सहोदरविनाशः स्यात्।

## १२.५. पितृ-मात्रारिष्टयोगः

यमकण्टकात् हीने सूर्यस्य राश्यादौ, तन्नवांशे तस्मात् पञ्चमे नवमे च गुरुसङ्क्रमणकाले जातकस्य पितुररिष्टं वक्तव्यम्। यमकण्टकाद्धीने गुलिकस्य राश्यादौ तस्य नवांशे तस्मात् त्रिकोणे च गोचरवशात् शनेरागमे जातकस्य पितुः मृत्युभयं स्यात्। चन्द्रस्य राश्यादेः सूर्यस्य राश्यादिं ह्रासयित्वा अवशिष्टराशौ, नवांशे तथा तस्मात् त्रिकोणे गुरुसङ्क्रमणकाले जातकस्य मातुः मृत्युभयं स्यात्। गुलिकराश्यादेर्हीने चन्द्रराशौ तन्नवांशे तस्मात् त्रिकोणे च शनिसङ्क्रमणकाले जातकस्य मातुः मृत्युभयं भवेत्।

## १२.६. पुत्रारिष्टयोगः

जन्मनक्षत्रात् पञ्चमस्य स्वामिनः राश्यादिभोगात् यमकण्टकस्य राश्यादिं ह्रासयित्वा अवशिष्टराशौ नवांशे तस्मात् त्रिकोणे च गोचरवशात् गुरुः सङ्क्राम्यति चेत् पुत्रारिष्टं वक्तव्यम्।

## १२.७. स्वमृत्युयोगाः

पूर्वोक्तैः मरणयोगैः जातकस्य यथा प्राणसंशयो भवति तद्वत् अन्येऽपि केचन योगाः सन्ति। यथा -- लग्नेशः यद्राशौ नवांशे भवति मेषात् तस्य अन्तरं यावदस्ति अष्टमेशाधिष्ठितराशेः तावदन्तरे स्थिते राशौ यदा गोचरवशात् रविसङ्क्रमणं भवति तदा जातकस्य मृत्युः सम्भवेत्। तदुक्तम् --

**लग्नाधिपस्थितनवांशके राशितुल्यं**

**रन्ध्राधिपस्य गृहमापतिते घटेशे।**

**तस्मिन् वदेन्मरणयोगमनेकशास्त्र-**

**संक्षुण्णखिन्नमतिभिः परिकीर्तितं तत्।।** इति।

एवं चन्द्रः यस्य राशेर्द्रेष्काणे भवति तस्मात् खरद्रेष्काणस्य स्वामी यत्र भवति तत्र तस्मात् त्रिकोणे च यदा चन्द्रः सङ्क्राम्यति तदाऽपि मरणयोगो भवति। इत्थम् अन्येऽपि बहवो मरणयोगाः भवन्ति। अधिकज्ञानार्थं फलदीपिकाग्रन्थः परिशीलनीयः।

## १२.८. द्विग्रहयोफलम्

जन्माङ्गचक्रे ग्रहद्वयम् अस्ति चेत् ग्रहद्वयं मिलित्वा अपूर्वं फलं ददाति। तत्र केन ग्रहस्य कस्य योगे कीदृशं फलमिति अधःस्थकोष्ठकेभ्यः ज्ञायताम्।

### १२.८.१. रविणा भौमादिग्रहयोगफलानि

| रविणा युक्तो ग्रहः | फलम् |
|---|---|
| १. चन्द्रः | जातकः यान्त्रिकः प्रस्तरशिल्पकारो वा स्यात्। |
| २. कुजः | पापकर्मनिरतः स्यात्। |
| ३. बुधः | निपुणः चतुरः बुद्धिमान् कीर्तियुक्तः। |
| ४. गुरुः | क्रूरमनाः, परोपकारी। |
| ५. शुक्रः | कलापटुः, शस्त्रपटुः। |
| ६. शनिः | धातुशिल्पे दक्षः। |

एतदेव जातकपारिजातेन विस्तृततयोक्तम् --

**जातः स्त्रीवशगः क्रियासु निपुणश्चन्द्रान्विते भास्करे**

**तेजस्वी बलसत्त्वाननृतवाक् पापी सभौमे रवौ।**

**विद्यारूपबलान्वितोऽस्थिरमतिः सौम्यान्विते पूषणि**

**श्रद्धाकर्मपरो नृपप्रियकरो भानौ सजीवे धनी।।** इति।

### १२.८.२.चन्द्रेण भौमादीनां योगफलम्

| चन्द्रेण युक्तो ग्रहः | फलम् |
|---|---|
| १. कुजः | मुद्गल-कुट्टादिस्थूलोपकरणानां स्त्रीणां, मद्याद्यासवद्रव्याणां मृत्पात्राणा, धातुपात्राणां व्यवसायी स्यात्। जनन्यवज्ञाकारी च स्यात्। |

| | |
|---|---|
| २. बुधः | मिष्टभाषी, कुशलव्याख्याता, भाग्यशाली, प्रथितयशाः स्यात्। |
| ३. गुरुः | शत्रुञ्जयः, कुलप्रधानः, चञ्चलः, धनिकश्च स्यात्। |
| ४. शुक्रः | वस्त्रसीवनं, वस्त्रवयनं, रञ्जनम् इत्यादिषु कुशलः स्यात्। |
| ५. शनिः | एतादृशः जातकः पुनः परिणीताया विधवायाः पुत्रो भवेत्। |

### १२.८.३.कुजेन ग्रहान्तरयुतौ फलम्

| **कुजेन युक्तो ग्रहः** | **फलम्** |
|---|---|
| १. बुधः | मूलादीनां तैलस्य औषधस्य च व्यवसायी, मल्लश्च भवेत्। |
| २. गुरुः | नगराध्यक्षः, राजा, श्रीमान्, ब्राह्मणः स्यात्। |
| ३. शुक्रः | गोपालकः, मत्तः, परस्त्रीसक्तः, द्यूतक्रीडासक्तः। |
| ४. शनिः | दुःखी, असत्यवादी, समाजे तिरस्कृतश्च स्यात्। |

तदुक्तम् --

**मूलादिस्नेहकूटैर्व्यवहरिति वणिग्बाहुयोद्धा ससौम्ये**

**पुर्यध्यक्षः सजीवे भवति नरपतिः प्राप्तवित्तो द्विजो वा।**

**गोपो मत्तोऽथ दक्षः परयुवतिरतो द्यूतकृत्सासुरेज्ये**

**दुःखार्तोऽसत्यसन्धः ससवितृतनयने भूमिजे निन्दितश्च।।** इति।

## स्वावलोकनप्रश्नः

**१. पितृ-भ्रात्ररिष्टयोगान् लिखत ?**

### १२.८.४. बुधेन ग्रहान्तरयुतिफलम्

| बुधेन युक्तो ग्रहः | फलम् |
|---|---|
| १. गुरुः | नाट्यसङ्गीतनृत्यादि कलाप्रवीणः स्यात्। |
| २. शुक्रः | भूपतिः गणाध्यक्षो वा स्यात्। |
| ३. शनिः | मायावी, इन्द्रियलोलुपश्च स्यात्। |

एवं गुरुणा शुक्रस्य युतौ जातकः विद्वान्, धनस्त्रीसम्पन्नः सद्गुणसम्पन्नश्च भवति। जन्माङ्गे शनिगुर्वोः युतौ जातकः नापितः, कुम्भकारः, पाचकश्च स्यात्। शनिशुक्रयोर्युतौ जातः समीपदृष्टिदोषयुक्तः, स्त्रीभाग्यात् धनसम्पन्नः, लेखकः चित्रकारो वा स्यात्।

## १२.९. चन्द्रे ग्रहदृष्टिफलम्

विविधराशिस्थितचन्द्रे विविधानां ग्रहाणां दृष्टौ विविधानि फलानि जायन्ते। तदत्र कोष्ठकेषु निरूप्यते --

| चन्द्रराशिः | ग्रहस्य दृष्टिः | फलम् |
|---|---|---|
| **मेषः** | कुजः | राजा भवति |
| | बुधः | विद्वान् भवति |
| | गुरुः | राजा भवति |
| | शुक्रः | राजतुल्यः भवति |
| | शनिः | चोरः भवति |
| | रविः | निर्धनः भवति |
| **वृषभः** | कुजः | धनहीनः भवचि |
| | बुधः | चोरः भवति |
| | गुरुः | लोकमान्यः भवति |
| | शुक्रः | राजा भवति |
| | शनिः | धनिकः भवति |
| | रविः | भृत्यः भवति |

| चन्द्रराशिः | ग्रहस्य दृष्टिः | फलम् |
|---|---|---|
| **मिथुनः** | कुजः | लोहयन्त्रादीनां वणिक् |
| | बुधः | राजा |
| | गुरुः | विद्वान् |
| | शुक्रः | धृष्टः |
| | शनिः | सूत्रवणिक् |
| | रविः | निर्धनः |
| **कर्कः** | कुजः | योद्धा |
| | बुधः | विद्वान् |
| | गुरुः | बुद्धिमान् |
| | शुक्रः | राजा |
| | शनिः | लोहयन्त्रवणिक् |
| | रविः | नेत्ररोगी |
| **सिंहः** | कुजः | राजा |
| | बुधः | ज्योतिर्विद् |
| | गुरुः | धनिकः |
| | शुक्रः | राजा |
| | शनिः | विशिष्टः भूस्वामी |
| | रविः | राजा |
| **कन्या** | कुजः | कुशलः |
| | बुधः | भूपतिः |
| | गुरुः | सेनापतिः |
| | शुक्रः | सर्वकार्यपटुः |
| | शनिः | विशिष्टभूस्वामी |
| | रविः | राजा |

| चन्द्रराशिः | ग्रहस्य दृष्टिः | फलम् |
|---|---|---|
| **तुला** | कुजः | शठः दुष्टप्रवृत्तिश्च |
| | बुधः | राजा |
| | गुरुः | स्वर्णकारः |
| | शुक्रः | वणिक् |
| | शनिः | पिशुनः |
| | रविः | दुष्टः |
| **वृश्चिकः** | कुजः | राजा |
| | बुधः | यमलयोः पिता |
| | गुरुः | भूपतिः |
| | शुक्रः | वस्त्रवणिक् |
| | शनिः | विकृताङ्गः |
| | रविः | निर्धनः |
| **धनुः** | कुजः | धूर्तः |
| | बुधः | ज्ञातिप्रधानः |
| | गुरुः | जनपालकः |
| | शुक्रः | जनानां शरणदाता |
| | शनिः | दुष्टप्रकृतिः |
| | रविः | दाम्भिकः |
| **मकरः** | कुजः | राजा |
| | बुधः | राजा |
| | गुरुः | भूस्वामी |
| | शुक्रः | विद्वान् |
| | शनिः | धनवान् |
| | रविः | निर्धनः |

| चन्द्रराशिः | ग्रहस्य दृष्टिः | फलम् |
|---|---|---|
| **कुम्भः** | कुजः | परस्त्रीसक्तः |
| | बुधः | भूस्वामी |
| | गुरुः | राजा |
| | शुक्रः | वेश्यागामी |
| | शनिः | नृपश्रेष्ठः |
| | रविः | जनैरादृतः |
| **मीनः** | कुजः | पापाचारी |
| | बुधः | चतुरः |
| | गुरुः | राजा |
| | शुक्रः | विद्वान् |
| | शनिः | दोषान्वेषी |
| | रविः | पापात्मा |

## स्वावलोकनप्रश्नः

**२. रविणा सह चन्द्रादीनां युतिफलं लिखत ?**

## १२.१०. विविधग्रहाणां नवांशस्थितचन्द्रस्योपरि विविधग्रहाणां दृष्टेः फलम्

| यस्य ग्रहस्य नवांशः | यस्य ग्रहस्य दृष्टिः | फलम् |
|---|---|---|
| **कुजः** | रविः | नगररक्षकः |
| | कुजः | वधिकः |
| | बुधः | मल्लयुद्धपटुः |
| | गुरुः | राजा |
| | शुक्रः | धनिकः |
| | शनिः | कलही |
| **शुक्रः** | रविः | मूर्खः |
| | कुजः | परस्त्रीसक्तः |
| | बुधः | कविः |
| | गुरुः | साहित्यकारः |
| | शुक्रः | सुखलिप्सुः |
| | शनिः | परस्त्रीगामी |
| **बुधः** | रविः | कलाकारः |
| | कुजः | चौरः |
| | बुधः | कविश्रेष्ठः |
| | गुरुः | राजमन्त्री |
| | शुक्रः | सङ्गीतज्ञः |
| | शनिः | शिल्पकारः |
| **चन्द्रः** | रविः | क्षीणकायः |
| | कुजः | धनलिप्सुः |
| | बुधः | तपस्विमुख्यः |
| | गुरुः | विख्यातः |
| | शुक्रः | स्त्रीणां दासः |
| | शनिः | कर्मनिष्ठः |

| | | |
|---|---|---|
| **सूर्यः** | रविः | क्रोधी |
| | कुजः | राजमित्रम् |
| | बुधः | धनाढ्यः |
| | गुरुः | समूहस्य स्वामी |
| | शुक्रः | निःसन्तानः |
| | शनिः | हिंसकः |
| **गुरुः** | रविः | बलशाली योद्धा |
| | कुजः | युद्धपटुः |
| | बुधः | परिहासपटुः |
| | गुरुः | राजमन्त्री |
| | शुक्रः | कामेच्छारहितः |
| | शनिः | वृद्धवदाचारवान् |
| **शनिः** | रविः | अल्पसन्ततिः |
| | कुजः | दुःखी |
| | बुधः | अहङ्कारी |
| | गुरुः | स्वकर्मनिरतः |
| | शुक्रः | दुराचारिणीनां स्त्रीणामभिलाषिणी |
| | शनिः | क्रोधी। |

## १२.११. आदर्शप्रश्नाः

१. पुत्रारिष्टयोगान् लिखत।

२. विविधग्रहाणां नवांशस्थितचन्द्रस्योपरि विविधग्रहाणां दृष्टेः फलं विवृणुत।

३. चन्द्रे ग्रहदृष्टिफलं विवृणुत।

# त्रयोदशः खण्डः
# दशाफलनिरूपण-दशापहार-प्रत्यन्तर्दशाफल-दशाभेदाध्यायाः

## संरचना

१३.१. प्रस्तावना

१३.२. लक्षिताधिगमविशेषाः

१३.३. दशानयनप्रकारः

१३.४. रव्यादिग्रहाणां महादशाफलानि

१३.५. दशापहारफलानि

१३.६. शुभाशुभदशाफलविचारः, परिपाककालः, परिमाणञ्च

१३.७. मृत्युदशा

१३.८. शुभाशुभयोगविचारः

१३.९. महादशायां प्रत्येकं ग्रहस्यान्तर्दशा

१३.१०. अन्तर्दशानयनप्रकारः

१३.११. रवेः महादशायाम् अन्तर्दशाफलानि

१३.१२. चन्द्रमहादशायामन्तर्दशाफलानि

१३.१३. कुजमहादशायामन्तर्दशाफलानि

१३.१४. राहुमहादशायामन्तर्दशाफलानि

१३.१५. बृहस्पतिमहादशायामन्तर्दशाफलानि

१३.१६. शनिमहादशायामन्तर्दशाफलानि

१३.१७. बुधमहादशायामन्तर्दशाफलानि

१३.१८. केतुमहादशायामन्तर्दशाफलानि

**१३.१९. शुक्रमहादशायामन्तर्दशाफलानि**

**१३.२०. दशाभेदाः**

**१३.२१. कालचक्रदशाविवरणम्**

**१३.२२. निसर्गदशा**

**१३.२३. धरादशा**

**१३.२४. पिण्डायुर्दशा**

**१३.२५. ग्रहाणामायुर्दायः**

**१३.२६. का दशा स्वीकरणीया इति**

**१३.२७. विभिन्नजन्तूनां परमायुः**

**१३.२८. परमायुषः अधिकारी**

**१३.२९. आदर्शप्रश्नाः**

## १३.१. प्रस्तावना

ग्रहाः सर्वदा फलदाः न भवन्ति। सर्वेऽपि ग्रहाः स्वदशासु स्व स्वान्तर्दशासु च फलप्रदाः भवन्ति। महापुरुषयोगे जातोऽपि योगकारकग्रहस्य महादशान्तर्दशायामेव राजा भवति। रव्यादिग्रहाः स्वदशासु कीदृशं फलं प्रयच्छन्त्विति विचारोऽत्र प्रतिपाद्यते। रव्यादीनां महादशाफलानि, प्रत्येकं ग्रहस्य अन्तर्दशा फलानिचात्र विंशोत्तरीदशाक्रमेण प्रतिपाद्यते। तदनु दशाभेदाश्च वर्ण्यन्ते।

## १३.२. लक्षिताधिगमविशेषाः

* रव्यादीनां महादशाफलानि ज्ञातुं प्रभवन्ति।

* विंशोत्तरीदशाप्रकारमवगच्छन्ति।

* प्रत्येकं ग्रहस्य अन्तर्दशाफलानि अवगच्छन्ति।

* दशाभेदान् अवगच्छन्ति।

## १३.३. दशानयनप्रकारः

**१३.३.१.** पराशरमुनेः तपसि तुष्टाः नवग्रहाः तस्मै नवग्रहवशात् प्राप्यमानस्य फलस्य ज्ञानम् अदुः। तदेवात्र विंशोत्तरीदशानाम्ना प्रतिपाद्यते।

**१३.३.२.** **अग्न्यादितारपतयो रविचन्द्रभौम-**
**सर्पामरेड्यशनिचन्द्रजकेतुशुक्राः।**
**तेने नटः सनिजया चटुधान्यसौम्य-**
**स्थाने नखा निगदिताः शरदस्तु तेषाम्।**

कृत्तिकादिनवनक्षत्राणां क्रमेण सूर्यः, चन्द्रः, कुजः, राहुः, गुरुः, शनिः, बुधः, केतुः, शुक्रः च दशापतयः भवन्ति। तेषां ग्रहाणां क्रमेण ६,१०,७,१८,१९,१७,७,२० वर्षाणि दशाकालः भवति।

### दशाचक्रम्

| दशा-नाथः | सूर्यः | चन्द्रः | कुजः | राहुः | गुरुः | शनिः | बुधः | केतुः | शुक्रः |
|---|---|---|---|---|---|---|---|---|---|
| नक्षत्राणि | कृत्तिका<br>उ.फाल्गुनी<br>उ.षाढा | रोहिणी<br>हस्ता<br>श्रवणं | मृगशिरा<br>चित्रा<br>धनिष्ठा | आर्द्रा<br>स्वाती<br>शतभिषा | पुनर्वसुः<br>विशाखा<br>पू.भा.पदा | पुष्या<br>अनूराधा<br>उ.भा.पदा | आश्लेषा<br>ज्येष्ठा<br>रेवती | मघा<br>मूला<br>अश्विनी | पू.फल्गुनी<br>पू.षाढा<br>भरणी |
| दशा वर्षाणि | ०६ | १० | ०७ | १८ | १६ | १९ | १७ | ०७ | २० |

**१३.३.३.** नक्षत्रस्य गम्यघटिकाः दशानाथस्य दशावर्षैः सङ्गुण्य षष्ट्या (६०) विभज्यते तर्हि भोग्यदशावर्षाणि प्राप्यन्ते। पुनः शेषं द्वादशसंख्यया सङ्गुण्य षष्ट्या विभज्यते चेत् मासः। ३० सङ्गुण्य ६० विभज्यते चेत् दिनानि च प्राप्यन्ते। एवं शिष्टदशा ज्ञायते।

**१३.३.४.** जन्मसमये सूर्यस्थितराश्यंशादिषु पुनः यदा सूर्यः आयाति तत् एकं वर्षम्। दशायामस्यैव वर्षमानस्य उपयोगः करणीयः।

## १३.४. रव्यादिग्रहाणां महादशाफलानि

**१३.४.१.** सुस्थाने स्थितस्य सूर्यस्य दशायां जातकः क्रूरकर्मयात्राराजाकलहेभ्यः धनार्जनं

करोति। अस्मिन् काले सः वने पर्वतप्रदेशे च सञ्चरति। सः विवादादिषु विजयी, सदुद्योगनिरतः सुखी च भवति।

**१३.४.२** अशुभस्थानहतस्य सूर्यस्य दशायां जातकेन विवादः, राजकोपः, स्वजनानां रोगः विफलयात्रा, मानसिकसन्तापः धनधान्यादीनां नाशः, स्त्रीपुत्रादीनां पीडा, परस्परवैरं च क्रियते। पुनः सः अग्निपशुभिः पीडितः, नेत्ररोगी, उदरदशनरोगी च भवति। तेन स्त्रीपुत्रादीनां नाशः गुरुजनानां वियोगः, सेवकानां धनस्य च हानिः च अनुभूयते।

**१३.४.३.** चन्द्रमहादशायां मानसिकसुखं, सर्वार्थसिद्धिः, सुखभोजनम्, स्त्रीपुरुषभूषाम्बररत्नसिद्धिः, गोभूलाभः, ब्राह्मणपूजनं, मन्त्राचारः, दुष्टजनैः सह विरोधः, धननाशः, वातादिरोगाः च अनुभूयन्ते।

**१३.४.४.** चन्द्रस्य बिम्बवृद्धिवशात् शुभफलानि वृद्धिं प्राप्नुवन्ति। बिम्बह्रासे फलानामपि क्रमेण ह्रासः सम्भवति। चान्द्रमासस्य प्रथमदशदिनेषु चन्द्रः मध्यबली, मध्यदशदिनेषु पूर्णबली, अन्तिमदशदिनेषु अल्पबली च भवति।

**१३.४.५.** कुजस्य दशाफलान्येवमुच्यन्ते आचार्यैः - कुजदशायां जातकः अग्निसम्बन्धिकार्यैः, राजभिः, शस्त्रादीनां प्रयोगादिभिः, औषधीनामुपयोगेन, असत्यवचनैः विविधक्रूरकर्मभिः धनमार्जयति। सः पित्तरक्तज्वरैः पीडितः, नीचाङ्गनासेवकः, भार्यापुत्रबन्धुगुरुभिः विद्वेषयुक्तः, क्लेशमनुभूयमानः, अन्येषां भाग्ये रतः च भवति। तेन दहनरुधिरपित्तव्याधिभ्यः कष्टमनुभूयते।

**१३.४.६.** बुधस्य महादशायां मित्राणामागमः तस्मात् सौख्यं च जायते। सः विद्वद्भिः प्रशंसितः, यशस्वी, गुरुकृपापात्रः, प्रगल्भः, ब्रह्मज्ञानी, परोपकारी, पुत्रमित्रस्त्रीणां सुखदायकः च भवति। तस्मिन् विषये ब्राह्मणात् धनप्राप्तिः, क्षेत्रगोऽश्वलाभः, बहुधनप्राप्तिः, मरुदुष्णश्लेष्मरोगाः च जायते।

**१३.४.७.** गुरोः महादशायां धार्मिकक्रियायामभिरुचिः, सन्तानप्राप्तिः, स्त्रीपुत्रादिसुखं, गजाश्वयानप्राप्तिः, इष्टकार्यसिद्धिः, धनवैभववस्त्रादिलाभः च प्राप्यते। एवमेव राजगुरुजनपूजितः कफकर्णरोगादिभिः पीडितः गुरुवियोगी च जातकः भवति।

**१३.४.८.** शुक्रस्य महादशायां क्रीडार्थं सुखाय च विद्यमानानाम् उपकरणानां, सुवाहनस्य, गोरत्नभूषणनिधिप्रमदादीनां ज्ञानस्य, जलयात्रायाः, शुभकार्यस्य, बहुमानस्य च प्राप्तिः

भवति। सा व्यक्तिः क्रयविक्रयकृषिजलयानानि आश्रित्य धनं प्राप्नोति। गुरुजनानां वियोगः, बान्धवानां क्लेशः, मनोरोगः च अस्याः दशायाः फलानि भवन्ति।

**१३.४.९.** शनेः महादशायां जातकः वातरोगपीडितः, तस्य कलत्रपुत्रादयः रुग्णाः, तथा कृषिनाशः च सम्भवति। सः असमीचीनवाक्यानां प्रयोगं, दुष्टस्त्रीभिः सह सम्बन्धं च करोति। तस्मै पशुमहिषवृषाणां प्राप्तिः भवति। तथैव स्वजनानां वियुतिः, प्रयासः, आकस्मिकरीत्या स्वजनभूमिसुखार्थनाशः, पादाद्यङ्गेषु तापपीडा च अस्यां दशायां फलानि भवन्ति।

**१३.४.१०.** राहोः महादशायां राजचोरहालाहलाग्निशस्त्रेभ्यः भीतिः, बन्धुपुत्रादीनां नाशः, बुद्धिभ्रमः, अपमानः, अपवादः, स्थानच्युतिः, पादस्य हानिः, कृतकार्यनाशः, दुःस्वभावः, अपरिचितरोगैः पीडा च फलानि भवन्ति।

**१३.४.११.** शुभभावस्थितः वा शुभग्रहेण युक्तः राहुः तस्य महादशायां शुभफलं ददाति। तज्जातकः राजतुल्यः भवति। इष्टकार्यसिद्धिः, गृहे सुखं शान्तिः, स्थिरधनसङ्ग्रहः, प्रसिद्धिः, कीर्तिः च अस्यां दशायां फलानि भवन्ति।

**१३.४.१२.** कन्यामीनवृश्चिकेषु स्थितस्य राहोः दशायां महत्सौख्यम्, देशाधिपत्यं, वाहनप्राप्तिः च फलानि भवन्ति। किन्तु दशावसाने एतेषां सर्वेषां नाशः सम्भूयते।

**१३.४.१३.** केतोः महादशायां अरिराजचोरेभ्यः भयं, शस्त्रक्षतम्, उष्णरोगः, मिथ्यापवादः, कुलस्य दूषणम्, अग्निभयं, प्रवासः, स्त्रीजनितशोकव्यामोहादयः, धनहानिः, अपराधः, दन्तचरणरोगाः च फलानि भवन्ति।

एवं दशाफलानि सर्वेषां ग्रहाणामुक्तानि वर्तन्ते।

## १३.५. दशापहारफलानि

प्रबलेन हीनबलेन वा ग्रहेण फलानि कदा प्राप्यन्ते इति अस्मिन्नुच्यते।

**१३.५.१.** लग्नेशः पूर्णबलवान् तर्हि तस्य दशायां प्रभुत्वं, सुखस्थितिः, देहबलं, सुवर्चः, चन्द्र इव उदयाभिवृद्धिः च फलानि भवन्ति।

द्वितीयभावाधिपतेः दशायां कुलाभिवृद्धिः, सत्पुत्रीप्राप्तिः, सुखभोजनं, वचसा जीवनं, तार्किकसम्भाषणात् प्रशस्तिः च फलानि भवन्ति।

बलवतः तृतीयभावाधिपतेः दशायां शौर्यं, वीर्यं, सहोदरानुकूल्यं, सुवार्ताश्रवणं, सेनापतित्वम्, अभिमानम्, सद्‌गुणविकासः, जनाश्रयं च फलानि भवन्ति।

चतुर्थभावाधिपतेः दशायां बन्धूपकारं, कृषिकर्माणि सरलतां, स्त्रीसङ्गमं, वाहनलाभं, क्षेत्रं, गृहं, धनं, स्थानं प्रशस्तिं च जातकः प्राप्नोति।

पञ्चमभावनाथदशायां पुत्रप्राप्तिः, बन्धुविलासः, मन्त्रिपदप्राप्तिः, मानः, सज्जनानां प्रशंसा, महत्कार्याणां निर्वहणं इत्यादीनि फलानि भवन्ति।

बलिष्ठषष्ठभावाधिपतिदशायां शत्रूणां नाशः, साहसकार्येषु उत्साहः, अरोगता, उदारता, श्रेयः च फलानि अनुभूयन्ते।

सप्तमेशदशायां नूतनवस्त्राभरणं, सुशय्यां, स्त्रीसङ्गमं, अतिवीर्यतां, कल्याणमहोत्स-वादीनामायोजनं, सन्तोषयात्रां च प्राप्नोति।

अष्टमेशदशायाम् ऋणात् मोचनं, तस्य सर्वतोमुखविकासः, कलहान्मुक्तिः, महिषपश्वजभृत्यजनानामागमं च भवति।

नवमभावेशदशायां स्त्रीपुत्रबन्धुपौत्रैः सह सुसम्बन्धः, भाग्योदयः, अभिवृद्धिः, सर्वविधसुखानुभवप्राप्तिः, राजसम्मानं, द्विजदेवभक्तिः च फलं भवति।

दशमभावेशदशायां क्रियमाणकार्यस्य सफलतां, सुखजीवनं, कीर्तिं, कुशलप्रवृत्तिं, मानोन्नतिं च प्राप्नोति।

एकादशाधिपतिः स्वदशायाम् ऐश्वर्यम्, इष्टबन्धुसमागमं, भृत्यजनान्, दासान्, सांसारिकसुख. सौभाग्याद्यभिवृद्धिं च प्रयच्छति।

व्ययेशदशायां जातकः सन्मार्गे अतिव्ययं पापनाशकशुभकर्माणि च करोति। तथैव राजप्रियः च भवति।

**१३.५.२.** उपर्युक्तानि फलानि वक्रस्वोच्चमित्रसुस्थानगतैः ग्रहैः प्रदीयन्ते। अनन्तरं मौढ्यशत्रुनीचगृहेषु त्रिके च विद्यमानानां ग्रहाणां फलान्युच्यन्ते।

**१३.५.३**. षष्ठाष्टमद्वादशभावेषु स्थितस्य लग्नाधिपतेः दशायां बन्धनम्, अज्ञातवासः, भयं, रोगाः, स्थानभ्रंशः, आपदः च फलानि भवन्ति। दुःस्थद्वितीयाधिपदशायां जाड्यं, सभासु

जडत्वं, कुटुम्बस्य च निर्वहणे असमर्थता, दुःखवार्ताः चक्षुषि वाचि च दोषः, धनस्यापव्ययः, राजभयमित्यादीनि फलानि भवन्ति।

तृतीयभावाधिपतिः यदि दोषयुक्तः तर्हि तस्य दशायां स्वकार्यनिन्दितः, शत्रुपीडितः, भ्रातृनिधनं, पराजयः, श्रीनाशः, अपमाननं च भवति।

चतुर्थभावाधिपः दुःस्थानगतश्चेत् तस्य दशायां मातृक्लेशः, स्वजनेषु अनिष्टं, कृषिभूमिगृहादीनां नाशः पश्वादिविनाशः जलभयञ्च जायते।

दुःस्थानगतः पञ्चमेशः पुत्रनिधनं, बुद्धिभ्रंशं, निरर्थकयात्रां, वञ्चनाम्, उदरव्याधिं, शक्तिक्षयं च कारयति।

दुःस्थानगतस्य षष्ठेशस्य दशायां चोरभयम्, अनर्थता, दमनं, रोगादीनि, भृत्यत्वम्, अपकीर्तिः इत्यादि जायते।

सप्तमेशः विपरीतः चेत् तस्य दशायां जामातुः कष्टं, स्त्रीवियोगः, स्त्रिया विपत्तिः, अकार्येष्वभिरुचिः, गुह्याङ्गरोगाश्च जायन्ते। अनिष्टगताष्टमेशदशायां शोकग्रस्तता, मोहग्रस्तता, प्रबलकामेच्छा, विद्वेषः, दारिद्र्यं, भ्रमणमित्यादि जायते। नवमेशः विषमस्थश्चेत् तदीयदशायाम् उपासितदेवताकोपेन स्त्रीपुत्रादीनां कष्टं, दुष्कर्मसु रतिः, पितृगुरुजनादीनां निधनं च भवति।

विपरीतस्थितस्य दशमेशस्य दशायां स्वकर्मसु विफलता, समाजे अप्रतिष्ठता, जीवने विपत्तिः, दुर्गुणः, प्रवासश्च जायते। एकादशाधिपस्य विपरीतस्य दशायाम् अशुभवाक् श्रवणं, भातृक्लेशः, सन्तानपीडा, दीनता, वञ्चना, कर्णरोगः च जायते। निर्बलस्य द्वादशाधिपस्य दशायां बहुव्याधिग्रस्तः, अपमानितः, कारागारबन्धितश्च भवति जातकः।

**१३.५.४.** वर्गोत्तमांशस्थितदशा शुभदा भवति। यदि सः अस्तः नीचगतो वा तर्हि तस्य शुभाशुभमिश्रितफलं भवति। षष्ठाष्टमद्वादशाधिपानां महादशायाम् अनिष्टफलानि भवन्ति। तथैव पापग्रहमहादशासु जन्मनक्षत्रात् ३,५,७ नक्षत्राणाम् अधिपानाम् अथवा जन्मराश्यष्टमराश्यधिपानाम् अन्तर्दशायां शत्रुचोरभयं भवति।

दशाक्रमे शनेः चतुर्थी, गुरोः षष्ठी, राहुमङ्गलयोः पञ्चमी वा दशा भवति तर्हि सा

दशा कष्टदा भवति। ऊर्ध्वमुखराशिस्थः उच्चराशिस्थो वा मङ्गलः दशमे एकादशे वा भवति तर्हि तस्य दशा राज्यप्रदा भवति। सः शत्रूणामुपरि विजयं, बहुवाहनसौख्यं, राज्यश्रियं च प्राप्नोति। तथैव सः अन्नदानं च करोति।

उच्चराशिस्थः शुक्रः दशमैकादशद्वादशस्थानेषु यत्र कुत्रचित् एकस्मिन् स्थाने भवति तथा सः अनस्तंगतः, अपापयुक्तः च भवति तर्हि तस्य दशायां जातकः बहुरत्नसम्पन्नः, धीमान्, विशालविभवयुक्तः, प्रशंसितः च भवति। नीचशत्रुषष्ठद्वादशस्थस्य शुभग्रहस्य दशा अनिष्टकरा भवति।

## स्वावलोकनप्रश्नः

**१. शुक्रस्य महादशफलं लिखत**

## १३.६. शुभाशुभदशाफलविचारः, परिपाककालः, परिमाणञ्च

**१३.६.१.स्वोच्चत्रिकोणस्वहितारिनीचे पूर्णं त्रिपादार्द्धपदाल्पशून्यम्।**

**क्रमाच्छुभं चेदशुभं विलोमात् मन्दे ग्रहे नीचसमं फलं स्यात्।।**

उच्चराशौ स्थितः शुभग्रहः पूर्णं फलं प्रदाति। मूलत्रिकोणे विद्यमानेन शुभग्रहेण शुभफलस्य पादोनभागं, स्वगृहस्थेन अर्द्धं, मित्रक्षेत्रे विद्यमानेन पादं, शत्रुराशिस्थेन अल्पं, नीचराशिस्थितेन शून्यं च फलं दीयते। तथैव पापग्रहः उच्चराशौ भवति तर्हि तस्य पापफलं शून्यं भवति। मूलत्रिकोणे विद्यमानः पापग्रहः अल्पं, स्वराशिस्थितः पादं, मित्रराशिस्थितः अर्द्धं, शत्रुराशिगतः पादोनं, नीचराशिगतः पूर्णं च पापफलं ददाति।

**१३.६.२. चतुष्टयस्था गुरुजन्मलग्नपा भवन्ति मध्ये वयसः सुखप्रदाः।**

**क्रमेण पृष्ठोदयमस्तकोदयस्थितोऽन्त्यमध्यप्रथमेषु पाकदः।।**

जन्मराश्यधिपः, लग्नेशः, गुरुः च यदि केन्द्रस्थाः भवन्ति तर्हि जातकः आयुषः मध्यभागे सुखमनुभवति। पृष्ठोदयशीर्षोदयराशिषु विद्यमानाः ग्रहाः यथाक्रमम् आयुषः अन्त्यभागे, मध्यभागे, प्रथमभागे च शुभफलं प्रयच्छन्ति।

**यद्भावगो गोचरतो विलग्नाद्दशेश्वर स्वोच्चसुहृद्गृहस्थः।**

**तद्भावपुष्टिं कुरुते तदानीं बलान्वितश्चेज्जननेऽपि तस्य।।**

जन्मसये यः ग्रहः बलिष्ठः भवति. तस्य दशायां स्वोच्चमित्रराशिषु चारवशात् यदा सः सञ्चरति तदा तेषु राशिषु विद्यमानानां भावानां पुष्टिं करोति।

**१३.६.३. शुभदशाफलानि** --

१. दशापतेः द्वितीये, तृतीये, एकादशे, केन्द्रे, त्रिकोणे च विद्यमानस्य ग्रहस्यान्तर्दशा शुभदा भवति।

२. दशापतेः मित्रोच्चराश्योः सप्तमे त्रिकोणे उपचयराशिषु वा चारवशात् चन्द्रः भवति तर्हि सः भावः शुभफलं प्रददाति। अन्येषु भावेषु विद्यमानः चन्द्रः अनिष्टकारकः भवति।

३. गोचारवशात् दशेशः स्वराशौ उच्चराशौ वा चरति तर्हि शुभफलं प्राप्नोति।

४. शुभप्रदस्य दशानाथस्य दशायां सूर्यः वा गुरुः गोचारवशात् दशेशस्य स्वराशौ वा उच्चराशौ यदा भवति तदा शुभफलानां वृद्धिः भवति।

५. केन्द्रेशः पापग्रहः चेत् शुभफलप्राप्तिः भवति।

६. त्रिकोणाधिपतेः दशा सर्वदा शुभदा भवति।

७. अष्टमेशः लग्नेशः च भवति तर्हि तस्य दशा शुभफलदा भवति।

९. चन्द्रराशेः गोचारवशात् दशानाथः शुभस्थाने चेत् शुभफलं प्राप्नोति।

१०. गोचारवशात् चन्द्रः दशापतेः मित्रराशौ उच्चराशौ सप्तमे, त्रिकोणे उपचयराशौ वा भवति तर्हि शुभं भवति।

११. दशापतिः गोचारवशात् लग्नतृतीयषष्ठदशमैकादशभावेषु अथवा लग्नसप्तवर्गस्थराशिषु सङ्क्राम्यति तथा दशापतेर्मित्रं गोचारवशात् लग्ने भवति तर्हि शुभफलं भवति।

**अशुभदशाफलानि --**

१. महादशानाथस्य शत्रुग्रहस्य, तस्मात् षष्ठभावगतस्य, लग्नेशस्य, शत्रोः च अन्तर्दशायां जातकस्य शत्रुभयं स्थानभ्रंशात् भयं, तथैव स्वजनाः शत्रुवत् भवन्ति।

२. दशापतेः षष्ठाष्टमद्वादशभावेषु स्थितस्य ग्रहस्यान्तर्दशायाम् अनिष्टफलानि भवन्ति।

३. जन्मकुण्डल्यां दशानाथः दुर्बलः, अस्तङ्गतः, नीचराशौ वा शत्रुराशौ वा भूत्वा, चारवशात् सः येषु भावेषु सञ्जरति तेषां भावानां नाशः जायते।

४. गोचारवशात् दशेशः मौढ्यं, नीचराशिं, शत्रुराशिं वा प्राप्नोति तर्हि क्लेशः जायते।

५. पापफलप्रदस्य ग्रहस्य दशायां तस्य शत्रुनीचक्षेत्रयोः यदा सूर्यः भवति गोचरवशात्, तदा अनिष्टफलप्राप्तिः भवति।

६. केन्द्रेशः शुभग्रहः तर्हि तस्य दशायाम् अशुभफलं प्राप्यते।

७. त्रिकाधिपदशा (६,८,१२) सर्वदा अनर्थपूर्णा भवति।

८. अष्टमभावे विद्यमानः ग्रहः, अष्टमभावदृष्टग्रहः, अष्टमभावनाथः, अष्टमभावस्य

द्रेष्काणाधिपतिः, गुलिकस्थितराशेः नाथः, एतेषाम् अन्तर्दशा कष्टप्रदा भवति। एषु अतिदुर्बलस्य दशा जातकस्य मृत्युदायिका भवति।

९. चन्द्रराशेः गोचारवशात् दशानाथः अनिष्टस्थाने वर्तते तर्हि अशुभफलप्राप्तिः भवति।

१०. अस्तः शत्रुराशिस्थो वा ग्रहः शुभस्थाने शुभनवांशे वा भवति तर्हि मिश्रफलं ददाति।

**अत्र विशेषः --** यः ग्रहः उच्चराशेः अग्रे गच्छति तस्य दशा अवरोहिणी भवति। यः ग्रहः नीचा- दुच्चं गच्छति सा आरोहिणी दशा। ग्रहः यदि मित्रराशौ उच्चनवांशे वा भवति तर्हि मध्यमावरोहिदशा। यदि नीचराशौ शत्रुराशिनवांशे वा भवति तर्हि अधमा दशा भवति।

## १३.७. मृत्युदशा

**१३.७.१.** शनिः, मान्दिः, खरद्रेष्काणपतिः, अष्टमभावस्वामी इत्येतेषां नवांशानाम् अधिपाः सन्तः, तेषु निर्बलस्य महादशायां षष्ठाष्टमद्वादशेषु यदा शनिः भवति तदा जातकस्य मृत्युः भवति। अष्टमेशस्थितराश्यधिपः अष्टमेनवांशराश्यधिपः लग्नद्रेष्काणाधिपः, द्वाविंशतिद्रेष्काणाधिपः येषु सर्वाधिकबलवतः ग्रहस्य महादशायाम् अष्टमेशस्थितराशौ नवांशराशौ एतयोः पञ्चमनवमराश्योः गोचारवशात् यदा गुरुः भवति तदा मृत्युः जायते। दुर्बलाष्टमद्वादशेशयोः दशाऽपि मृत्युप्रदा भवति।

**केन्द्राधिपत्यदोषस्तु बलवान् गुरुशुक्रयोः।**
**मारकत्वेपि च तयोः मारकस्थानसंस्थितः।।**

केन्द्राधिपत्यदोषः गुरुशुक्रयोः अधिकतरः। तौ यदि मारकस्थानाधिपौ मारकस्थानस्थितौ वा भवतः तर्हि अत्यन्तं कष्टप्रदौ भवतः। यस्माद्भावात् येषां विचारः क्रियते, ततः द्वादशेशस्य अथवा द्वादशभावस्थितस्य दशायां तेषां मृत्युः भवति।

## १३.८. शुभाशुभयोगविचारः

१३.८.१. **कोणाधीशः केन्द्रगः केन्द्रपो वा**
**कोणस्थश्चेत् द्वौ च योगप्रदौ स्तः।**
**द्वावप्येतौ भुक्तिकाले दशायां**
**अन्योन्यं तौ योगदौ सोपकारौ।।**

त्रिकोणाधिपः यदि केन्द्रस्थः अथवा केन्द्रपः त्रिकोणस्थश्चेत् योगकारकः भवति। एतौ स्व दशान्तर्दशासु योगप्रदौ भवतः। केन्द्रत्रिकौणाधिपौ दोषयुक्तौ चेदपि परस्परं सम्बन्धितौ चेत् योगकारकः भवति। त्रिकोणपतिः बलिना केन्द्रस्थितेन सम्बद्धश्चेत् योगकारकः भवति।

## १३.९. महादशायां प्रत्येकं ग्रहस्य अन्तर्दशा

**१३.९.१.** एकैकस्य ग्रहस्य महादशायाम् अन्येषां ग्रहाणामाधिपत्यकालः ईषद् वर्तते। तेषां कालः अन्तर्दशा प्रत्यन्तर्दशा चेति नाम।

## १३.१०. अन्तर्दशानयनप्रकारः

**१३.१०.१.** **पाकेशाब्दहता दशेश्वरसमा नेत्राङ्कभक्ताः समाः**
**शिष्टा रूपहता नराङ्कविहता मासा नगैर्वासराः।**
**छिद्रादिष्वपि चैवमेव कलयेत्पाकक्रमाच्चेद्दशा -**
**नाथाद्या पुनरन्तरान्तरदशास्तत्पाकनाथक्रमाः।।**

यस्य ग्रहस्य अन्तर्दशा ज्ञातव्या, तस्य दशावर्षाणि दशानाथस्य दशावर्षैश्यः सङ्गुण्य १२० संख्यया भागः क्रियते चेत् लब्धिः दशापहारवर्षाणि भवन्ति। अनन्तरं शिष्टं द्वादशसंख्यया सङ्गुण्य १२० संख्यया भागः क्रियते तर्हि लब्धिः मासाः, शिष्टं त्रिंशद्भिः सङ्गुण्य १२० संख्यया विभज्यते तर्हि दिनानि च प्राप्यन्ते। ग्रहाणां दशाक्रमः यथा ,तथैव अन्तर्दशाक्रमः प्रत्यन्तर्दशाक्रमः च वर्तते। पुनः यथाक्रमम् अन्येषां ग्रहाणां दशाः भवन्ति। उदाहरणार्थं गुरुदशायां प्रथमान्तर्दशा गुरोः एव। पुनः शन्यादिग्रहाणाम् अन्तर्दशाः भवन्ति। तत्र अन्तिमान्तर्दशा राहोः भवति।

## १३.११. रवेः महादशायाम् अन्तर्दशाफलानि

**१३.११.१.** **महीश्वरादुपलभतेऽधिकं यशो वनाचलस्थलवसतिं धनागमम्।**
**ज्वरोष्णरुग् जनकवियोगजं भयं निजां दशां प्रविशति तीक्ष्णदीधितौ।।**

रवेः महादशायां रवेः अन्तर्दशाकाले राज्ञः यशः, वनपर्वतप्रदेशेषु निवासः वा भ्रमणं, धनलाभः च भवति। ज्वरः, उष्णरोगाः, पितृरोगः, भयमित्यादयः तत्र फलानि भवन्ति।

**१३.११.२.** चन्द्रान्तर्दशायां शत्रूणां नाशः, व्यसनशमः, धनप्राप्तिः, कृषिकार्येषूत्साहः, गृहनिर्माणं, सुहृत्समागमः च जायते। तथा क्षयरोगः, जलकारणात् रोगाः, अग्नेः क्लेशः भयं च फलानि वर्तन्ते।

**१३.११.३.** कुजस्यान्तर्दशायां रोगागमः, पदहानिः, शत्रुभयं, व्रणाः, स्वजनैः विरोधः, धनच्युतिः, राज्ञः भयं च भवन्ति।

**१३.११.४.** राहोः अन्तर्दशायां शत्रूणामुदयः, धनहानिः, विपत्तिः, विषाद्भयं, भोगविषये वैमुख्यं, शिरसि नेत्रयोः च रोगात् क्लेशः च फलानि भवन्ति।

**१३.११.५.** गुरोः अन्तर्दशायां शत्रुनाशः, विविधधनाप्तिः, देवद्विजबन्धुगुरूणां पूजनम्, कर्णव्याधिः, क्षयरोगाद्भयं च भवति।

**१३.११.६.** शन्यन्तर्दशायां धनहानिः, पुत्रविरहः, पत्न्याः रोगादिकम्, धनापव्ययः, गुरुजनवियोगः, वस्त्रगृहोपकरणादीनां नाशः, मलिनता, कफप्रकोपश्च भवति।

**१३.११.७.** बुधान्तर्दशायां तु चर्मरोगाः, उदरकटिप्रदेशेषु पीडा, त्रिदोषजन्यव्याधयश्च भवन्ति।

**१३.११.८.** केत्वन्तर्दशायां मित्रवियोगः, स्वजनैः सहः कलहः, शत्रुभयं, धननाशः, पदच्युतिः, ज्येष्ठानां व्याधिपीडा, शिरसि पादे च पीडा भवति।

**१३.११.९.** शुक्रान्तर्दशायां शिरसि उदरे गुदे च रोगादिकष्टं, कृषिकर्म, गृहधनधान्यविनाशः, स्त्रीपुत्रादीनां कष्टं च भवति।

## १३.१२. चन्द्रमहादशायामन्तर्दशाफलानि

**चन्द्रः** - कन्यारत्नप्राप्तिः, निर्मलवस्त्रप्राप्तिः, उत्तमब्राह्मणसमागमः, स्त्रीसुखम्, मातुरभीष्टसिद्धिः।

**कुजः** - पित्ताग्निरक्तजन्यव्याधयः, शत्रुचोरादिपीडा, धनसम्मानादिक्षतिः।

**राहुः** - महत्कष्टं, शत्रूणां प्रबलता, स्वजनानां रोगः, वातविद्युदादिना पीडा, अन्नपानजनितज्वरादिपीडा।

**शनिः** - अनेकरोगपीडा, स्त्रीपुत्रसुहृदादीनां रोगः, दुःखम्, प्राणहानिः।

**बुधः** - धनगजाश्वगवां प्राप्तिः, आभरणादीनां लाभः, सौख्यम्, बौद्धिकविकासः।

**केतुः** - बुद्धिभ्रंशः, सम्पदः नाशः, बन्धूनां हानिः, जलभयं, दासभृत्यानां पीडा।

**शुक्रः** - जलयानवसुभूषणाङ्गनालाभः, क्रयविक्रयादि, कृषिकर्म, पुत्रमित्रपशुधान्यादीनां लाभः।

**रविः** - राजसम्माननम्, साहसिककार्यसम्पादनम्, शत्रूणां पराभवः, पित्तवायुजन्यरोगाः।

## १३.१३. कुजमहादशायामन्तर्दशाफलानि

**कुजः** - पित्तकोपेन ज्वरः, व्रणमित्यादि, स्वजनवियोगः, भूसम्बन्धिधनलाभः, अग्निभयम्, शत्रुराजचोरादीनां विरोधः।

**राहुः** -शस्त्राघातः, अग्निचोरशत्रुराजकोपादिभयम्, विषपानादिना कष्टं, कुक्ष्यक्षिशीर्षेषु रोगः, गुरुबन्धुहानिः, स्वयं प्राणहानिः।

**गुरुः** - देवताब्राह्मणाद्यर्चनम्, तीर्थयात्रा, अतिथिसत्कारः, पुत्रमित्रादिसंवर्धनम्, कर्णव्याधिः, श्लेष्मव्याधिः।

**शनिः** - बहुसङ्कटोत्पत्तिः, मानसिकपीडा, धनहानिः, अग्निवाय्वादिकोपः, वातपित्तरोगाः।

**बुधः** - शत्रुभयम्, चोरादिना धनहानिः, पशुधनक्षतिः, शत्रुसङ्कटम्।

**केतुः** - अशनिभयम्, अग्निभयं, शस्त्रभयं, स्वदेशपरित्यागः, धनक्षयः, स्वाभाविकमृत्युः।

**शुक्रः** - युद्धे पराजयः, परदेशवासः, धनक्षतिः, वामनेत्रे कष्टं, परिजनहानिः।

**सूर्यः** - राजसम्मानप्राप्तिः, युद्धेन प्रभावः, यशोवर्धनं, धनधान्यस्त्र्यायादीनाम् अधिकारः, अतिविलासी, साहसप्राप्तधनवान्।

**चन्द्रः** - बहुविधधनसन्ततिप्राप्तिः, वस्त्रशय्याभूषणादीनां प्राप्तिः, गुरुजनानां पीडा, शत्रुभिः वैरं, पित्तकोपः।

## १३.१४. राहुमहादशायामन्तर्दशाफलानि

**राहुः** - विषजलोत्पन्नाः व्याधयः, दुष्टसर्पाणां दंशनम्, परस्त्रीसहवासः, स्वजनानां वियोगः, दुष्टजनैः अपशब्दैः च मानसिकक्लेशः।

**गुरुः** - सौख्यम्, देवब्राह्मणपूजनम्, अरोगता, स्त्रीसमागमः, पुण्यशास्त्रेषु चर्चाविचाराः।

**शनिः** - वातपित्तजन्यव्याधयः, शरीरे क्षतिः, स्त्रीपुत्रसहोदरैः विरोधः, भृत्यनाशः, पदच्युतिः।

**बुधः** - धनपुत्रलाभः, मित्रसमागमः, मनसि हीनभावना, बौद्धिककार्यकुशलता, आभरणलाभः।

**केतुः** - ज्वरपीडा, अग्निभयम्, रिपुभयम्, शस्त्रभयम्, शिरोरोगः, शरीरकम्पः, सुहृद्गुरुजनानां कष्टम्, विषव्रणपीडा, मित्रैस्सह कलहः।

**शुक्रः** - स्त्रीलाभः, शयनोपकरणहस्तितुरगभूम्यादीनां प्राप्तिः, कफवातविकारः, स्वजनविरोधः।

**रविः** - शत्रुव्यथा, नेत्रपीडा, विषाग्निशस्त्रविपत्तिः, पुत्रकलत्रादीनां कष्टम्, राजभयञ्च।

**चन्द्रः** - स्त्रीवियोगः, कलहः, मनोरोगः, कृषिकार्ये व्यस्तता, धनपशुसन्ततीनां विनाशः, सुहृद्विपत्तिः,

जलभयम्।

**कुजः** - नृपाग्निचोरशस्त्रभयम्, महाव्याधिः, शरीरनाशः, पदच्युतिः, हृदये नेत्रे च पीडा।

## स्वावलोकनप्रश्नः

**२. कुजमहादशायां सर्वेषां ग्रहाणामन्तर्दशाफलानि लिखत ?**

## १३.१५. बृहस्पतिमहादशायामन्तर्दशाफलानि

**गुरुः** - भाग्यसुखम्, शरीरकान्तिः, मानाभिवृद्धिः, सद्गुणोदयः, सत्पुत्रप्राप्तिः, राजसम्माननम्, साधुजनसंयोगः, अभीष्टसिद्धिः।

**शनिः** - वेश्यासमागमः, मद्यासक्तिः, सुखोत्कर्षः, कुटुम्बपीडा, धनस्यापव्ययः, नेत्रपीडा, सन्तानक्लेशः।

**बुधः** - स्त्रीद्यूतकर्ममदिरादिना व्याधिः, वायुपित्तकफकोपेन कष्टम्, सुखी, देवताब्राह्मणाद्यर्चना, पुत्रधनसौख्ययुतः।

**केतुः** - शस्त्रव्रणम्, भृत्यजनविरोधः, पत्नीपुत्रादीनां कष्टम्, गुरुसुहृज्जनानां वियोगः, प्राणसङ्कटम्।

**शुक्रः** - धनधान्यपशुवस्त्रस्त्रीपुत्रान्नपेयशय्याभूषणादीनां प्राप्तिः, देवब्राह्मणेषु श्रद्धा।

**रविः** - शत्रुजयः, राजसम्माननं, यशः, स्वभावे उग्रता, वाहनादिसुखप्राप्तिः, पुरग्रामादिवासः।

**सोमः** - शत्रुविजयी, स्त्रीस्वामी, कृष्यादिधनलाभः, यशोवान्, देवद्विजार्चनारतः।

**मङ्गलः** - स्वजनसन्तुष्टिः, शत्रुतः धनलाभः, सुक्षेत्रप्राप्तिः, सत्कर्माभिवृद्धिः, नेत्राघातः।

**सर्पः** - स्वजनपीडा, मानसिकक्लेशः, शरीरव्याधिः, चोरभयम्, उदरव्याधिः, राजपीडा, अरिव्यसनम्, धनविनाशः।

## १३.१६. शनिमहादशायामन्तर्दशाफलानि

**शनिः** - कृषिकार्येषु वृद्धिः, भृत्यमहिषादिलाभः, वातकोपः, निम्नवर्गाद्धनागमः, वृद्धस्त्रीसमागमः।

**सौम्यः** - सुखवैभवयुतः, स्त्रीसङ्गतिः, नृपकृपा, सफलता, सुहृद् समागमः, त्रिदोषजन्यकष्टम्, स्वजनपुत्ररोगाः।

**शिखी** - वाय्वग्निबाधापीडितः, शत्रुभयम्, स्त्रीपुत्रादिविरोधः, सर्पभयम्, अशुभफलानि।

**भृगुः** - सुहृत्स्त्रीपुत्रादिना सुखी, कृषिसमुद्रयात्रादिना धनप्राप्तिः, शुभकीर्तिः।

**रविः** - मृत्युः अथवा असह्यशत्रुभयम्, गुरूणां रोगपीडा, उदरनेत्रपीडा, धनधान्यादिक्षतिः।

**शीतकिरणः** - मृत्युभयम्, स्वजनेषु विपत्तिः, रोगभयम्, जलवातकोपात् विनाशः।

**मङ्गलः** - पदच्युतिः, स्वजनविरोधः, ज्वराग्निशस्त्रविषभीतिः, शत्रुवृद्धिः, नेत्रक्लेशः।

**राहुः** - कुमार्गे प्रवृत्तिः, प्राणभयम् अथवा प्रमेहगुल्मादिरोगभयम्, सदारोगः, क्षतिः।

**गुरुः** - देवब्राह्मणार्चनायामभिरुचिः, स्त्रीपुत्रादिभिः सह ग्रहवाससौख्यम्, धनधान्याभिवृद्धिः।

## १३.१७. बुधमहादशायामन्तर्दशाफलानि

**बुधः** - धर्ममार्गे निरतः, विद्वज्जनैः समागमः, कलङ्करहितमतिः, ब्राह्मणात् धनप्राप्तिः, विद्यया कीर्तिः, सुखम्।

**केतुः** - दुःखं, शोकः, कलहः, आकुलता, शरीरकम्पनम्, शत्रुसमागमः, क्षेत्रवाहनानां नाशः।

**भृगुसुतः** - देवविप्रगुरूणां पूजनम्, दानधर्मादिषु निरतः, सुहृत्समागमः, वस्त्रभूषणादीनां लाभः।

**सूर्यः** - हेमविद्रुमतुरङ्गगजानां प्राप्तिः, पेयभोज्यपदार्थानां भवनस्य च लाभः, राजसम्माननम्।

**चन्द्रः** - मस्तकक्लेशः, नेत्रयोः पीडा, कुष्ठदद्रुबहुकण्ठपीडा, प्राणहानिः।

**कुजः** - अग्निभीतिः, नेत्ररोगः, चोरभयम्, अतिदुःखम्, स्थानहानिः, वातरोगाः।

**राहुः** - मानहानिः अथवा स्थानभ्रंशः, धनक्षयः, जलाग्निविषभयम्, उदरशिरश्चक्षुषां पीडा।

**गुरुः** - रोगः, शत्रुभयात् मुक्तिः, ब्रह्मज्ञानप्राप्तिः, राजसम्माननम्, तपोऽनुष्ठानादिषु सफलता।

**शनिः** - धर्मार्थक्षतिः, सर्वकार्यफलविनाशः, कफवातकोपात् क्लेशः रोगाश्च।

## १३.१८. केतुमहादशायामन्तर्दशाफलानि

**केतुः** - शत्रुभिः कलहः, मित्रविरोधः, अशुभवश्रवणम्, ज्वरः, शरीरोष्णता, परगृहवासः, धननाशः।

**शुक्रः** - द्विजैः कलहः, स्त्रीविरोधः, स्वीयजनैः विरोधः, कन्याजन्म, अपमानम्, परितापः।

**सूर्यः** - गुरुजनमरणम्, ज्वरः, स्वजनविरोधः, विदेशयात्रा, वाहनप्राप्तिः, राज्ञा कलहः, वातकफदोषात् रोगः।

**चन्द्रः** - विपुलधनप्राप्तिः तथैव तस्य नाशश्च, पुत्रविरहः, दुःखेन प्रसवः, सेवकानां पुत्रीणां च प्राप्तिः।

**कुजः** - स्वकुलजनैः कलहः, बान्धवानां नाशः, सर्पचोरात् भयम्, अग्निभयम्, शत्रुपीडनम्।

**राहुः** - शत्रुकलहः, नृपाग्निचोरैः भयम्, सर्पभयम्, दुर्जनानां वचःश्रवणम्, परेषामहितकार्येषु उत्साहः।

**बृहस्पतिः** - सुपुत्रप्राप्तिः, देवपूजनम्, भूसम्पदादिलाभः, उपहारादितः धनलाभः, विधिप्राप्तिः, राजसम्माननम्।

**शनिः** - परिजनविहतिः, अन्यैः जनैः क्लेशः, शत्रुविरोधः, अङ्गभङ्गः, धनविनाशः, स्थानभ्रंशः।

**बुधः** - श्रेष्ठपुत्रप्राप्तिः, प्रभुजनैः प्रशस्तिः, क्षितिधनलाभः, शत्रुपीडा, पशूनां कृषीणां च हानिः।

## १३.१९. शुक्रमहादशायामन्तर्दशाफलानि

**शुक्रः** - वस्त्राभरणयानचन्दनादीनां प्राप्तिः, स्त्रीसुखप्राप्तिः, सौन्दर्यवर्धनम्, राज्ञः धनप्राप्तिः।

**रविः** - नेत्रकुक्षिकपोलेषु रोगस्योद्भवः, राज्ञः भयम्, गुरूणां स्वकुलोत्पन्नानां नाशः।

**चन्द्रः** - नखशिरोनेत्रेषु क्षतिः, वायुपित्तजन्यरोगाः, धनस्य नाशः, ग्रहणिगुल्मकयक्ष्मकपीडनम्।

**कुजः** - रक्तदोषः, वायुपित्तकोपादुत्पन्नव्याधयः, स्वर्णताम्रसम्पदः प्राप्तिः, व्यावसायिकक्षतिः, अङ्गनाप्राप्तिः।

**राहुः** - धनकोशप्राप्तिः, पुत्रलाभः, इष्टवाक्, स्वजनपूजनम्, शत्रुनाशः, अग्निचोरविषात् भयं पीडनं च।

**गुरुः** - धर्मानुसारं देवपूजने मग्नः, स्त्रीपुत्रादिना साकं सुखवासः, राज्यकार्यादानन्दः।

**शनिः** - नगरस्य प्रमुखः, सेनानायकः, नृपपूजितः, उत्तमस्त्रीणां प्राप्तिः, विविधप्रकारैः धनस्यागमः।

**बुधः** - सन्तानसुखम्, सम्पदाप्राप्तिः, प्रभुत्वं, यशः, वातपित्तकफदोषात् रोगः, शत्रुनाशः।

**केतुः** - सन्तानादिसुखविहीनः, अग्निभयम्, अङ्गरोगः, वाराङ्गनास्वभिरुचिः।

**१३.१९.१. दशापहारेषु फलं यदुक्तं, वर्णाधिकारानुगुणं वदन्तु।**

**छिद्रेषु सूक्ष्मेष्वपि तत्फलाप्तिः छायाङ्गवार्ताश्रवणानि वा स्युः।।**

दशापहारेषु यानि यानि फलानि उक्तानि तानि जातकस्य वर्णादिकमनुश्रित्य वक्तव्यानि। अन्तर्दशां प्रत्यन्तर्दशां च परिशील्य फलानि वक्तव्यानि।

## १३.२०. दशाभेदाः

**१३.२०.१.** कालचक्रदशा, निसर्गदशा, धरादशा, पिण्डायुर्दशा च।

## १३.२१. कालचक्रदशाविवरणम्

**१३.२१.१ दस्रादितः पादवशेन मेषान्मीनांशकान्तं क्रमशोपसव्यम्।**

**कीटाद्धयान्तं गणयेच्च सव्यमार्गेण पादक्रमशोऽजतारात्।।**

अश्विन्यादित्रिनक्षत्राणां द्वादशचरणेषु मेषादारभ्य मीनपर्यन्तं द्वादशराशीनाम् अपसव्यक्रमेण स्थापनं कार्यम्। पुनः रोहिण्यादित्रिनक्षत्राणां द्वादशचरणेषु वृश्चिकराशितः समारभ्य सव्यमार्गेण धनूराशिपर्यन्तं द्वादशराशीनां स्थापनं कार्यम्। अस्मिन्नेव क्रमे पुनर्वस्वादि त्रित्रिनक्षत्राणां चरणेषु द्वादशराशीनां क्रमशः अपसव्यक्रमेण सव्यक्रमेण च मेषात् तथा वृश्चिकात् स्थापनं कार्यम्।

एवं प्रकारेण त्रि त्रि नक्षत्रसमूहानां क्रमशः अपसव्यसव्यरूपेण च भेदद्वयं भवति। कालचक्रदशाप्रकारेण ग्रहाणां यानि दशावर्षाणि उक्तानि तान्येव दशावर्षाणि मेषादिराशीनामपि भवन्ति। तत्कथमित्यत्र अग्रिमे श्लोके उच्यते। यथा --

**मनुः परः सनिर्धनिर्नृपस्तपो वने क्रमात्।**

**दिवाकरादिवत्सराः शुभाशुभाप्तिहेतवः।।** इति।

अत्र --

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| मनुः | - | ०५ | परः | - | २१ | | | |
| सनिः | - | ०७ | धनिः | - | ०९ | | | |
| नृपः | - | १० | तपः | - | १३ | वने | - | ०४ |

वर्षाणि क्रमशः रव्यादीनां दशावर्षाणि भवन्ति। एतान्येव दशावर्षाणि राशीणामपि कथं भवतीत्यत्र उच्यते। यथा --

सूर्यदशावर्षाणि (०५) = सिहंदशावर्षाणि।

चन्द्रदशावर्षाणि (२१) = कर्कदशावर्षाणि।

कुजदशावर्षाणि (०७) = मेषवृश्चिकयोः दशावर्षाणि।

बुधदशावर्षाणि (०९) = मिथुनकन्ययोः दशावर्षाणि।

गुरुदशावर्षाणि (१०) = धनुर्मीनयोः दशावर्षाणि।

शुक्रदशावर्षाणि (१३) = तुलावृषयोः दशावर्षाणि।

शनिदशावर्षाणि (०४) = मकरकुम्भयोः दशावर्षाणि।

अत्र श्लोकेषु संख्याकथनार्थं कटपयादिसंख्याक्रमः उपयुक्तः। कटपयादिसंख्याक्रमः भारतीयज्योतिश्शास्त्रस्य एव विशिष्टः प्रकारः। कटपयादिरीत्या संख्याज्ञानम् एवं भवति। अत्र संख्याज्ञानं - **कादिनव, टादिनव, पादिपञ्च, याद्यष्टौ इति सूत्रेण** भवति।

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| कादिनव - | क | ख | ग | घ | ङ | च | छ | ज | झ | ञ |
| | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | ० |
| टादिनव - | ट | ठ | ड | ढ | ण | त | थ | द | ध | न |
| | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | ० |
| पादिपञ्च - | प | फ | ब | भ | म | | | | | |
| | १ | २ | ३ | ४ | ५ | | | | | |
| याद्यष्टौ - | य | र | ल | व | श | ष | स | ह | | |
| | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | | |

एवं प्रकारेण संख्या ज्ञेया। उदाहरणम् .

मनुः - म . ५, न . ०, अतः . ०५

परः - प . १, र . २, अतः . २१ (अङ्कानां वामतो गतिः) इति क्रमः।

## १३.२२. निसर्गदशा

**१३.२२.१ एकं द्वे नव विंशतिः धृतिः कृति पञ्चाशदेषां क्रमात् --**

**चन्द्रारेन्दुजशुक्रजीवदिनकृद्दैवाकरीणां समाः।**

**स्वै स्वैः पुष्टफला निसर्गजनितैः पंक्तिर्दशायाः क्रमा -**

**दन्ते लग्नदशा शुभेति यवना नेच्छन्ति केचित्तथा।।**

अत्र प्रथमं ग्रहाणां निसर्गदशावर्षाण्युच्यन्ते। तद्यथा -- चन्द्रस्य एकं, कुज्यस्य द्वयं, बुधस्य नव, शुक्रस्य विंशतिः, गुरोः अष्टादश, रवेः विंशतिः, शनेः पञ्चाशत् च वर्षाणि निसर्गदशाकालः भवति। यस्य ग्रहस्य बलाधिक्यं जातके विद्यते तस्य ग्रहस्य दशा आदौ भवति। अनन्तरं बलानुसारं यथाक्रमं प्रत्येकस्य ग्रहस्य दशा सम्भवति। अन्ते लग्नदशा च भवतीति यवनाचार्यः। किन्तु कैश्चन पण्डितैः एतन्मतं न स्वीक्रियते।

## १३.२३. धरादशा

**१३.२३.१ लिप्तीकृत्य भजेद्ग्रहं खखजिनैस्तच्छिष्टमायुष्कला**

**आशाखश्विहृताब्दमासदिवसाः सत्योदितेंऽशायुषि।**

**वक्रिण्युच्चगते त्रिसङ्गुणमितं स्वांशत्रिभागोत्तमे**

**द्विघ्नं नीचगतेऽर्धमप्यथ दलं मौढ्ये सितार्की विना।।**

ग्रहस्य राश्यादिभुक्तकालः कलायामानीय चतुर्विंशतिशतेन भागः क्रियते तर्हि शेषः आयुष्कलाः भवन्ति। लब्धायुष्कलाः द्विशतेन भागः कार्यः। लब्धिः ग्रहस्य वर्षादिप्रदत्तायुः भवति। एवं सत्याचार्यः। यदि ग्रहः वक्री वा उच्चगतः तर्हि तेन ग्रहेण प्रदत्तायुः त्रिगुणितः भवति। ग्रहः स्वराशौ, स्वनवांशे, स्वद्रेष्काणे, वर्गोत्तमांशे वा स्थितश्चेत् तेन प्रदत्तायुः

द्विगुणितः क्रियते। नीचराशौ वा मौढ्ये वा भवति तर्हि प्रदत्तायुषः अर्धभागः दीयते। किन्तु शनिशुक्रयोः मौढ्ये सत्यपि ह्रासः न जायते।

**सर्वार्धत्रिकृतेषुषण्मितलवह्रासोऽसतामुत्क्रमा.**

**द्रिःफात्सत्सु दलं वा हरति बल्येको बहुष्वेकभे।**

**त्र्यंशोनं रिपुभे विना क्षितिसुतं सत्योपदेशे दशा**

**लग्नस्यांशसमा बलिन्युदयभेऽस्यात्रापि तुल्यापि च।।**

पापग्रहस्य द्वादशभावस्थित्या प्रदत्तायुषः पूर्णं नश्यति। तस्य स्थितिः एकादशे भावे चेत् आयुर्दायस्य अर्धं, दशमे तृतीयांशः, नवमे पादः, अष्टमे पञ्चमेशः, सप्तमे षष्ठांशः च ह्रीयते। एषु उपर्युक्तस्थानेषु शुभग्रहाः तर्हि उक्तस्यार्धभागस्यैव हानिः जायते। अर्थात् द्वादशभावे स्थितस्य शुभग्रहस्य आयुर्दायस्य अर्धं, एकादशस्थस्य पादः, दशमस्थितस्य षष्ठांशः, नवमगतस्य अष्टमांशः, अष्टमे स्थितस्य दशमांशः, सप्तमगतस्य द्वादशांशः एव ह्रीयते। कुजं त्यक्त्वा शत्रुक्षेत्रे विद्यमानानाम् अन्येषां ग्रहाणाम् आयुर्दायस्य तृतीयांशस्य ह्रासः भवति। लग्नस्यायुर्दायः तस्य उदितनवांशतुल्यसंख्याकाः भवन्ति। लग्नं बलिष्ठं तर्हि लग्नोदितराशितुल्यवर्षाणि आयुर्दायः। एवं सत्याचार्यः।

सत्याचार्यस्य मतम् अन्येषां मतानामपेक्षया श्रेष्ठं चेदपि वृद्धिहरणादीनाम् आधिक्यात् अयोग्यं वा इति संशयः जायते। तथैव एकस्मिन् राशौ बहवः ग्रहाः भवन्ति तर्हि सर्वेषाम् आयुर्दायस्य ह्रासः भवति वा इति प्रश्ने सति, तेषु बलिष्ठस्य ग्रहस्य आयुर्दायस्यैव ह्रासः जायते इति।

## १३.२४. पिण्डायुर्दशा

१३.२४.१ **धेयं शूरशके श्रियं स्मय परे निद्राः समा भास्करात्**

**पिण्डाख्यायुषि पूर्ववच्च हरणं सर्वं विदध्यादिह।**

**लग्ने पापिनि भं विनोदयलवैर्निघ्नं नताङ्गैर्हृतं**

**त्याज्यं सौम्यनिरीक्षितेऽर्धमृणमत्रायुष्यभिज्ञाः विदुः।।**

सूर्यादिग्रहाणां पिण्डायुर्दायः यथाक्रमं १९,२५,१५,१२,१५,२१,२० च वर्षाणि भवन्ति। उपर्युक्तषड्विधहरणानि अत्रापि अनुवर्तनीयानि। कटपयादिविधिनाऽत्र संख्याक्रमः प्रदत्तः। उदा . धेयं . १०, शूर . २५ एवमेवान्यत्र ज्ञेयम्।

लग्नं विहाय अंशादिमात्रग्रहणेन प्रदत्तायुर्दायानां योगं संगुण्य ३६० संख्यातः विभज्यते तदा यत् फलमुपलभ्यते तस्य पूर्णायुषः हरणं क्रियते चेत् स्पष्टायुर्वर्षाणि भवन्ति। इयं क्रिया तदानीमेव कार्या यदा लग्ने न कोऽपि पापग्रहः स्यात्। लग्ने पापग्रहे सत्यपि शुभग्रहाणां दृष्टिः तदुपरि भवति चेत् तदा उपर्युक्तक्रियया प्राप्तफलस्यार्धमेव पूर्णायुर्वर्षेभ्यः हरणं कार्यम्। पारगमनीषिणामिदं वचनम्।

**१३.२४.२.** पिण्डायुर्दाये लग्नायुः प्रमाणं एवं कथयति। लग्न - लग्ननवांशयोर्मध्ये लग्नस्य बलाधिक्यं चेत् राशिसंख्या- तुल्यवर्षाणि, लग्ननवांशस्य बलाधिक्यं तर्हि नवांशतुल्यवर्षाणि च लग्नायुः भवति।

**१३.२४.३.** सूर्यादिग्रहाणां पूर्वोक्तायुः प्रमाणं तेषां परमोच्चस्थित्यामेव प्राप्यते। परमनीचेविद्यमानः ग्रहः उक्तायुषः अर्धं ददाति। उच्चनीचयोर्मध्ये विद्यमानस्य अनुपातः क्रियते तर्हि तस्मात् प्राप्यमाणायुः ज्ञायते।

## १३.२५. ग्रहाणामायुर्दायः

**१३.२५.१.** जीवशर्मणः मतानुसारं परमायुषः (१२० वर्षाणि, ५ दिनानि) सप्तमांशतुल्यवर्षाणि सूर्यादिग्रहाणामायुर्दायः भवति। अत्र अनन्तरकर्माणि पूर्ववत् करणीयानि।

**१३.२५.२.** परमायुषः भेदाः एवमुच्यन्ते। केचन १२० वर्षाणि परमायुः इति कथयन्ति। केचन शनेः त्रयः भगणाः, तथा केचन चन्द्रस्य सहस्रभगणाः इति कथयन्ति। किन्तु शतवर्षाणि कलियुगे आयुषः प्रमाणमिति कथयन्ति आचार्याः।

**१३.२५.३.** प्रथमदशानिर्णयः एवमुच्यते --

लग्नसूर्यचन्द्रेषु बलवतः दशा प्रथमं भवति। तदनन्तरं तस्मात् वा लग्नात् केन्द्रे विद्यमानस्य बलवतः दशा भवति। केन्द्रे विद्यमानानां ग्रहाणां दशायाः अनन्तरं पणफरस्थानेषु स्थितानां, ततः आपोक्लिमस्थानस्थितानां दशा भवति। केन्द्रादिस्थानेषु एकाधिकग्रहाः भवन्ति

तर्हि तेषु बलवतः दशा आदौ भवति। वीर्यसमाने सति यस्य आयुर्दायः अधिकः तस्य दशा आदौ भवति। आयुर्दायोऽपि समानः चेत् यस्य मौढ्यादुदयः प्रथमं भवति तस्य दशा प्रथमम्। उदयेऽपि समानता दृश्यते चेत् स्वाभाविकक्रमेण पूर्वस्थितस्य ग्रहस्य दशा प्रथमं भवति।

## १३.२६. का दशा स्वीकरणीया इति

**१३.२६.१ अंशोद्भवं लग्नबलात्प्रसाध्यमायुश्च पिण्डोद्भवमर्कवीर्यात्।**

**नैसर्गिकं चन्द्रबलात्प्रसाध्यं ब्रूमस्त्रयाणामपि वीर्यसाम्ये।।**

लग्नस्य बलाधिक्ये सति अंशजदशा, सूर्यस्य बलाधिक्ये सति पिण्डजदशा, बलवान् चन्द्रः तर्हि नैसर्गिकदशा च स्वीकर्तव्या। किन्तु लग्नचन्द्रसूर्याः समानबलिनः चेत् का दशा स्वीकर्तव्या इत्युच्यते।

**१३.२६.२ तेषां त्रयाणामिह संयुतिस्तु त्रिभिर्हृता सैव दशा प्रकल्प्या।**

**वीर्ये द्वयोरैक्यदलं तयोः स्यात् चेज्जीवशर्मायुरमी बलोनाः।।**

लग्नसूर्यचन्द्राः समानबलिनः तर्हि तेषाम् आयुषः योगं कृत्वा त्रिभिः विभजनीया। लब्धितुल्यवर्षादयः दशावर्षाणि भवन्ति। एषु द्वयोः समानबलत्वे सति द्वयोः आयुर्दाययोः योगं कृत्वा द्विसंख्यया विभजनीया। लब्धिः आयुर्दायः भवति। एते त्रयः हीनबलिनः तर्हि जीवशर्मणः आयुर्दायः स्वीकर्तव्यः।

**१३.२६.३.** जन्मकालिकचन्द्रनवांशः नवांशाधिपः च बलवान् तर्हि कालचक्रदशा स्वीकर्तव्या। नक्षत्राधारेण विद्यमानः विंशोत्तरीदशा बलवती इति कथ्यते।

## १३.२७. विभिन्नजन्तूनां परमायुः

**१३.२७.१ समाः षष्टिर्द्विघ्ना मनुजकरिणां पञ्च च निशा**

**द्वयानां द्वात्रिंशत्खरकरभयोः पञ्चककृतिः।**

**विरूपा साप्यायुर्वृषमहिषयोर्द्वादश शुनां**

**स्मृतं छागादीनां दशकसहिताः षट् च परमम्।**

गजानां मनुष्याणां च परमायुः १२० वर्षाणि पञ्चदिनानि, अश्वस्य ३२ वर्षाणि, खरकरभयोः २५ वर्षाणि, वृषमहिषयोः २४ वर्षाणि, शुनां १२ वर्षाणि, छागादीनां १३ वर्षाणि च परमायुः भवति।

## १३.२८. परमायुषः अधिकारी

**१३.२८.१ ये धर्मकर्मनिरता विजितेन्द्रिया ये**
**ये पथ्यमोजनजुषो द्विजदेवभक्ताः।**
**लोके नरा दधति ये कुलशीललीलां**
**तेषामिदं कथितमायुरुदारधीभिः।।**

यः धर्मकर्मेषु निरतः, इन्द्रियाणि जितः, पथ्यभोजनस्वीकर्ता, देवब्राह्मणभक्तः, वंशकुलाचरणशीलः च भवति सः परमायुः प्राप्तुं योग्यः।

## १३.२९. आदर्शप्रश्नाः

१. विंशोत्तरीदशानयनप्रकारं विवृणुत।

२. रव्यादीनां महादशाफलानि विवृणुत।

३. गुरुमहायादशायां प्रत्येकं ग्रहस्यान्तर्दशाफलानि लिखत।

४. दशाभेदान् निरूपतय।

५. शुक्रदशाफलं विवृणुत।

# चतुर्दशः खण्डः
# अष्टकवर्गाष्टकवर्गफलाध्यायौ

## संरचना

**१४.१.प्रस्तावना**

**१४.२. लक्षिताधिगमविशेषाः**

**१४.३. अष्टकवर्गप्रस्तुतिः**

**१४.४. फलप्रातिकालज्ञानम्**

**१४.५. प्रस्तराष्टकवर्गः**

**१४.६. सर्वाष्टकवर्गः**

**१४.७. अष्टकवर्गफलम्**

**१४.८. आयुष्यनिर्णयः**

**१४.९. आदर्शप्रश्नाः**

## १४.१.प्रस्तावना

मनुष्येषु गोचरग्रहस्य प्रभावस्य विवेचने अष्टकवर्गस्य प्रबलं महत्त्वमाचार्यैः प्रकीर्तितं वर्तते। अष्टकवर्गे लग्नसहिताः सप्तग्रहा भवन्ति। मनुष्यो यथा जन्मकालिकग्रहस्थित्या प्रभावितो भवति तथैव प्रात्यहिकग्रहचलनेव अपि प्रभावितो भवति। ग्रहाणां दैनिकसञ्चालनेन मनुष्ये आगतस्य प्रभावस्याध्ययनाय अष्टकवर्गः उपयोगी भवति।

## १४.२. लक्षिताधिगमविशेषाः

* अष्टकवर्गनिर्माणप्रकारं ज्ञास्यन्ति।

* अष्टकवर्गे फलप्राप्तिकालज्ञानं सम्भवति।

* अष्टकवर्गफलज्ञानं सम्भवति।

* अष्टकवर्गात् आयुर्नर्णयज्ञानं सम्भवति।

## १४.३. अष्टकवर्गप्रस्तुतिः

राशिचक्रे जन्माङ्गकालिकग्रहात् तत्तद्भावे लिखित्वा अधोलिखितक्रमेण बिन्दवः स्थापनीयाः। एवमष्टकवर्गो निर्मीयते। सूर्यादिग्रहाणां बिन्दुसङ्ख्या यथाक्रमं ४८, ४९, ३९, ५४, ५६, ५२, ३९ भवन्ति। यस्माद् ग्रहात् यो ग्रहः यत्र शुभ इति उच्यते तत्र बिन्दवः अन्यत्र च रेखाः स्थापनीयाः।

अधःकोष्ठकात् कः ग्रहः कस्मात् ग्रहात् कस्मिन् स्थाने शुभ इति ज्ञायताम् -

| ग्रहः | कस्मात् | कस्मिन् शुभः | कस्मिन् अशुभः |
|---|---|---|---|
| **रविः** | लग्नम् | ३,४,६,१०,११,१२ | १,२,५,७,८,९ |
| | चन्द्रः | ३,६,१०,११ | १,२,४,५,७,८,९,१२ |
| | कुजः | १,२,४,७,८,९,१०,११ | ३,५,६,१२ |
| | बुधः | ३,५,६,९,१०,११,१२ | १,२,४,७,८ |
| | गुरुः | ५,६,९,११ | १,२,३,४,७,८,१०,१२ |
| | शुक्रः | ६,७,१२ | १,२,३,४,५,८,९,१०,११ |
| | शनिः | १,२,४,७,८,९,१०,११ | ३,५,६,१२ |
| | रविः | १,२,४,७,८,९,१०,११ | ३,५,६,१२ |
| **चन्द्रः** | लग्नम् | ३,६,१०,११ | १,२,४,५,७,८,९,१२ |
| | रविः | ३,६,७,८१०,११ | १,२,४,५,९,१२ |
| | चन्द्रः | १,३,६,७,१०,११ | २,४,५,८,९,१२ |
| | कुजः | २,३,५,६,९,१०,११ | १,२,७,८,१२ |
| | बुधः | १,३,४,५,७,८,१०,११ | २,६,९,१२ |
| | गुरुः | १,२,४,७,८,१०,११ | ३,५,६,९,१२ |

| | | | |
|---|---|---|---|
| | शुक्रः | ३,४,५,७,९,१०,११ | १,२,६,८,१२ |
| | शनिः | ३,५,६,११ | १,२,४,७,८,९,१०,१२ |
| **कुजः** | लग्नम् | १,३,६,१०,११ | २,४,५,७,८,९,१२ |
| | रविः | ३,५,६,११ | १,२,४,७,८,९,१०,१२ |
| | चन्द्रः | ३,६,११ | १,२,४,५,७,८,९,१०,१२ |
| | कुजः | १,२,४,७,८,१०,११ | ३,५,६,९,१२ |
| | बुधः | ३,५,६,११ | १,२,४,७,८,९,१०,१२ |
| | गुरुः | ६,१०,११,१२ | १,२,३,४,५,७,८,९ |
| | शुक्रः | ६,८,११,१२ | १,२,३,४,५,७,९,१० |
| | शनिः | १,४,७,८,९,१०,११ | २,३,५,६,१२ |
| **बुधः** | लग्नम् | १,२,४,६,८,१०,११ | ३,५,७,९,१० |
| | रविः | ५,६,९,११,१२ | १,२,३,४,७,८,१० |
| | चन्द्रः | २,४,६,८,९,१०,११ | १,३,५,७,१२ |
| | कुजः | १,२,४,७,८,९,१०,११ | ३,५,६,१२ |
| | बुधः | १,३,५,६,९,१०,११,१२ | २,४,७,८ |
| | गुरुः | ६,८,११,१२ | १,२,३,४,५,७,९,१० |
| | शुक्रः | १,२,३,४,५,८,९,११ | ६,७,१०,१२ |
| | शनिः | १,२,४,७,८,९,१०,११ | ३,५,६,१२ |
| **गुरुः** | लग्नम् | १,२,४,५,६,७,९,१०,११ | ३,८,१२ |
| | रविः | १,२,३,४,७,८,९,१०,११ | ५,६,१२ |
| | चन्द्रः | २,५,७,९,११ | १,३,६,८,१०,१२ |
| | कुजः | १,२,४,७,८,१०,११ | ३,५,६,९,१२ |

| | | | |
|---|---|---|---|
| | बुधः | १,२,४,५,६,९,१०,११ | ३,७,८,१२ |
| | गुरुः | १,२,३,४,७,८,१०,११ | ५,६,९,१२ |
| | शुक्रः | २,५,६,९,१०,११ | १,३,४,७,८,१२ |
| | शनिः | ३,५,६,१२ | १,२,४,७,८,९,१०,११ |
| **शुक्रः** | लग्नम् | १,२,३,४,५,८,९,११ | ६,७,१०,१२ |
| | रविः | ८,११,१२ | १,२,३,४,५,६,७,९,१० |
| | चन्द्रः | १,२,३,४,५,८,९,११,१२ | ६,७,१० |
| | कुजः | ३,५,६,९,११,१२ | १,२,४,७,८,१० |
| | बुधः | ३,५,६,९,११ | १,२,४,७,८,१०,१२ |
| | गुरुः | ५,८,९,१०,११ | १,२,३,४,६,७,१२ |
| | शुक्रः | १,२,३,४,५,८,९,१०,११ | ६,७,१२ |
| | शनिः | ३,४,५,८,९,१०,११ | १,२,६,७,१२ |
| **शनिः** | लग्नम् | १,३,४,६,१०,११ | २,५,७,८,९,१२ |
| | रविः | १,२,४,७,८,१०,११ | ३,५,६,९,१२ |
| | चन्द्रः | ३,६,११ | १,२,४,५,७,८,९,१०,१२ |
| | कुजः | ३,५,६,१०,११,१२ | १,२,४,७,८,९ |
| | बुधः | ६,८,९,१०,११,१२ | १,२,३,४,५,७ |
| | गुरुः | ५,६,११,१२ | १,२,३,४,५,७,८,९,१० |
| | शुक्रः | ६,११,१२ | १,२,३,४,५,७,८,९,१० |
| | शनिः | ३,५,६,११ | १,२,४,७,८,९,१०,१२ |

इत्थम् उपर्युक्तकोष्ठके दत्तानां निर्देशानामनुसारेण निर्मातव्यः। तत्र येषु भावेषु शुभं फलं तत्र बिन्दुः (०) अन्यत्र रेखा (।) च स्थापनीया यथा -

| | | | |
|---|---|---|---|
| कु बु<br>शु | लग्नम्<br>सूर्यः | | |
| केतुः | | | गुरुः |
| चन्द्रः | | | शनिः<br>राहुः |
| | | | |

इति जन्माङ्गस्य सूर्याष्टकवर्गः कथं निर्मातव्यः।

कोष्ठकानुसारं रविः लग्नात् ३,४,६,१०,११,१२ स्थानेषु शुभं फलं ददाति। प्रकृते सूर्यः लग्नेऽस्तीति ३,४,६,१०,११,१२ स्थानेषु बिन्दुः अन्यत्र रेखा स्थापनीया, पुनः रविः चन्द्रात् ३,६,१०,११ स्थानेषु शुभं ददाति। अतः चन्द्रराशेः तेषु भावेषु नाम १२,३,७,८ राशिषु बिन्दुः स्थापनीयः। अन्यत्र रेखाः स्थापनीया। एवमन्येषां ग्रहाणामपि तद्ग्रहाधिष्ठितराशेः तेषु तेषु भावेषु बिन्दुः रेखा वा स्थापनीया। इत्थमस्य जन्माङ्गस्य सूर्याष्टकवर्गः एवं भवति।

| | | | |
|---|---|---|---|
| ooooo कु<br>\|\|\| शु बु | ल सू<br>ooo\|\|\|\|\| | o o o o<br>\|\|\|\| | o o o o<br>\|\|\|\| |
| ooooo<br>\|\|\| के | | | o o o<br>गु \|\|\|\|\| |
| च oooo<br>\|\|\|\| | | | o o o\|\|\|\|\|<br>श रा |
| o o o o<br>\|\|\|\| | o o o o<br>o o\|\| | o o o<br>\|\|\|\|\| | o o o o<br>\|\|\|\| |

एवमस्य चन्द्राष्टकवर्गो भवति --

| | | | |
|---|---|---|---|
| कु शु बु<br>oo\|\|\|\|\|\| | ल सू<br>oo\|\|\|\|\| | o o o o<br>\|\|\|\| | o o o o<br>o o\|\| |
| के<br>ooo\|\|\|\|\| | | | o o o o<br>गु o \|\|\| |
| च oooooo<br>ooo | | | o o \|\|\|\|\|\|<br>श रा |
| o o o o<br>\|\|\|\| | o o o o<br>\|\|\|\| | o o o o o<br>\|\|\| | o o o o<br>\|\|\|\| |

अस्य भौमाष्टकवर्गः भवति –

<table>
<tr><td>कु शु बु<br>ooo|||||</td><td>ल सू<br>oooo||||</td><td>o o o o</td><td>o o o o</td></tr>
<tr><td>के<br>oooo||||</td><td colspan="2" rowspan="2"></td><td>o |||||<br>गु ||</td></tr>
<tr><td>चooooo<br>|||</td><td>o o o o<br>श रा ||||</td></tr>
<tr><td>o o<br>||||||</td><td>o o<br>||||||</td><td>o o<br>||||||</td><td>o o o o<br>||||</td></tr>
</table>

इत्थमष्टकवर्गाः रचनीयाः।

यदि सर्वेषु अष्टकवर्गेषु कश्चनराशिः बिन्दुरहितः स्यात् तर्हि सम्बन्धिग्रहेण तद्राशिसङ्क्रमणकाले जातकः मृतिं प्राप्नेति। यदि एक एव बिन्दुः स्यात् हानिः, बिन्दुद्वये व्ययः, बिन्दुत्रये भयम्, बिन्दुचतुष्टये भयम्, बिन्दुपञ्चके वाञ्छासिद्धिः, बिन्दुषट्के स्त्रीसुखम्, बिन्दुसप्तके धनलाभः, बिन्द्वष्टके राज्यसुखं प्राप्नोति। अतः उक्तम् --

**कृत्वाष्टवर्गं द्युसदां क्रियादिष्वक्षैर्विहीने मृतिरेकबिन्दोः।**

**नाशो व्ययो भीतियथार्थनारीश्रीराज्यसिद्धिः क्रमशः फलानि।।**

जन्मकाले कश्चन ग्रहो यावति राश्यंशे भवति यस्मिंश्च नवांशे भवति गोचरवशात् तद्राशौ तस्मिन्नेव नवांशे सङ्क्रमणावधौ तस्य भावस्य शुभाशुभफलानि जातकः प्राप्नोति।

जातके ग्रहाधिष्ठितराशिं तनुभावं मत्वा यस्मिन् भावे बिन्दवः अधिकाः स्युः तं भावं सर्वे ग्रहाः पोषयन्ति।

## १४.४. फलप्रातिकालज्ञानम्

राशिं समानेष्वष्टस्वंशेषु विभज्य राश्यादिग्रहाः कक्षाक्रमानुसारम् एकैकस्याष्टभागस्य अधिपतयः भवन्ति। यथा प्रथमाष्टमांशस्य शनिः, द्वितीयस्य गुरुः, तृतीयस्य कुजः, एवम्प्रकारेण अष्टमस्य लग्नम् स्वामी भवति। कस्मिंश्चिद्राशौ बिन्दुप्रदातृग्रहस्य अष्टमांशे गोचरवशात् कश्चन ग्रहो यदा सङ्क्राम्यति तदा उक्तराशिः यस्मिन् भावे तिष्ठति तस्य फलं लभ्यते।

## १४.५. प्रस्तराष्टकवर्गः

पूर्वापराः नवरेखाः उत्तरावराः त्रयोदश रेखाश्च लिखित्वा प्रस्तराष्टकवर्गः रच्यते। अस्मिन् चक्रे अधस्तात् क्रमशः लग्न-चन्द्र-बुध-शुक्र-रवि-कुज-गुरु-शनयः स्थापनीयाः। एता अष्टौ पङ्क्तयः राशेः अष्ट अष्टमांशान् प्रदर्शयति। द्वादशराशीनां येषु विभागेषु बिन्दवो भवति गोचरवशात् विचार्याष्टकवर्गसम्बन्धिग्रहस्य राशेः तत्तद्विभागे सङ्क्रमणकाले शुभफलं लभ्यते। एतदित्थं भवति --

| | | | |
|---|---|---|---|
| कु बु शु | लग्नम् सूर्यः | | |
| केतुः | जन्माङ्गः | | गुरुः |
| चन्द्रः | | | शनिः राहुः |
| | | | |

| | | | |
|---|---|---|---|
| oo कु बु ।।।।।।शु | ल सू oooooo।। | o o o o ।।।। | o o o ।।।।। |
| oooo ।।।। के | गुर्वष्टकवर्गः | | o o o o o गु o o । |
| च oooo ooo। | | | o o o।।।। श रा |
| o o o o o o।। | o o o o ।।।। | o o o o o ।।। | o o o o ।।।। |

### गुरुप्रस्ताराष्टकवर्गः

| राशयः / ग्रहाः | मेषः | वृषभः | मिथुनः | कर्कः | सिंहः | कन्या | तुला | वृश्चि | धनुः | मकरः | कुम्भः | मीनः |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| शनिः | | | | o | | | o | | o | o | | |
| गुरुः | o | o | | o | o | o | o | | | o | o | |
| कुजः | o | | o | | | o | o | | o | o | | o |
| रविः | o | o | o | o | | | o | o | o | o | o | |
| शुक्रः | o | | | o | o | | | o | o | o | | |
| बुधः | o | | o | o | o | | | o | o | o | | o |
| चन्द्रः | | o | | o | | o | | o | | o | o | |
| लग्नम् | o | o | | o | o | o | o | | o | o | o | |
| योगः | ६ | ४ | ३ | ७ | ४ | ४ | ५ | ५ | ६ | ७ | ४ | २ |

इदानीं बृहस्पतेः गोचरफलविचारे कर्तव्ये, यदि गोचरवशात् गुरुः कन्याराशिं सङ्क्रमन् अस्ति, कन्याराशौ गुरुः लग्न-चन्द्र-कुज-गुरुभिः शुभबिन्दवः प्राप्ताः। अतः कन्या सङ्क्रमन् गुरुः स्वीये (द्वितीये) अष्टमांशे (३°४५' तः ७°३०') कुजस्याष्टमांशे (७°३०' तः ११°२५') चन्द्रस्याष्टमांशे (२२°३०' तः २६°१५') लग्नस्याष्टमांशे (२६°१५' तः ३०°००') शुभं फलं ददाति। अन्यत्र अनिष्टं फलं ददाति।

## स्वावलोकनप्रश्नः

**१. प्रस्तराष्टकवर्गं विवृणुत**

## १४.६. सर्वाष्टकवर्गः

सर्वैरष्टकवर्गैः निर्मिते सर्वाष्टकवर्गे कस्यचिद्राशौ बिन्दूनां सङ्ख्या २७ तः अधिका भवन्ति चेत् गोचरवशात् ग्रहाणां तद्राशसङ्क्रमणे भाववृद्धिः स्यात्। अन्यथा अनिष्टं स्यात्। सर्वाष्टकवर्गे एकस्मिन् राशौ एकस्मिन् अष्टकवर्गे यावन्तो बिन्दवो भवन्ति सा सङ्ख्या लिख्यते। यथा पूर्वोक्तमेव उदाहरणं यदि स्वीकुर्युः तर्हि सूर्याष्टकवर्गे मेषराशौ ३, वृषभराशौ ४, कन्याराशौ ४, कर्के ३, सिंहे ३ इत्येवं बिन्दूनां सङ्ख्या भवति। अतः --

| राशयः ग्रहाः | ०१ | ०२ | ०३ | ०४ | ०५ | ०६ | ०७ | ०८ | ०९ | १० | ११ | १२ | योगः |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| रविः | ३ | ४ | ४ | ३ | ३ | ४ | ३ | ६ | ४ | ४ | ५ | ५ | ४८ |

एवं पूर्वोक्तजन्माङ्गस्य सर्वाष्टकवर्गः इत्थं भवति -

| राशयः / ग्रहाः | ०१ | ०२ | ०३ | ०४ | ०५ | ०६ | ०७ | ०८ | ०९ | १० | ११ | १२ | योगः |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| रविः | ३ | ४ | ४ | ३ | ३ | ४ | ३ | ६ | ४ | ४ | ५ | ५ | ४८ |
| चन्द्रः | २ | ४ | ७ | ५ | १ | ४ | ५ | ४ | ४ | ८ | ३ | २ | ४९ |
| कुजः | ४ | ३ | ६ | १ | ४ | ३ | २ | २ | २ | ५ | ४ | ३ | ३९ |
| बुधः | ५ | ५ | ५ | ३ | ४ | ४ | ३ | ६ | ४ | ४ | ६ | ५ | ५४ |
| गुरुः | ६ | ४ | ३ | ७ | ४ | ४ | ५ | ४ | ६ | ७ | ४ | २ | ५६ |
| शुक्रः | ५ | ७ | ३ | ४ | ४ | १ | २ | ८ | ४ | ४ | ५ | ५ | ५२ |
| शनिः | २ | ३ | ४ | ३ | ३ | १ | ३ | ४ | ४ | ६ | ५ | १ | ३९ |
| योगः | २७ | ३० | ३२ | २६ | २३ | २१ | २३ | ३४ | २८ | ३८ | ३२ | २३ | ३३७ |

एवं चन्द्रराशेः येषु भावेषु बिन्दूनां सङ्ख्या तथा शुभभावेषु स्थितानां ग्रहाणां तथा एषु भावेषु बिन्दूनां सङ्ख्या-एते मिलित्वा २७ बिन्दुभ्यः (सर्वाष्टकवर्गे) अधिका भवति तर्हि भावफलस्य वृद्धिर्भवति। यदि २७ तः न्यूना सङ्ख्या भवति तर्हि भावफलस्य हानिर्भवति।

## १४.७. अष्टकवर्गफलम्

इदानीम् अष्टकवर्गफलं प्रोच्यते।

### १४.७.१. पितृकष्टमृतियोगः

सूर्याधिष्ठितराशेः नवमो राशिः पितृस्थानामिति कथ्यते। सूर्याष्टकवर्गे अस्मिन् नवमे भावे प्राप्तानां बिन्दूनां सङ्ख्या शोधपिण्डसङ्ख्यया गुणनं कर्तव्यम्। रव्यादिग्रहाणाम् अष्टकवर्गेषु

त्रिकोणशोधनम्, एकाधिपत्यशोधनञ्च आचार्यैः प्रोक्तम्। शोधनद्वयानन्तरम् अष्टकवर्गे प्राप्तबिन्दूनां सङ्ख्या शोधपिण्डमित्युच्यते। एतस्मिन् विषये अग्रे चर्चा क्रियते।

एवञ्च रव्याधिष्ठितराशेर्नवमे प्राप्तानां बिन्दूनां सङ्ख्या तथा शोधपिण्डस्य सङ्ख्याया च गुणनफलं यदा सप्तविंशतया भाज्यते तदा (अश्विनादिनक्षत्रेभ्यः) शेषनक्षत्रे गोचरवशात् रवेः सङ्क्रमणसमये रवेरागमनकाले पितुः कष्टं भवति। एतस्मान्नक्षत्रात् त्रिकोणे स्थितं नक्षत्रं यदा शनिः सङ्क्रामयति तदाऽपि पितुः पितृतुल्यस्य पितृव्यादेर्वा मरणं भवति। शोधनात्परम् अवशिष्टबिन्दूनां योगः शोध्यपिण्डमित्युच्यते।

लग्नाच्चतुर्थाधिपतिः यन्नवांशे स्थितो भवति तस्य अधिपतेर्दशायां पितुः तत्तुल्यस्य वा मृत्युः भवति। चतुर्थेशस्य दशायां पितुर्मरणं स्यात्। सुर्याष्टकवर्गे शोध्यपिण्डम् अष्टमभावगतबिन्दुसङ्ख्यया गुणयित्वा तत्फलस्य द्वादशसङ्ख्यया भाजनं कृत्वा यावान् शेषः मेषादेः तत्सङ्ख्यकराशौ गोचरवशात् सूर्यसङ्क्रमणे जातकस्य पितुर्मरणं स्यात्। एवमन्येषां सम्बन्धिनां मरणकालज्ञानार्थं तत्तद्ग्रहणामष्टकवर्गात् विचारणीयम्।

### १४.७.२. मातृनिधनवियोगः

चन्द्राष्टकवर्गे शोध्यपिण्डं चतुर्थभावस्थबिन्दुसङ्ख्यया गुणयित्वा गुणनफलं सप्तविंशत्या विभाज्य अवशेषः यावान् भवति, अश्विन्याः तत्तुल्यसङ्ख्यकनक्षत्रे शनिसङ्क्रमणे अथवा ततस्त्रिकोणे स्थितनक्षत्रे शनिसङ्क्रमणे मातुर्मरणं स्यात्। चन्द्राष्टकवर्गे चन्द्राधिष्ठितराशेः चतुर्थाष्टमयोः अधिपतिः यन्नवांशे तिष्ठति तद्राशीश्वरः यत्र तिष्ठति ततः त्रिकोणे गोचरवशात् रविः सङ्क्राम्यति तदा जातकस्य जनन्या मरणं सम्भवति। एवं लग्नात् सूर्याद्वा चतुर्थाष्टमयोः प्राप्तबिन्दुसङ्ख्यया पितुर्मरणकालो विचारणीयः।

### १४.७.३.भ्रातृमातुलसङ्ख्या

कुजाष्टकवर्गे तृतीयभावे प्राप्तानां बिन्दूनां सङ्ख्यया तुल्या जातकस्य भातृसङ्ख्यया भवति। एवं बुधाष्टकवर्गे चतुर्थे भावे प्राप्तानां बिन्दूनां सङ्ख्यया तुल्यासङ्ख्या मातुलानां भवति।

**१४.७.४.पुत्रसङ्ख्या**

गुर्वष्टकवर्गे पञ्चमभावे यैर्ग्रहैः शुभबिन्दवः प्राप्यन्ते तेषु यः नीचस्थः शत्रुराशिस्थो वा तेभ्यः प्राप्तबिन्दूनां सङ्ख्या पञ्चमभावस्थबिन्दुसङ्ख्याया वियोज्य शेषः पुत्राणां सङ्ख्या स्यात्। अत उक्तम् --

**गुरुस्थितसुतस्थाने यावतां विद्यते फलम्।**

**शत्रुनीचग्रहं त्यक्त्वा शेषास्तस्यात्मजाः स्मृताः।।**

शुक्राष्टकवर्गे अधिकबिन्दुयुक्तराशेः दिशि तद्राशौ लग्ने वा उत्पन्नया परिणये वंशवृद्धिः स्यात्। बिन्दुरहितराशिदिशि तद्राशौ लग्ने वा उत्पन्नया परिणये अर्थसन्ततिहानिः स्यात्।

**१४.७.५.शन्यष्टकवर्गात् मरणविचारः**

शन्यष्टकवर्गे लग्नादष्टमभावगतबिन्दुसङ्ख्यया शोध्यपिण्डं गुणयित्वा गुणनफलं सप्तविंशत्या भाजयित्वा शेषः यावान् भवति अश्विन्यादिनक्षत्रात् तत्सङ्ख्याकनक्षत्रे गोचरवशात् मन्दस्य गुरोर्वा सङ्क्रमणकाले मृत्युः सम्भवति। तथाहि --

**शोध्यपिण्डं शनेर्लग्नाद्धत्वा रन्ध्रफलैः सुखैः।**

**हृत्वावशेषभं याते मन्दे जीवेऽपि वा मृतिः।। इति।**

**१४.७.६.विनाशकालः**

शन्यष्टकवर्गे लग्नात् शन्यधिष्ठितराशिपर्यन्तं बिन्दूनां योगः यद्वा शन्यधिष्ठितराशेः लग्नपर्यन्तं बिन्दूनां योगः यावान् भवति तावति वयसि जातकस्य हानिः मृतिर्वा स्यात्। तथाहि --

**लग्नादिमन्दान्तफलैकसङ्ख्या -**
**वर्षे विपत्तिस्तु तथार्कपुत्रात्।**
**यावद्विलग्नान्तफलानि तस्मिन्**
**नाशो हि तद्योगसमानवर्षे।।**

## १४.८. आयुष्यनिर्णयः

शन्यष्टकवर्गे लग्नादष्टमे स्थितानां बिन्दूनां सङ्ख्यां शोध्यपिण्डेन गुणयित्वा गुणनफलं सप्तविंशत्या भाजयित्वा लब्धिर्यावती भवति तावद्वर्षाणि जातकस्यायुर्वक्तव्यम्। एकस्मिन् त्रिकोणसमूहे प्राप्तानां शुभबिन्दूनां सङ्ख्या यस्मिन् राशौ न्यूनतमा भवति, तां सङ्ख्यां राश्यन्तरद्वयस्य बिन्दुसङ्ख्यया योगात् वियोज्य शेषबिन्दुसंख्या राशीनामधः स्थापनीया। त्रिकोणसमूहे एकस्मिन् राशौ शुभबिन्दूनां सङ्ख्या यदि शून्यं स्यात् तर्हि अन्येषां राशीनां शोधनं न कर्तव्यम्। त्रिकोणसमूहे राशिद्वये बिन्दूनां सङ्ख्या शून्यं चेत् तृतीयराशावपि शून्यं स्थापनीयम्।

यदि त्रिकोणसमूहे त्रिष्वपि राशिषु बिन्दुसङ्ख्या समाना स्यात्तर्हि सर्वत्र शून्यं स्थापनीयम्। अत्र अधःस्थजातकचक्रस्य त्रिकोणशोधनप्रकारः दर्श्यते --

| | | | |
|---|---|---|---|
| कु बु शु | लग्नम् सूर्यः | | |
| केतुः | | | गुरुः |
| चन्द्रः | | | शनिः राहुः |
| | | | |

तथा हि --

**त्रिकोणेषु तु यन्न्यूनं तत्तुल्यं त्रिषु शोधयेत्।**
**एकस्मिन् भवने शून्ये तत् त्रिकोण न शोधयेत्।।**
**भवनद्वयशून्ये तु शोधयेदन्यमन्दिरम्।**
**समत्वे सर्वगेहेषु सर्वं संशोधयेत्तदा।।**

अष्टकवर्गे त्रिकोणशोधनानन्तरम् अवशिष्टेषु बिन्दुफलेषु एकाधिपत्यशोधनं करणीयम्। यस्य ग्रहस्य आधिपत्यं राशिद्वये भवति केवलं तस्यैव एकाधिपत्यशोधनं करणीयम्। एकस्य ग्रहस्य राशिद्वयस्य एकः ग्रहसहितः अपरः ग्रहरहितश्चेत् तथा ग्रहयुक्तेषु प्राप्तबिन्दुसङ्ख्या ग्रहविहीनराशौ प्राप्तसङ्ख्यातः न्यूना चेत् ग्रहविहीनराशेः बिन्दुसङ्ख्यां सग्रहराशेर्बिन्दुसङ्ख्यातः वियोज्य सग्रहराशेर्बिन्दुसङ्ख्यया समाना कर्तव्या।

एकस्यैव ग्रहस्य एकः राशिः सग्रहः अन्यः ग्रहरहितश्चेत्, सग्रहराशेः बिन्दुसङ्ख्या ग्रहरहितस्य बिन्दुसङ्ख्यातः न्यूना चेदपि ग्रहरहितराशेः बिन्दवः त्यक्तव्याः। एकस्यैव ग्रहस्य राशिद्वयं ग्रहरहितं तथा उभयत्र बिन्दुसङ्ख्या समाना चेत् उभयत्र बिन्दवः त्यक्तव्याः। यदि समग्रहीयराशिद्वयं सग्रहं स्यात् तथा उभयत्र बिन्दुसङ्ख्या समाना स्यात्तर्हि शोधनं कस्यापि न कर्तव्यम्। तथाहि --

**उभाभ्यां ग्रहहीनाभ्यां समत्वे सकलं त्यजेत्।**
**उभयोर्ग्रहसंयुक्ते न संशोध्यं कदाचन।।** इति।

एकस्य ग्रहस्य सग्रहैः ग्रहविहीनो वा राशिर्यदि फलरहिताः स्यात्तर्हि तस्य शोधनं न कार्यम्। एकस्यैव ग्रहस्य राशिद्वयं ग्रहविहीनं चेत् बिन्दुसङ्ख्याऽपि असमाना चेदपि अल्पबिन्दुसङ्ख्या उभयत्र न्यूनयितव्या। त्रिकोणैकाधिपत्यशोधनानन्तरं मेषादिराशिषु प्राप्ता बिन्दुसङ्ख्या तत्तद्राशीनां राशिमानेन गुणनीया, सूर्यादिग्रहाधिष्ठितराशीनां बिन्दुसङ्ख्यया ग्रहमानेन गुणनीया। तथाहि --

**शोध्यावशिष्टं संस्थाप्य राशिमानेन वर्धयेत्।**
**ग्रहयुक्तेऽपि तद्राशौ ग्रहमानेन वर्धयेत्।।** इति।

## स्वावलोकनप्रश्नः

**२. शन्यष्टकवर्गात् मरणविचारं विशयदत ?**

## १४.८.१. राशिग्रहगुणाङ्काः

वृषसिंहयोर्गुणाङ्कः - १०, मिथुनवृश्चिकयोः - ८, मेषतुलयोः - ७, कन्यामकरयोः -५, कर्कधनुष्कुम्भमीनानां यथाक्रमं - ४,९,११,१२ भवन्ति। गुरुकुजशुक्रबुधानां गुणाङ्काः यथाक्रमं - १०,२,७,५। अन्येषां रवीन्दुमन्दानामपि ५। एतदित्थं ज्ञातव्यम् --

### १४.८.१.१.राशिगुणाङ्काः

| राशयः | ०१ | ०२ | ०३ | ०४ | ०५ | ०६ | ०७ | ०८ | ०९ | १० | ११ | १२ |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| गुणाङ्काः | ७ | १० | ८ | ४ | १० | ५ | ७ | ८ | ९ | ५ | ११ | ११ |

### १४.८.१.२. ग्रहगुणाङ्काः

| ग्रहः | सूर्यः | चन्द्रः | कुजः | बुधः | गुरुः | शुक्रः | शनिः |
|---|---|---|---|---|---|---|---|
| गुणाङ्कः | ०५ | ०५ | ०८ | ०५ | १० | ०७ | ०५ |

तथाहि --

**गोसिंहौ दशगुणितौ वसुभिर्मिथुनालिभे।**
**वणिङ्मेषौ च मुनिभिः कन्यकामकरे शरैः।।**
**शेषाः स्वमानगुणिताः कर्किचापघटीझषाः।**
**एते राशिगुणाः प्रोक्ताः पृथग्ग्रहगुणाः पृथक्।।**
**जीवारशुक्रसौम्यानां दशवशसप्तेन्द्रियैः क्रमाद्गुणिताः।**
**बुधसङ्ख्या शेषाणां शशिगुणाद्ग्रहगुणः पृथक्कार्यः।।** इति।

### १४.८.२. अष्टकवर्गजायुरानयम्

एवं पूर्वोक्तप्रकारेण गुणाङ्कैः गुणयित्वा सर्वेषां योगं सप्तसङ्ख्यया पुनर्गुणयित्वा गुणनफलं सप्तविंशत्या भाजयित्वा या लब्धिः भवति तदेव जातकस्यायुः। शेषं द्वादशभिः

गुणयित्वा सप्तविंशत्या भाजयित्वा लब्धिः मासाः, शेषं पुनः त्रिंशता गुणयित्वा सप्तविंशत्या भाजयामः चेत् दिनानि। एवं पुनः शेषं षष्ट्या गुणयित्वा सप्तविंशत्या भाजयित्वा लब्धिः घट्यादिः भवति।

### १४.८.३. आयुषो हरणम्

ग्रहः ग्रहान्तरेण युक्तश्चेत् तस्यायुर्दायस्य अर्धं तथा ग्रहः नीचस्थः अस्तंगश्चेदपि आयुर्दायाद् अर्धमेव स्वीकरणीयम्। यदि ग्रहः १) शत्रुराशिस्थः २) दृश्यार्धचक्रस्थः ३) ग्रहयुद्धलिप्तः ४) सूर्यपातस्थः चन्द्रपातस्थो वा स्यात्तर्हि आयुष्यस्य त्रिभाग एव हरणीयः।

यदि एकस्य ग्रहस्य बहूनि हरणानि प्राप्तानि तर्हि तेषु यद् अधिकतमं हरणं तदेव स्वीकार्यम्। एवं हरणानन्तरं ग्रहस्यावशिष्टायुर्दायानां योगं ३२४ द्वारा गुणयित्वा गुणनफलं ३६५ सङ्ख्यया भाजयित्वा लब्धं फलं स्पष्टायुर्वर्षादिः। तथा ग्रहाणां पृथगायुर्वर्षादितुल्यं तत्तद्ग्रहणां दशाः भवन्ति। अष्टकवर्गदशानयने इयमेव सर्वोत्कृष्टा रीतिः। इदानीं सर्वाष्टकवर्गे सूर्यादिग्रहैः कस्मिन् भावे कति बिन्दवः प्रदातव्या इति कोष्ठके स्पष्टीक्रियते -

| भावाः / ग्रहाः | ०१ | ०२ | ०३ | ०४ | ०५ | ०६ | ०७ | ०८ | ०९ | १० | ११ | १२ |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| रविः | ३ | ३ | ३ | ३ | २ | ३ | ४ | ५ | ३ | ५ | ७ | २ |
| चन्द्रः | २ | ३ | ५ | २ | २ | ५ | २ | २ | २ | ३ | ७ | १ |
| कुजः | ४ | ५ | ३ | ५ | २ | ३ | ४ | ४ | ४ | ६ | ७ | २ |
| बुधः | ३ | १ | ५ | २ | ६ | ६ | १ | २ | ५ | ५ | ७ | ३ |
| गुरुः | २ | २ | १ | २ | ३ | ४ | २ | ४ | २ | ४ | ७ | ३ |
| शुक्रः | २ | ३ | ३ | ३ | ४ | ४ | २ | ३ | ४ | ३ | ६ | ३ |
| शनिः | ३ | २ | ४ | ४ | ४ | ३ | ३ | ४ | ४ | ४ | ६ | १ |
| लग्नम् | ५ | ३ | ५ | ५ | २ | ६ | १ | २ | २ | ६ | ७ | १ |

अयमष्टकवर्गः सर्वकार्येषु मुख्यः भवति। एतद्विहाय शुभाशुभविज्ञानम् असाध्यं भवति। सर्वाष्टकवर्गे येषु राशिषु शुभबिन्दवः ३० तः अधिका भवन्ति ते राशयः शुभफलदा भवन्ति,

येषु २५-३० भवन्ति ते राशयः मध्यमाः, येषु ततो न्यूनाः ते अशुभफलदाः भवन्ति। सर्वाष्टकवर्गे एकादशभावस्थबिन्दुसङ्ख्या दशमभावस्थबिन्दुसङ्ख्यातः अधिकास्तथा प्रथमभावस्थबिन्दुसङ्ख्या द्वादशभावस्थबिन्दुसङ्ख्यातः अधिका चेत् जातकः आजीवनं धनादिभोगं करोति। लग्नादिद्वादशभावेषु यत्र अधिका बिन्दवः भवन्ति तत्र सङ्क्रमणकाले शुभफलं वर्धते। अन्यथा तत्र सङ्क्रमणकाले कष्टं वर्धते। अयं नियमः षष्ठाष्टमद्वादशेतरेषु प्रभावी भवति।

१) लग्नात् शन्यधिष्ठितभावपर्यन्तम् बिन्दूनाम्,

२) राश्यधिष्ठितभावात् लग्नपर्यनं बिन्दूनाम्,

३) लग्नात् कुजाधिष्ठितभावपर्यन्तं बिन्दूनाम्,

४) कुजाधिष्ठितभावात् लग्नपर्यन्तं बिन्दूनाम्,

५) राह्वधिष्ठितभावात् लग्नपर्यन्तं बिन्दूनाम्,

पृथक् ७ सङ्ख्यया गुणयित्वा २७ सङ्ख्यया भाजयित्वा लब्धिः या भवति तत्तुल्यवर्षे जातकस्य कष्टं स्यात्। शुभग्रहाधिष्ठितभावेषु शुभग्रहाणां सङ्ख्यां ७ द्वारा संगुण्य गुणनफलं २७ द्वारा भाजयित्वा लब्धेः तुल्ये वर्षे धनपुत्रसुखादिवृद्धिः स्यात्। एवं संक्षेपेण अष्टकवर्गफलम्।

## १४.९. आदर्शप्रश्नाः

१. अष्टकवर्गनिर्माणप्रकारं लिखत।

२. अष्टकवर्गप्रयोजनं लिखत।

३. सर्वाष्टकवर्गं विवृणुत।

४. अष्टकवर्गफलं निरूपयत।

५. अष्टकवर्गाद्यायुरानयनप्रकारं विशदयत।

# पञ्चदशः खण्डः
# गुलिकाद्युपग्रह-गोचर-प्रवज्यायोग-उपसंहाराध्यायाः

## संरचना

१५.१. प्रस्तावना

१५.२. लक्षिताधिगमविशेषाः

१५.३. गुलिकाद्युपग्रहाः

१५.४.गोचरफलानि

१५.५. प्रव्रज्यायोगाः

१५.६. उपसंहारः

१५.७. आदर्शप्रश्नाः

## १५.१. प्रस्तावना

अन्तिमेऽस्मिन् पाठे गुलिकाद्युपग्रहाणां विचारः प्रस्तूयते। अन्यत्र होराग्रन्थेषु एतेषां विशेषविवरणं नैव उपलभ्यते। परमत्र गुलिकाद्युपग्रहाणां विचारः सम्यक् प्रतिपादितो विद्यते। प्रायशः दाक्षिणात्या एव मान्देः उपयोगं जातकेषु कुर्वन्ति। यमकण्टकादिकालविवरणमप्यत्र सम्यक् प्रस्तुतम्। वर्तमानकालिकफलज्ञानार्थमुपयुज्यमानस्य गोचारविचारस्यापि विवरणमत्र विस्तरेण क्रियते। तदनु परिव्राजकयोगानां वर्णनमपि संक्षेपेण क्रियते। सर्वेषामप्यध्यायानां नामाल्लेखपूर्वकं लेखकपरिचयः उपसंहाराध्याये वर्ण्यते।

## १५.२. लक्षिताधिगमविशेषाः

* गुलिकाद्युपग्रहाणां, मान्देः वैशिष्ट्यं च ज्ञातुं प्रभवन्ति।

* उपग्रहाणां स्वरूपं ज्ञातुं प्रभवन्ति।

* गोचारवशात् रव्यादीनां शुभाशुभफलानि ज्ञातुं प्रभवन्ति।

* प्रव्रज्यायोगानां ज्ञानं सम्भवति।

## १५.३. गुलिकाद्युपग्रहाः

१) मान्दी २) यमकण्टकम् ३) अर्धप्रहरः ४) कालः ५) धूमः ६) व्यतीपातः ७) इन्द्रचापः ९) केतुः इति नव उपग्रहाः सन्ति।

### १५.३.१. मान्दीस्थितिकालः

यदि दिनमानं ३० घटीमितं स्यात् तर्हि भान्वादिवासरेषु यथाक्रमं २६,२२,१८,१४,१०,६,२, घटीनाम् अन्ते मान्दी तिष्ठति। रविवासरे सूर्योदयात् २६ घटीनामनन्तरं, सोमवासरे सूर्योदयात् २२ घटीनामनन्तरमित्यादिक्रमेण एतद् ज्ञेयम्। यदि दिनमानं न्यूनम् अधिकं वा स्यात्तर्हि अनुपातानुसारं घटीनां ह्रासाधिक्यं करणीयम्।

रात्रौ बुधवासरात् पूर्वोक्तप्रकारेण गणना कर्तव्या, तन्नाम बुधवासरे सूर्यास्तात् २६ घटीनामनन्तरं गुलिकस्थितिर्वक्तव्या। अर्थात् भान्वादिवासरेषु यथाक्रमं सूर्यास्तात् १०,६,२,२६,२२,१८,१४ घटीनामनन्तरं गुलिकः तिष्ठति। एतदित्थं जानन्तु --

| वासरः | रविः | सोमः | कुजः | बुधः | गुरुः | शुक्रः | शनिः |
|---|---|---|---|---|---|---|---|
| दिने (घट्याम्) | २६ | २२ | १८ | १४ | १० | ०६ | ०२ |
| रात्रौ (घट्याम्) | १० | ६ | २ | २६ | २२ | १८ | १४ |

### १५.३.२. यमकण्टकादिस्थितिकालः

एवमेव भान्वादिवासरेषु दिने सूर्योदयात् यथाक्रमं १८,१४,१०,२,२६,२२ घटीषु रात्रौ १४,१०,६,२,२६,२२,१८ घटीषु (सूर्यास्तात्) यमकण्टकस्य स्थितिर्भवति।

| वासरः | रविः | सोमः | कुजः | बुधः | गुरुः | शुक्रः | शनिः |
|---|---|---|---|---|---|---|---|
| दिने (घट्याम्) | १८ | १४ | १० | ६ | २ | २६ | २२ |
| रात्रौ (घट्याम्) | १४ | १० | ६ | २ | २६ | २२ | १८ |

कालः सूर्योदयात् २,२६ इत्यादिक्रमेण भान्वादिवासरेषु दिने तिष्ठति।

| वासरः | रविः | सोमः | कुजः | बुधः | गुरुः | शुक्रः | शनिः |
|---|---|---|---|---|---|---|---|
| कालस्थितिः (घट्याम्) | २ | २६ | २२ | १८ | १४ | १० | ६ |

सूर्यस्य राश्यादिभोगे ४ राशयः, १३ अंशाः, १० कलाः योज्यन्ते चेत् धूमस्थितिर्ज्ञायते। धूमस्थितः १२ राशीनां ह्रासः क्रियन्ते चेत् शेषः व्यतीपातः भवति। व्यतीपाते ६ राशयः योज्यन्ते चेत् परिवेशः परिधिर्वाभवति। परिधेः १२ राशयः न्यूनीक्रियन्ते चेत् इन्द्रचापस्य राश्यादिभोगः भवति। इन्द्रचापराश्यादिभोगे १६ कलाः ४० अंशाः वर्ध्यन्ते चेत् केतोः भोगो भवति।

### १५.३.३. मान्द्या फलम्

लग्नादिभावेषु गुलिकः कीदृशं फलं ददाति इति विचार्यते। लग्ने मान्दिश्चेत् जातकः चोरः, क्रूरात्मा, अविनयी, वेदादिहीनः, दुर्बलः, नेत्रविकारयुक्तः, बुद्धिहीनः, अल्पसन्ततिः, बहुभोजी, सुखहीनः, लम्पटः, स्वल्पजीवी, भीरुः, जडमतिः, स्वभावकोपनश्च भवति।

द्वितीये मान्दिश्चेत् जातकः परुषवाक्, कलहप्रियः, धनहीनः, प्रवासी, अविश्वसनीयः च भवति। वाक्पटुत्वं तस्य न भवति। तृतीये मान्दिश्चेत् जातकः दर्पी, व्यसनप्रियः, गुणहीनः, कोपी, आडम्बरी, शोकभयरहितः, सोदरहीनश्च भवति। चतुर्थे मान्दिश्चेत् जातकः स्वजनैः, बान्धवैः, वाहनैः, धनदिभिश्च हीनः भवति।

पञ्चमे मान्दिश्चेत् जातकः चपलमतिः, अल्पायुश्च भवति। षष्ठे मान्दिश्चेत् जातकः शत्रुदलमर्दकः, भूतविद्याप्रेमी, वीरः, सुपुत्रयुक्तश्च भवति। सप्तमे मान्दिश्चेत् जातकः कलहप्रियः, बहूनां स्त्रीणां भर्ता, विद्वेषी, लोकद्रोही, कृतघ्नः, अल्पज्ञः, स्वल्वकोपश्च भवति। अष्टमे मान्दिश्चेत् जातकः विकलनेत्रः, विकलाननः, ह्रस्वदेहश्च भवति।

नवमे मान्दिश्चेत् जातकः गुरुजनैः पुत्रैश्च हीनो भवति। दशमे मान्दिश्चेत् जातकः सत्कार्य-दान-पुण्यादिभ्यो विमुखः दानादिविरतश्च भवति। एकादशे मान्दिश्चेत् जातकः सुखी, पुत्रवान्, बुद्धिमान्, तेजस्वी, कान्तिमांश्च भवति। द्वादशे मान्दिश्चेत् जातकः, विषयभोगनिःस्पृहः, दीनः, अपव्ययी च भवति।

### १५.३.४. गुलिकयुक्तग्रहाणां फलम्

गुलिकेन युक्तः रविः - पितुः, चन्द्रः - मातुः, कुजः - सोदरस्य कष्टं करोति। गुलिकयुक्तः बुधः जातकम् उन्मादं, गुरुः पाण्डित्यं, शुक्रः नीचस्त्रीभोगिनं, शनिः कुष्ठादिव्याधियुक्तं च करोति। गुलिकयुक्तः राहुः जातकस्य विषव्याधिं केतुः अग्निभयं च करोति।

गुलिककालस्य विषघट्यां जातः राजकुलोत्पन्नोऽपि जातकः भिक्षुकः भवति। गुलिकसंयोगः फलविनाशकः भवति। यमकण्टकः तु सुखदः भवति। पापफलदः गुलिकः तथा शुभदः यमकण्टकः बली भवति। अन्ये उपग्रहाः व्यसनादियाने गुलिकापेक्षया अर्धबलिनो भवति। गुलिकः शनिवत्, यमकण्टकः गुरुवत्, अर्धप्रहरः बुधवत्, कालः राहुवच्च भवति। अर्धप्रहरस्तु शुभग्रहयुते भावे समीचीनं फलं ददाति। शुभबिन्दुरहिते च पापफलं ददाति।

अधिपतियुक्ते भावे धूमादयः भावफलस्य नाशकाः भवन्ति। धूमः उत्तापम्, अग्निभयं मानसिकतापं च करोति। व्यतीपातः शृङ्गिभ्यः चतुष्पद्भ्यश्च मृत्युभयं करोति। परिवेषः जलभयम्, जलव्याधिभ्यश्च भयं करोति। बन्धनकारावासादिरपि स्यात्। इन्द्रचापात् प्रस्तरादाघातः स्यात्। उपग्रहः यस्मिन् भावे तिष्ठति तदीशस्य दशायां फलं जातकेन प्राप्यते।

## स्वावलोकनप्रश्नः

१. द्वादशभावेषु गुलिक(मान्दि)स्थितिफलानि विवृणुत ?

### १५.३.४. विविधभावेषु केतोः फलम्

केतुः लग्ने चेत् जातकः अल्पायुः, द्वितीये चेत् कुरूपः, कटुभाषी च, तृतीये पराक्रमी, चतुर्थे चेत् दुःखी, पञ्चमे चेत् नष्टपुत्रकः, षष्ठे चेत् शत्रुभीतः, सप्तमे चेत् कामेच्छारहितः, अष्टमे चेत् कुमार्गेण मृतः, नवमे चेत् धर्माभिरुचिहीनः, दशमे चेत् यात्राप्रियः, एकादशे चेत् लाभवान्, द्वादशे चेत् दोषी भवति।

धूम-व्यतीपात-परिवेष-इन्द्रचाप-उपकेतवः अदृश्याः सन्तः गगने सञ्चरन्तो यदा यदा दृश्यन्ते तदा लोकोपद्रवो भवति।

### १५.३.६. उपग्रहाणां स्वरूपम्

धूमः धूमवत् पुच्छलतारका भवति। उल्कापात एव व्यतीपातः। सूर्यचन्द्रौ परितः विद्यमानः मण्डलः परिवेषः लोकप्रसिद्धः। इन्द्रधनुरेव इन्द्रचापः। धूमकेतुरेव केतुः।

### १५.३.७.गुलिकविशेषफलम्

गुलिकाधिष्ठितभावेशः बलवान् भूत्वा केन्द्र-त्रिकोण-स्वराशि-उच्चराशिषु मित्रराशौ वा स्थितश्चेत् जातकः रथ-गज-तुरगाद्यैश्वर्यैः युक्तः कामसमसुन्दरः यशस्वी राजा भवति।

## १५.४.गोचरफलानि

लग्नेषु चन्द्रलग्नस्य श्रेष्ठत्वात् तदेव लग्नं कृत्वा गोचरफलं निदेष्टव्यम्। कः ग्रहः चन्द्रराशेः केषु केषु भावेषु शुभो भवति इति कोष्ठके निर्दिश्यते --

| ग्रहः | शुभभावाः | अशुभभावाः |
|---|---|---|
| रविः | ३,६,१०,११ | १,२,४,५,७,८,९,१२ |
| सोमः | १,३,६,७,१०,११ | २,४,५,८,९,१२ |
| कुजः | ३,६,११ | १,२,४,५,७,८,९,१०,१२ |
| बुधः | २,४,६,८,१०,११ | १,३,५,७,९,१२ |
| गुरुः | २,५,७,९,११ | १,३,४,६,८,१०,१२ |
| शुक्रः | १,२,३,४,५,८,९,११,१२ | ६,७,१० |
| शनिः | ३,६,११ | १,२,४,५,७,८,९,१०,१२ |

### १५.४.१.ग्रहाणां शुभवेधस्थानानि

उपर्युक्तभावेषु रव्यादयो ग्रहाः तदैव शुभं फलं ददाति यदा तेषां ग्रहान्तरेण वेधः न भवति। यदि तस्मात् ग्रहात् निर्दिष्टराशिषु कश्चनग्रहो भवति तदा तस्य तस्य ग्रहस्य वेधः भवति। यथा चन्द्रराशेः ४,५,९,१२ राशिषु यदि गोचरवशात् कोऽपि ग्रहः स्यात्तर्हि रवेः वेधः भवति, शनिना रवेः वेधः न भवति। ग्रहाणां वेधस्थानानि कोष्ठकात् ज्ञायताम् --

| ग्रहः | वेधस्थानम् (चन्द्रराशेः) | अवेधकग्रहः |
|---|---|---|
| रविः | ४,५,९,१२ | शनिः |
| चन्द्रः | २,४,५,८,१२ | बुधः |
| शनिः | ५,९,१२ | रविः |
| कुजः | ५,९,१२ | — |
| बुधः | १,३,५,८,९,१२ | चन्द्रः |
| गुरुः | ३,४,८,१०,१२ | — |
| शुक्रः | १,५,६,७,८,९,१०,११ | — |

### १५.४.२.लग्नादिभावेषु विविधग्रहाणां सङ्क्रमणफलम्

यदा लग्नादिभावेषु विविधाः ग्रहाः गोचरवशात् सङ्क्राम्यन्ति तदा विविधानि फलानि जातको लभते। तदितः कोष्ठकात् स्पष्टीभविष्यति --

| ग्रहः | भावः | फलम् |
|---|---|---|
| **रविः** | १ | श्रान्तिः, धनक्षयः, रोगः, कोपः, यात्राकालः। |
| | २ | धनक्षयः, कष्टम्, अन्यैः वञ्चितः। |
| | ३ | पदोन्नतिः, धनागमः, प्रसन्नता, रोगमुक्तिः, शत्रुनाशः। |
| | ४ | रोगः, विघ्नः। |
| | ५ | सन्तापः, स्वाथ्यनाशः, रोगः, मोहः। |
| | ६ | रोगमुक्तिः, शोकः, मोहः, सन्तापः। |

| ग्रहः | भावः | फलम् |
|---|---|---|
| | ७ | यात्राक्लेशः, उदर-गुदयोः क्लेशः, अपमानम्। |
| | ८ | भयः, रोगः, विवादः, राजकोपः, तापः। |
| | ९ | विपत्तिः, दीनता, स्वजनविरहः, कष्टम्। |
| | १० | साफल्यम्, उच्चपदप्राप्तिः। |
| | ११ | सम्मानाभिवृद्धिः रोगमुक्तिश्च। |
| | १२ | कष्टम्, धनहानिः, स्वजनविरोधः, ज्वरः। |
| चन्द्रः | १ | भाग्योदयः। |
| | २ | धननाशः। |
| | ३ | विजयः, साफल्यम्। |
| | ४ | भयम्। |
| | ५ | शोकः। |
| | ६ | नैरुज्यम्। |
| | ७ | सुखम्। |
| | ८ | अनिष्टम्। |
| | ९ | रोगः। |
| | १० | अभीष्टसिद्धिः। |
| | ११ | आनन्दः। |
| | १२ | व्ययभारः। |
| कुजः | १ | मनस्तापः, स्वजनवियोगः, रक्तपित्तविकारः। |
| | २ | भयम्, वाग्दोषः, धनक्षयः। |
| | ३ | विजयः, साफल्यम्, स्वर्णाभूषणलाभादानन्दः। |
| | ४ | पदच्युतिः, उदरव्याधिः, स्वजनानां विपत्तिः। |
| | ५ | ज्वरः, पुत्रचिन्ता, स्वजनैः कलहः। |

| ग्रहः | भावः | फलम् |
|---|---|---|
| | ६ | शत्रुभिः कलहस्य निवृत्तिः, नैरुज्यम्, धनलाभः। |
| | ७ | पत्न्या विरोधः, नेत्रव्याधिः, उदरव्याधिः। |
| | ८ | ज्वरः, व्रणः, रक्तस्रावः, प्रतिष्ठाहानिः। |
| | ९ | पराजयः, धनक्षयः, दौर्बल्यम्, कार्यशक्तिनाशः। |
| | १० | दुराचारे प्रवृत्तिः, वैफल्यम्, विघ्नः, श्रान्तिः। |
| | ११ | धनम्, आरोग्यम्, भूसम्पल्लाभः। |
| | १२ | धनक्षयः, मनस्तापः। |
| **बुधः** | १ | धनक्षयः। |
| | २ | धनलाभः। |
| | ३ | शत्रुभयम्। |
| | ४ | धनलाभः। |
| | ५ | भार्यापुत्रैः कलहः। |
| | ६ | विजयः। |
| | ७ | विरोधः। |
| | ८ | धनलाभः। |
| | ९ | विघ्नः। |
| | १० | सुखम्। |
| | ११ | धनलाभः |
| | १२ | भयं तिरस्कारश्च। |
| **गुरुः** | १ | देशत्यागः, धनहानिः, शत्रुत्वम्। |
| | २ | धनलाभः, गार्हस्थ्यसुखम्। |
| | ३ | पदच्युतिः, प्रियनिधनम्, रोगः, अवरोधः। |
| | ४ | स्वजनानां बान्धवानां कारणेन कष्टम्, दीनता। |
| | ५ | पुत्रप्राप्तिः, सज्जनसमागमः, राजकृपा। |

| ग्रहः | भावः | फलम् |
|---|---|---|
| | ६ | स्वजनोत्पीडनम्, रोगः। |
| | ७ | सदुद्देश्यकभ्रमणम्, भार्यासुखम्, पुत्रपाप्तिः। |
| | ८ | कष्टप्रदयात्रा, अरिष्टम्, धनक्षयः, कष्टम्। |
| | ९ | सौभाग्योदयः। |
| | १० | धनस्थानपुत्रहानिः। |
| | ११ | पुत्रपदसम्मानवृद्धिः। |
| | १२ | कष्टं, धनहानिः, भयम्। |
| **शुक्रः** | १ | सुखम्। |
| | २ | धनलाभः। |
| | ३ | वैभवसुखम्। |
| | ४ | सुखप्राप्तिः, मित्रप्राप्तिः। |
| | ५ | सन्तानलाभः। |
| | ६ | विपत्तिः। |
| | ७ | स्त्रियाः कष्टम्। |
| | ८ | धनलाभः। |
| | ९ | सुखम्। |
| | १० | कलहभयम्। |
| | ११ | निर्भीकता |
| | १२ | धनलाभः |
| **शनिः** | १ | रोगवृद्धिः, स्वजननाशः। |
| | २ | धनसुतहानिः। |
| | ३ | पदभृत्यधनलाभः। |
| | ४ | स्वजन-स्त्री-धननाशः। |
| | ५ | धन-पुत्र-बुद्धिहानिः। |

| ग्रहः | भावः | फलम् |
|---|---|---|
| | ६ | सर्वविधसुखम्। |
| | ७ | भार्यायाः कष्टम्, क्लेशकरी यात्रा। |
| | ८ | पशुपुत्रमित्रधननाशः। |
| | ९ | दारिद्र्यम्, धर्मानुष्ठाने बाधा, पितृतुल्यस्य निधनम्। |
| | १० | दुराचारप्रवृत्तिः, मानहानिः, रोगात्कष्टम्। |
| | ११ | सर्वसुखम्, विभवः, कीर्तिलाभः। |
| | १२ | श्रान्तिः, धनक्षयः, रोगभयम्, कष्टम्। |
| राहुः | १ | शारीरिकहानिः |
| | २ | धनक्षयः। |
| | ३ | सुखम्। |
| | ४ | कष्टम्। |
| | ५ | धनहानिः। |
| | ६ | सुखम्। |
| | ७ | विनाशः। |
| | ८ | मृत्युः तत्तुल्यकष्टं वा। |
| | ९ | हानिः। |
| | १० | लाभः। |
| | ११ | सुखम्। |
| | १२ | व्ययभारः। |

### १५.४.३. गोचरफलप्राप्तिकालः

रविकुजौ राशेः प्रथमे तृतीयांशे (१°-१०°), गुरुशुक्रौ द्वितीये तृतीयांशे (१०°-२०°), शनिचन्द्रौ तृतीये तृतीयांशे (२०°-३०°) सङ्क्रमणकाले फलं ददति, राहुबुधौ सम्पूर्णराशौ सङ्क्रमणकाले फलं दत्तः।

### १५.४.४. सप्तशलाकाचक्रम्

पूर्वस्याः पश्चिमां प्रति सप्त रेखाः तथा उत्तरतः दक्षिणां प्रति सप्तरेखाः अङ्कयित्वा तासाम् अष्टाविंशतिप्रान्तेषु कृत्तिकातः आरभ्य अभिजित्सहितानि अष्टाविंशतिनक्षत्राणि नाम्ना लेखनीयानि। तदित्थम् --




अत्र पुरतो विद्यमानेन नक्षत्रेण पुरतो विद्यमानस्य वेधः भवति। यथा अश्विनीपूर्वफल्गुण्योः परस्परं वेधः, एवं च भरणीमघयोर्वेधः भवति।

### १५.४.५.विविधनक्षत्राणि

जन्मकाले चन्द्राधिष्ठितनक्षत्रं जन्मनक्षत्रं, ततः तृतीयनक्षत्रं विपन्नक्षत्रं, पञ्चमनक्षत्रं प्रत्यारिनक्षत्रम्, सप्तमनक्षत्रं वधनक्षत्रं, दशमनक्षत्रं कर्मनक्षत्रं, नवदशनक्षत्रम् आधाननक्षत्रं तथा त्रयोविंशतिनक्षत्रं वैनाशिकनक्षत्रं भवति।

### १५.४.६.नक्षत्रवेधफलानि

सूर्याधिष्ठितनक्षत्रेण जन्मनक्षत्रस्य वेधः भवति चेत् जीवसङ्कटम्, आधाननक्षत्रेण सूर्यनक्षत्रस्य वेधश्चेत् भयं, चिन्ता च, आधाननक्षत्रेण कर्मनक्षत्रस्य वेधश्चेत् धनहानिः भवति,

सूर्येण सह एकस्मिन्नक्षत्रे अन्यः पापग्रहः भवति तथा आधाननक्षत्रेण तस्य वेधो भवति चेत् जातकस्य मरणं स्यात्।

एवं जन्मकर्माधाननक्षत्राणां वेधः सूर्येतरपापग्रहाधिष्ठितनक्षत्रेण भवति चेत् मृत्युः, मृत्युतुल्यकष्टं वा स्यात्। यदि आधान-कर्म-वियज्जन्म-वैनाशिक-प्रत्यारि वधनक्षत्राणां वेधः पापग्रहाधिष्ठितनक्षत्रेण स्यात्तर्हि मृत्युः स्यात्। सूर्यसङ्क्रान्तिदिने, कस्यचिद्ग्रहस्य राश्यन्तरसङ्क्रमणदिने ग्रहणे, ग्रहयुद्धे, उल्कापातदिने यदि जन्मकर्माधाननक्षत्राणि स्युस्तर्हि जातकस्यनिष्टं स्यात्। पापग्रहः शुभैर्दृष्टः अथवा शुभग्रहः पापेन दृष्टश्चेत् ग्रहः निष्फलः भवति। अनिष्टस्थानस्थितग्रहः उच्चे, स्वराशौ, मित्रराशौ वा स्थितः चेत् अनिष्टकारको न भवति। एवं स्थितो ग्रहः शुभस्थानगतः गोचरे पूर्णं फलं ददाति। गोचरवशात् शुभस्थानगतो ग्रहः नीचः, शत्रुराशिगतः तथा अस्तङ्गतः चेत् शुभफलं ददाति। एवम् अशुभस्थानगतः ग्रहः उक्तस्थितौ भवति चेत् अधिकमशुभं करोति।

शनि-रवि-कुज-गुरवः गोचरवशात् जन्मराशिं ततः अष्टमं द्वादशं च सङ्क्रान्तः चेत् जातकस्य पदच्युतिः, मृत्युभयं, धनक्षयश्च भवति। गोचरवशात् जन्मराशेः अष्टमे चन्द्रः, सप्तमे कुजः, नवमे राहुः, षष्ठे शुक्रः, तृतीये गुरुः, पञ्चमे रविः, जन्मराशौ शनिः, चतुर्थे बुधश्च सङ्क्राम्यति चेत् जातकस्य मानहानिः, मृत्युश्च भवेत्।

---

### १५.४.७.नक्षत्राणामङ्गन्यासक्रमः

---

गोचरवशात् रव्यादयो ग्रहाः विविधनक्षत्रेषु सङ्क्रमणकाले जातकस्य विविधान्यङ्गानि प्रभावयन्ति। एतज्ज्ञानार्थं सप्तविंशतिनक्षत्राणि जातकस्य विविधेष्वङ्गेषु न्यस्य तेषु सङ्क्रमणकाले को ग्रहः कीदृशं फलं ददातीति ग्रन्थावलोकनेन ज्ञायताम्।

इत्थं दशा -अन्तर्दशा -गोचराष्टकवर्गेषु दुःस्थितग्रहाणां शान्त्यर्थं तेषां प्रियमन्त्रादीनां जपः अनुष्ठानादिसत्कर्माणि दानं वन्दनादिकं च करणीयम्। वस्तुतः अहिंसकस्य, आत्मनियन्त्रितस्य, धर्मोपार्जितधनभोगिनः, नियमसंयमपरायणस्य सर्वे ग्रहाः शुभप्रदाः भवन्ति। अत उक्तम् --

**अहिंसकस्य दान्तस्य धर्मार्जितधनस्य च।**

**सर्वदा नियमस्थस्य सदा सानुग्रहा ग्रहाः।।**

## १५.५. प्रव्रज्यायोगाः

जन्मकाले चतुर्भिग्रहैः युक्तो दशमेशः केन्द्रत्रिकोणगश्चेत् जातकः मुक्तिमार्गं प्रति व्रजति, एवं राशेः अन्तिमांशेषु लग्नं भवति तथा तत्र शुभग्रहः तिष्ठति गुरुश्च केन्द्रगतश्चेत् जातकः सन्यासी भवति। जन्मकाले चत्वारः तदधिका वा ग्रहाः यदि एकस्मिन्नेव राशौ भवन्ति तर्हि जातकः बलिग्रहस्यानुरूपां दीक्षां गृह्णाति। केषाञ्चिन्मते एषु ग्रहेषु दशमेशः अस्ति चेत् जातकः तदनुरूपामेव दीक्षां प्राप्नोति। चन्द्रः शनिद्रेष्काणे स्थितः शनिकुजाभ्यां दृष्टश्चेत् जातकः तापसः भवति। शनिनवांशस्थितः चन्द्रः कुजेन दृष्टश्चेत् जातकः प्रव्रज्यां स्वीकरोति।

यदि ग्रहान्तरादृष्टो जन्मराशीशः शशिना दृष्टः स्यात्तर्हि जन्मराशीशानुरूपा जातकस्य दीक्षा भवति। रविर्बलवांश्चेत् जातकः योगमार्गी, चन्द्रश्चेत् तीर्थाटनशीलः सन्यासी, कुजो बली चेत् बौद्धभिक्षुः, बुधश्चेत् सम्प्रदायत्यागी, गुरुश्चेत् वेदान्तज्ञः, शुक्रश्चेत् आडम्बरी, शनिश्चेत् ज्ञानहीनः, पाषण्डी भवति। तथाहि ..

**योगीशं दीक्षितं वा कलयति तरणिस्तीर्थपान्थं हिमांशु-**

**र्दुर्मन्त्रज्ञं च बौधायश्रयमवनिसुतो ज्ञो मतान्यप्रविष्टम्।**

**वेदान्तज्ञानिनं वा यतिवरममरेड्यो भृगुर्लिङ्गवृत्तिं**

**व्रात्यं शैलूषवृत्तिं शनिरिह पतितं वाऽथ पाषण्डिनं वा।।** इति।

यदि प्रव्रज्यायोगेन सह जन्माङ्गे राजयोगोऽपि स्यात्तर्हि पूर्वोक्ता दोषा नश्यन्ति, जातकः साधुर्गुणवान् राजा भवति। तस्य पुरतः अन्ये राजानः शिरो नमयन्ति। दशमेशेन सह चत्वारो ग्रहाः केन्द्रत्रिकोणगाः अथवा त्रयो ग्रहा शुभस्थानगताश्चेत् जातकः सफलः साधकः भवति। शुभग्रहः शुभस्थितश्चेत् जातकः अन्यैः पूजितो भवति।

## १५.६. उपसंहारः

इत्थमस्मिन् ग्रन्थे सप्तविंशतौ अध्यायेषु विविधाः विषयाः प्रोक्ताः। तद्यथा ---

१) संज्ञाध्याये  - विविधपदानां व्याख्या।

२) कारकाध्याये - ग्रहकारकत्वविवरणम्।

३) तृतीयाध्याये - राशीनां विभागवर्णनम्।

४) चतुर्थाध्याये - ग्रहाणां बलाबलनिरूपणम्।

५) कर्मजीवाध्याये - आजीविकासाधननिर्णयः।

६) षष्ठाध्याये - विविधयोगानां विवरणम्।

७) सप्तमाध्याये - राजयोगाः।

८) अष्टमाध्याये - द्वादशभावफलानि।

९) नवमाध्याये - मेषादिलग्नफलानि।

१०) दशमाध्याये - प्रथमात् सप्तमं यावद् भावानां विवेचनम्।

११) एकादशाध्याये - स्त्रीजातकविचारः।

१२) द्वादशाध्याये - सन्तानभावविवेचनम्।

१३) त्रयोदशाध्याये - बालारिष्टविचारः।

१४) चतुर्दशे - रोगविचारः।

१५) पञ्चदशे - भावशुभाशुभचिन्ता।

१३) षोडशाध्याये - लग्नादिद्वादशभावानां समुदायफलचिन्ता।

१७) सप्तदशे - मृतिकालविचारः।

१८) अष्टादशे - द्विग्रहयोगफलविचारः।

१९) नवदशे - दशाफलनिरूपणम्।

२०) विंशे - दशापहारविचारः।

२१) एकविंशे - अन्तर्दशाफलविचारः।

२२) द्वाविंशे - कालचक्रदशानिरूपणम्।

२३) त्रयोविंशे - अष्टकवर्गविचारः।

२४) चतुर्विंशे - अष्टकवर्गफलनिरूपणम्।

२५) पञ्चविंशे - गुलिकाद्युपग्रहविचारः।

२६) षड्विंशे - गोचरफलविचारः।

२७) सप्तविंशे - प्रव्रज्यायोगविचारः।

एवमन्तिमाध्याये उपसंहारवचने अध्यायः निरूपिताः।

## १५.७. आदर्शप्रश्नाः

१. गुलिकयुक्तग्रहाणां फलं लिखत।

२. गुलिकाद्युपग्रहाणां विषये लिखत।

३. यमकण्टकादिस्थितिकालं विवृणुत।

४. गोचरवशात् रव्यादीनां शुभाशुभस्थानानि लिखत।

५. प्रव्रज्यायोगान् व्याख्यात।